प्रवचनसूची[1]

प्रथमं प्रवचनम् (१३-३-६४)	...	...	...	१-३६
द्वितीयं प्रवचनम् (१४-३-६४)	...	...	...	३७-७२
तृतीयं प्रवचनम् (१५-३-६४)	...	...	...	७३-९६

१. इमानि प्रवचनानि [illegible] विदुषा [illegible] प्रदत्तानि ।

अद्वैतसिद्धेः शाङ्करवेदान्ते किं स्थानम्

प्रथमं प्रवचनम्

मातामहमहाशैलं महस्तदपितामहम्।
कारणं जगतां वन्दे कण्ठादुपरि वारणम्॥

वाराणसेयसंस्कृतविश्वविद्यालयसम्बन्धिमान्यश्रीगङ्गानाथझामहोदयप्रवचनमालायां त्रीणि प्रवचनानि दातुं ममावसरो लब्ध इति महदिदं सौभाग्यम्। विषयस्त्वेतेषाम्—अद्वैतसिद्धेः शाङ्करवेदान्ते किं स्थानमिति। तत्राद्वैतसिद्धिरभिधेयप्रधाना द्वैतोपलक्षितब्रह्मसिद्धिः, द्वैताभाववद्ब्रह्मसिद्धिर्वा। तमभिधेयमभिलक्ष्य निबद्धो निबन्धोऽद्वैतसिद्धिर्नाम।

अद्वैतमेव तत्त्वम्

तत्राद्वैतपदार्थः द्वैताभावः, तस्य पारमार्थिकत्वे ब्रह्मस्वरूपत्वात् स एव तत्त्वम्। तदपारमार्थिकत्वे तु द्वितीयाभावोऽतत्त्वम्, तत्त्वन्तु ब्रह्मैव। तत्र तत्त्वपदं तत्तन्मतावलम्बिभिः स्वीयेषु सिद्धान्तेषु प्रयुज्यते सिद्धान्तान्तराण्यतत्त्वं मत्वा। अतो द्वैतिनोऽद्वैतमतत्त्वमिति, अद्वैतिनो द्वैतमतत्त्वमिति च मन्यन्ते। अतोऽद्वैतसिद्धिः "इह कुमतिरतत्त्वे तत्त्ववादी वराकः" इति

द्वैतमतत्त्वमिति मनुते। तत्र द्वैतिनामाक्षेपोऽद्वैतसिद्धान्तदृष्ट्यैवाद्वैतमतत्त्वमिति "अतात्त्विक एव वा तदभावः" इत्यद्वैतसिद्धिः स्वयं वदतीति; परन्त्वतात्त्विक एव वा निषेध इति सिद्धिवाक्यं द्वैताभावस्य मिथ्यात्वस्यापि मिथ्यात्वपक्षमादाय। तन्मते हि ब्रह्मैव तत्त्वम्, न तु मिथ्यात्वमिति न तेनाद्वैतातत्त्वतायां पर्यवसानम्।

मिथ्यात्वमिथ्यात्वेऽपि न प्रपञ्चसत्यत्वम्

द्वैतमिथ्यात्वमिथ्यात्वेन द्वैतसत्यत्वं न कथमपि, इति न मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वापत्तिः, इति द्वैतसत्यत्वापत्तिनिरासेन न द्वैतसत्यतायां पर्यवसानम्। द्वितीयाभावस्य मिथ्यात्वमिति पक्षे हि द्वितीयस्येव द्वितीयाभावस्यापि दृश्यत्वेन प्रतियोगि-तदभावयोरुभयोरपि निषेध्यतावच्छेदकैक्यमादाय निरूढम्, इति न तावता द्वैततात्त्विकतापत्तिः।

स्वाप्नजागरवैधर्म्यं ब्रह्मेतरमिथ्यात्वाविरुद्धम्

तत्र सत्यम्, "वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रे "वैधर्म्यं हि भवति स्वप्न-जागरितयोः। किं पुनर्वैधर्म्यम्? बाधाबाधाविति ब्रूमः। बाध्यते हि स्वप्नोपलब्धं वस्तु, नैवं जागरितोपलब्धं वस्तु स्वाभाविकं कस्याञ्चिदवस्थायां बाध्यते" इति भाष्येण जागरितोपलब्धस्तम्भाद्यशेषद्वैत-प्रपञ्चस्याबाधितत्वलक्षणतत्त्वरूपताङ्गीकृता। नह्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमन-धिगम्य शक्यतेऽपह्नोतुम्, इति शाङ्करभाष्ये ब्रह्मविद्याभरणादावन्यत्र चाद्वैतनिबन्धेषु निर्धा-रितम्; तथापि सर्वत्राद्वैतनिबन्धेषु व्यवहारनिर्वाहकं सत्यत्वमेव तत्र निरूपितम्। अनेन हि ज्ञाना-कारातिरिक्ता अर्था न सन्तीति सौगतमतमेव निरस्यते। शाबरभाष्येऽपि निरालम्बनवाद-निराकरणावसरेऽयमेवार्थः स्फुटीकृतः। एतावता च व्यावहारिकं प्रामाण्यं सर्वेषां प्रमाणानाम्, न तु पारमार्थिकं त्रैकालिकाबाध्यत्वमित्येव सिद्ध्यति।

अनेन हि प्रसङ्गेन स्वप्न-जागरयोर्व्यवहारदशायां बाधाबाधावेव मन्येते, इति स्वाप्नानां व्यावहारिकाणामपि न प्रामाण्यं जागरवत्; स्वाप्नस्य जागरे बाधितत्वात्, जागरितस्य जाग्र-दवस्थायामबाधितत्वाच्च, इति पारमार्थिकसत्यता द्वैतस्य नानेन भाष्येणावगन्तुं शक्यते।

इदं स्वाप्न-जागरितयोर्वैधर्म्यं न द्वैतिमते, अन्यत्र वा ईश्वरस्यैव विचित्रशक्तिविशेषेण वासनाद्वारेण वा सृष्टत्वमिति स्वीकारात् स्वाप्न-जागरितयोर्वैधर्म्यं दुरुपपादम्; अन्यथा स्वाप्न-जागरितयोरेकरूपा कल्पना स्यात्, वैधर्म्यं वा न स्यात्। अतः स्वाप्न-जागरितवैधर्म्य-

मात्रेण द्वैतमात्रस्य तत्त्वता नाद्वैतमतदृष्ट्या प्रचारयितुं शक्यते, इत्यद्वैतदृष्ट्यैवाद्वैतमतत्वमिति द्वैतिनां वादो हठवादः ।

द्वैतसिद्धान्तमात्रविमर्शोऽद्वैतसिद्धौ

अत्राद्वैतसिद्धेः शाङ्करवेदान्ते स्थानविचारावसरे द्वैताद्वैतसिद्धान्तयोर्विमर्शनमेव विषयः, न तु विशिष्टाद्वैतादिसिद्धान्तानां विमर्शनम् । अयमत्र द्वैताद्वैतसिद्धान्तयोर्वादप्रस्थानक्रमः ।

अद्वैतसिद्धान्तः

(१) चित्सुखाचार्याणां तत्त्वप्रदीपिका

(२) व्यासतीर्थानां न्यायामृतनिरासाय श्रीमधुसूदनसरस्वतीनामद्वैतसिद्धिः

(३) अद्वैतसिद्धेर्व्याख्या लघुचन्द्रिका, गुरुचन्द्रिका च पूज्यश्रीब्रह्मानन्दसरस्वतीनां तरङ्गिणीखण्डनरूपा, अपरश्च निबन्धः सिद्धिव्याख्या न्यायामृतकण्टकोद्धारखण्डनरूपा ।

द्वैतसिद्धान्तः

(१) जयतीर्थानां वादावलिः

(२) व्यासतीर्थानां न्यायामृतञ्च, येन चित्सुखाचार्याणां सिद्धान्ता निरस्यन्ते अद्वैतसिद्धेर्निरासार्थं श्रीरामतीर्थानां तरङ्गिणी, न्यायामृतव्याख्या, स्वतन्त्राश्चापरे ग्रन्थाः न्यायामृतकण्टकोद्धारादयश्च ।

अतोऽवगम्यते शाङ्करवेदान्ते स्थानमद्वैतसिद्धेर्द्वैतवेदान्तनिरसन एव ।

यद्यपि प्रपञ्चसत्यत्व-मिथ्यात्वादौ, सगुण-निर्गुणवादादौ, सखण्डार्थाखण्डार्थवादयोः, अन्यत्र च बहुषु मतान्तरसाधारण्यं दृश्यते, परन्तु प्रधानं मुख्यं लक्ष्यं द्वैतसिद्धान्तनिरसनमेवाद्वैतसिद्धेः ।

अद्वैतपदं श्रौतम्

तत्राद्वैतपदमुपनिषत्सु माण्डूक्योपनिषदभिधेयप्राधान्येन प्रवृत्ते प्रकरणे, "नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं नाप्रज्ञमदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते" इत्यभिधानप्रधानप्रकरणे, "अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमश्शिवोऽद्वैत एवमोङ्कार आत्मैव स विशत्यात्मनाऽऽत्मानं य एवं वेद य एवं वेद" इत्यत्राम्नायते ।

द्वैतिनामद्वैतपदव्याख्यानम्, तन्निरासश्च

अत्राद्वैतपदं द्वैतभाष्यव्याख्यायामुक्तमाण्डूक्योपनिषत्कारिकायाम्—

"निर्दुःखसुखरूपत्वात् शिवशब्दश्रुतौ श्रुतः।
अन्यथाप्रत्ययो द्वैतं शमयेत्तं यतो हरिः॥
अद्वैतस्तेन चोद्दिष्टः तुरीयः पुरुषोत्तमः।"

इति माहात्म्यानुसारेणान्यथाप्रत्ययरहित इति, द्वैतपदमन्यथा ज्ञानमिति च न्यासतीर्थटीकायां व्याख्यातम्। अत्र व्यासतीर्थैः—"न विद्यते द्वैतं भिन्नं यस्मात्तदद्वैतमित्यन्यथाप्रतीतिनिरासाय व्याचष्टे—अन्यथेति" इति स्वीयमद्वैतपदव्याख्यानमद्वैतमतनिरासार्थमिति विशदीक्रियते।

श्रीनिवासटीका हि प्रकृतप्रकरणे "न विद्यते द्वैतं भिन्नं यस्मात्तदद्वैतमित्यन्यथाप्रतीतिनिरासायाद्वैतशब्दार्थमाह—अन्यथाप्रत्ययः" इति पूर्वोक्तमेवार्थं द्वैतशब्दस्य व्याचष्टे।

माण्डूक्योपनिषत्कारिका हि द्वैतमते न गौडपादीया कृतिः, किन्तु तत्रागमप्रकरणमात्रं श्रुतिः। अन्यानि तु वैतथ्यप्रकरणम्, अद्वैतप्रकरणम्, अलातशान्तिप्रकरणञ्च तन्मते स्वतन्त्रं प्रकरणम्। अतोऽद्वैतपदव्याख्यानं श्रुतिमनुसृत्यैव कर्तव्यम्, न तु तस्य तस्याचार्यस्य सिद्धान्तमात्रानुसारेणेत्यभिप्रेत्यैव व्यासतीर्थ-श्रीनिवासतीर्थयोरद्वैतपदव्याख्यानमत्र समुद्धृतम्।

त्रिपाद्ब्रह्मोपनिषदादिदृष्ट्याऽद्वैतपदार्थोऽद्वैताभिमत एव साधुः

अतः श्रुत्यन्तरानुसारेण तत्पदविवरणं किमत्र साम्प्रतमिति विचारणीयम्। तत्र च त्रिपाद्विभूतिमहानारायणोपनिषदि—"स एव तुरीयं ब्रह्म" इति तुरीयं ब्रह्म प्रकृत्य "ज्ञानात्मा तुरीयात्मा" इत्यादि वाचकावाच्योऽद्वैतपरमानन्दो विभुर्नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चिदित्यद्वैतपदं द्वैतसामान्यवर्जितवस्तुपरमेवाम्नायते।

परमहंसपरिव्राजकोपनिषदि "भगवन् ब्रह्म प्रणवः कीदृश इति ब्रह्मा पृच्छति। स होवाच नारायणः—ब्रह्म प्रणवः षोडशमात्रात्मकः सोऽवस्थाचतुष्टयचतुष्टयगोचरो जाग्रदवस्थायाम्" इत्यादिना जाग्रदादितुरीयान्ताभिधेयप्रधानमोङ्कारोपासनं प्रक्रम्य, नारदपरिव्राजकोपनिषदि च "देवत्वादानन्दपूर्णत्वाच्च सोऽयमात्मा चतुर्विधः—चतुष्पाद् जागरितः स्थूलप्रज्ञो हि विश्वभुक्" इत्युपक्रम्य तुरीयमात्मानं प्रस्तुत्य विकल्पत्रयमत्रापि मायामात्रं विदित्वैवं सच्चिदेकरसो ह्ययमित्योमर्थस्य तुरीयस्य परमार्थत्वं जागरिक-स्वाप्न-सुषुप्तानां स्वप्नमात्रत्वञ्च प्रतिपाद्यते। तेन च "माया-

मात्रमिदं सर्वम्" इति सर्वस्य द्वैतस्य मायामात्रत्वं तुरीयस्य परमार्थत्वञ्च शाप्यते। इदमेवाभिप्रेत्य—

"मायामात्रमिदं सर्वमद्वैतं परमार्थतः"

इत्यागमप्रकरणम्, गौडपादकारिका वा। किं बहुना? नृसिंहतापनीयोपनिषदि "ओंकार एव चतूरूपो ह्ययमोङ्कार" इति तुरीयं प्रक्रम्य "अविकल्परूपं हीदं सर्वम्, नैव तत्र काचन भिदास्ति। अथ तस्यायमादेशोऽमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः" इति माण्डूक्योपनिषदर्थोऽद्वैतात्माऽद्वितीय एव प्रतिपाद्यते, इत्यद्वैतपदस्य द्वैतिनां व्याख्यानं नृसिंहतापनीयोपनिषद्विरुद्धमपि। अयं चार्थो नृसिंहतापनीयोपनिषदि—"एकमेव तद्भवति ह्यविकल्पोऽपि नात्र काचन भिदाऽस्ति, नैव तत्र काचन भिदाऽस्ति। अत्र हि भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोति तदेतदद्वयम्" इत्यादिना सुबालोपनिषदमप्यालोड्य व्यवस्थाप्यते।

नृसिंहतापनीयोपनिषदपि नृसिंहस्वरूपमद्वितीयमात्मतत्त्वमेवेति स्पष्टं प्रतिपादयतीति, तस्य सगुणेश्वरपरतया केषाञ्चन व्याख्यानं निरालम्बम्।

गौडपादकारिकादृष्ट्याऽद्वैतपदार्थोऽद्वैताभिमत एव, न द्वैताभिमतः

गौडपादकारिकाया वैतथ्यप्रकरणम्, अद्वैतप्रकरणम्, अलातशान्तिप्रकरणञ्च माण्डूक्योपनिषद्गतमद्वैतपदव्याख्यानार्थं प्रवृत्तम्। आगमप्रकरणगतम्

"मायामात्रमिदं सर्वमद्वैतं परमार्थतः"

इत्यागमप्रकरणवचनं द्वैतानां परस्परम्, द्वैतेश्वरयोः, द्वैतजीवानाम्, जीवेश्वरयोः, जीवानाञ्च भेदं पञ्चविधं स्पष्टं निरस्यति। तत्र वैतथ्यप्रकरणं यथा—

वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः।
अन्तःस्थानात्तु भावानां संवृतत्वेन हेतुना ॥ १ ॥
अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति।
प्रतिबुद्धश्च वै सर्वस्तस्मिन् देशे न विद्यते ॥ २ ॥
अभावश्च रथादीनां श्रूयते न्यायपूर्वकम्।
वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितम् ॥ ३ ॥
अन्तःस्थानात्तु भेदानां तस्माज्जागरिते स्मृतम्।

यथा यत्र तथा स्वप्ने संवृतत्वेन भिद्यते ॥ ४ ॥
स्वप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः ।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ ५ ॥
आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ६ ॥
सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ७ ॥
अपूर्वं स्थानिधर्मो हि यथा स्वर्गनिवासिनाम् ।
तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः ॥ ८ ॥
स्वप्नवृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद् दृष्टं वैतथ्यमेतयोः ॥ ९ ॥
जाग्रद्वृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद्युक्तं वैतथ्यमेतयोः ॥ १० ॥
उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि ।
क एतान् बुध्यते भेदान् को वै तेषां विकल्पकः ॥ ११ ॥
कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया ।
स एव बुद्ध्यते भेदानिति वेदान्तनिश्चयः ॥ १२ ॥
विकरोत्यपरान् भावानन्तश्चित्ते व्यवस्थितान् ।
नियतांश्च बहिश्चित्त एवं कल्पयते प्रभुः ॥ १३ ॥
चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः ।
कल्पिता एव ते सर्वे विशेषो नान्यहेतुकः ॥ १४ ॥
अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।
कल्पिता एव ते सर्वे विशेषस्त्विन्द्रियान्तरे ॥ १५ ॥
जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान् ।
बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथा स्मृतिः ॥ १६ ॥
अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ १७ ॥

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते ।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥ १८ ॥
प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः ।
मायैषा तस्य देवस्य यया संमोहितः स्वयम् ॥ १९ ॥
प्राण इति प्राणविदो भूतानीति च तद्विदः ।
गुणा इति गुणविदस्तत्त्वानीति च तद्विदः ॥ २० ॥
पादा इति पादविदो विषया इति तद्विदः ।
लोका इति लोकविदो देवा इति च तद्विदः ॥ २१ ॥
वेदा इति वेदविदो यज्ञा इति च यज्ञविदः ।
भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः ॥ २२ ॥
सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः ।
मूर्त इति मूर्तविदोऽमूर्त इति च तद्विदः ॥ २३ ॥
काल इति कालविदो दिश इति च तद्विदः ।
वादा इति वादविदो भुवनानीति तद्विदः ॥ २४ ॥
मन इति मनोविदो बुद्धिरिति च तद्विदः ।
चित्तमिति चित्तविदो धर्माधर्मौ च तद्विदः ॥ २५ ॥
लोकाँल्लोकविदः प्राहुराश्रमा इति तद्विदः ।
स्त्रीपुंनपुंसकं लैङ्गाः परापरमथापरे ॥ २६ ॥
पञ्चविंशक इत्येके षड्विंश इति चापरे ।
एकत्रिंशक इत्याहुरनन्त इति चापरे ॥ २७ ॥
सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।
स्थितिरिति स्थितिविदः सर्वे चैव तु सर्वदा ॥ २८ ॥
यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।
तं चावति स भूत्वासौ तद्ग्रहः समुपैति तम् ॥ २९ ॥
एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत् सोऽविशङ्कितः ॥ ३० ॥
स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ ३१ ॥

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ३२ ॥

भावैरसद्भिरेवायमद्वयेन च कल्पितः।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ ३३ ॥

नात्मभावेन नानेदं न स्वेनापि कथञ्चन।
न पृथग् नापृथक् किञ्चिदिति तत्त्वविदो विदुः ॥ ३४ ॥

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ ३५ ॥

तस्मादेवं विदित्वैनमद्वैते योजयेत् स्मृतिम्।
अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥ ३६ ॥

निःस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च।
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥ ३७ ॥

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥ ३८ ॥ इति।

वैतथ्यप्रकरणार्थनिष्कर्षः

इदं वैतथ्यप्रकरणं सर्वभावानां वैतथ्यं प्रकम्य स्वाप्निकानां मिथ्यात्वं तद्दृष्टान्तेन जागरिकाणामपि मिथ्यात्वं रज्जुसर्पादेरिव निरूपयति। अनेन चेदं सूच्यते–"वैधर्म्याश्च न स्वप्नादिवत्" इत्यनेन सूत्रितं स्वाप्नवैधर्म्यं जागरिकाणां व्यवहारकालबाधितत्वाबाधितत्वाभ्याम्, न तु सर्वात्मना बाधाबाधाभ्याम् इति तत्साधर्म्य-वैधर्म्ये उभे अपि विशदीक्रियेते, तेन च भगवत्पादमतरीत्या "वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रगतभाष्यानुसारेण स्वाप्निकवैधर्म्याद् जागरितसत्यत्वमेवेति द्वैतिनामन्येषां केषाञ्चन कल्पना नावसरति। प्रपञ्चमिथ्यात्वानुमाने स्वाप्निकवदिति स्वाप्निकदृष्टान्तानुसंधानं तु स्वाप्निकदृष्टान्तेन ज्ञानाकारत्वमेव जागरिकाणामप्यर्थानामिति योगाचारमतनिरसनं स्वाप्निकविषये द्वैतिकेवलाद्वैतिनोः सिद्धान्तभेदं मनसिकृत्य। तत्र द्वैतिनोऽपि शुक्तिरूप्यादिभ्रमेष्वसत्ख्यातिं मन्वानाः सद्विलक्षणम्, सत्त्वेन प्रतीयद्‍त्वञ्च स्वीकुर्वन्ति, इति प्रतिपन्नोपाधौ त्रैकालिकप्रतिषेधप्रतियोगित्वमित्यत्र दृष्टान्तता न विरुद्धेत्यभिप्रेत्यैव शुक्तिरूप्योदाहरणम्। अयं तु दृष्टान्तः सद्विविक्तत्वरूपचतुर्थानुमाने स्वात्यन्ताभाववति प्रतीयमानत्वेऽपि

न विरुध्यते। ज्ञाननिवर्त्यत्वमपि द्वैतिभिरपि शुक्तिरूप्यादिस्थले शुक्तिसम्यग्ज्ञानबाधितत्वात् स्वीक्रियते। शुक्तिरूप्यादिस्थलेऽसत्ख्यातिस्वीकारस्तु तत्रासत्पदस्य पारिभाषिकत्वमभिप्रेत्यैव। तदीयमसत्ख्यातिपदं तु विपरीतख्यातिरिति नामान्तरेणापि व्यपदिश्यते। नामान्तरेण तत्रान्यथाख्यातिरेवेति तदीयनिबन्धत एव तनस्ततोऽवगम्यते।

तत्रासत्पदं स्वविद्यमानत्वमात्रेण शुक्तौ। न तु सर्वथा तत्र प्रतीयमानस्य रजतस्यान्यत्राप्यसिद्धया; अन्यथा शशविषाणादिसाधारणेऽसत्त्वे तत्र स्वीक्रियमाणे, द्वैतमते सादृश्यज्ञानादीनां रजतमात्रप्रतीतिनिर्वाहकाणां तदभ्युपगतानां नोपपत्तिरिति वैतथ्यप्रकरणं सम्यगालोच्यमानं द्वैतानां तदनन्यत्वाधिकरणसिद्धं तद्व्यतिरेकेणाभावरूपं मिथ्यात्वं गमयति। तेन च द्वैतानां परस्परं भेदः, द्वैतेश्वरयोर्भेदः, द्वैत-जीवयोर्भेदश्च बाधित[1] इति स्पष्टमवगम्यते; द्वैताधिष्ठानं चिन्मात्रमेव परमार्थमिति च, इति—

"मायामात्रमिदं सर्वमद्वैतं परमार्थतः"

इत्यागमप्रकरणगतश्लोको द्वैतिभिरन्यथा व्याख्यायमानो नोपपद्यते।

इदं हि—जीवानां जीवेश्वरयोश्च भेदो घटाकाशमठाकाशयोरिवौपाधिकः, स्वरूपतस्त्वभेद एवेति निरूपणार्थम्, अनेनोपाधिबाधेनौपाधिक एव बाधो जीवेश्वरयोः स्वरूपतस्त्वबाध इति च सूचनार्थम्।

"अनेनाद्वैतप्रकरणमपि व्याख्यातम्, तेन—मायामात्रमिदं सर्वमद्वैतं परमार्थतः" इति श्लोकप्रक्रान्तं परमार्थतोऽद्वैतत्वं जीवेश्वरविषयेऽपि व्यवस्थाप्यते।

अलातशान्तिप्रकरणगतोऽद्वैतवादो न सौगतानाम्

अनेनालातशान्तिप्रकरणमपि व्याख्यातम्। इदं हि प्रकरणम्—

भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि।
अभूतस्यापरे धीराः विवदन्तः परस्परम्॥

इत्यादिना द्वैतस्य सर्वस्याजातिम्, अनाशम्, किं बहुना? अजत्वमपि स्वभावतो न भवतीति ज्ञापयति। इदञ्च सांख्यानां सत्ख्यातिवादं नैयायिकानामारम्भवादञ्च निरस्य सद्विवर्तवाद एव प्रपञ्चस्योचित इति प्रतिपादयति।

अयं नार्थ आरम्भ-परिणामवादयोः सद्विवर्तवादभूमित्वम्—

"आरम्भवादः परिणामवादो विवर्तवादस्य च भूमिरियम्"

इति वार्तिकसिद्धान्तमूलः। स्पष्टश्चायमर्थः सदानन्दकृताद्वैतब्रह्मसिद्धौ प्रथममुद्गरे।

मित्रवरश्रीविधुशेखरभट्टाचार्यस्तु स्वीयागमप्रकरणे गौडपादकारिकाया अलातशान्तिप्रकरणं सर्वं सौगतमतमेवेत्युपपादयति, तत्रत्यानां मङ्गलश्लोकादिपदानां दर्शनात्, विशिष्य च बौद्धाभिमताजातिवादस्य विस्तरेण समर्थनाच्च। तत्र शब्दसाम्यं न सिद्धान्तैक्यप्रयोजकम्, किन्त्वर्थसाम्यमेव। प्रकृते तु नार्थसाम्यमिति भगवत्पादानामेतत्प्रकरणभाष्येण विशदमवगम्यते। सिद्धान्तसाम्यं त्वजातवादमवलम्ब्य भवति, न वेति स्वयं विमर्शनमर्हति। औपनिषदः सिद्धान्तो नाजातवादो न वा वैयासिकः, किं बहुना ? भगवत्पादीयोऽपि न स सिद्धान्तः।

तत्रोपनिषदः प्रतिवेदान्तं प्रायेण—"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति" इत्यादिना, ब्रह्मसूत्राण्यपि—"जन्माद्यस्य यतः" इत्यादिना सांख्यमतनिरासेन ब्रह्मण एव कारणत्वमिति व्यवस्थापनपराणि बहूनि, भगवत्पादभाष्यमपि तेषां सर्वेषां जगज्जन्मपरतयैव प्रवृत्तत्वादजातवादं स्वानभिमतं मन्यन्ते। सति चैवं गौडपादकारिकाया उपनिषद्विरुद्धार्थवर्णनम्, भगवत्पादानामपि स्वीयभाष्यान्तरविरुद्धार्थवर्णनं च चिन्त्यमूलमिति वक्तव्यम्। अतो गौडपादकारिकाया अजातशान्तिप्रकरणगताजातवादो बौद्धानामिति निगदव्याख्यातम्।

अजातवादस्य वेदान्ते ब्रह्मसूत्रादिना समर्थनम्

सत्यं वेदान्तवाक्यानि, ब्रह्मसूत्राणि, तत्र भगवत्पादभाष्यं च जगतो जन्मादिवादमुपपादयन्ति, परन्तु तदिदं तेषामजातवादस्य न विरुद्धम्। जगतो जातादिवादः स्वभावतः स्वभावेन जगदात्मना, तदजातवादस्तु स्वभावेन सद्रूपेण। द्विरूपं हि जगत्—कार्यात्मकम्, कारणात्मकं च। तत्र कार्यात्मना जगतो ब्रह्मणश्च कारणस्य परस्परं भेदः, कारणात्मना तु सदात्मना जगतोऽजातवादः। तदुक्तं भास्करेण स्वीये ब्रह्मसूत्रभाष्ये—

"कार्यात्मना तु नानात्वमभेदः कारणात्मना" इति। तत्र कार्यात्मना नानावादो जगतो मायापरिणामत्वमादाय, यदभिप्रेत्य सत्त्रैविध्यवादो भगवत्पादैर्मन्यते। यत्र भोक्तृभोग्यलक्षणो व्यावहारिको विभागः—"भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" इति सूत्रे वर्णितः। सदात्मनाऽजातवादस्तु सद्विवर्तनामा परमार्थतः सद्रूपव्यतिरेकेण कार्य-कारणविभाग-

विषयः, यत्र सद्व्यतिरेकेण कार्यं किमपि नास्ति। व्यक्तं चेदं "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यधिकरणभाष्ये—"अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितः। न त्वयं विभागः परमार्थतोऽस्ति, यस्मात्तयोः कार्य-कारणयोरनन्यत्वमवगम्यते। कार्यम् = आकाशादिकं बहुप्रपञ्चं जगत्, कारणम् = परं ब्रह्म, तस्मात् कारणात् परमार्थतोऽनन्यत्वम् = व्यतिरेकेणाभावः कार्यस्यावगम्यते। कुतः? आरम्भणशब्दादिभ्यः" इति। अत्र भामती—"तदनन्यत्वमिति नाभेदं ब्रूमः, किन्तु भेदं व्यासेधामः" इति व्याचष्टे। अतो ब्रह्मसूत्राणि तद्भाष्यं वा भगवत्पादानां न कार्याणां सद्भावेनाजातवादं निरुणद्धि, किन्तु स्पष्टं तं समर्थयति। ब्रह्मसूत्राणि तु वेदान्तवाक्यमूलानि, वेदान्तवाक्यव्याख्यानत्वादिति। सद्विवर्तवादमिमं श्रुत्यर्थोपबृंहणेन समर्थयन्ति तन्मूलानि वेदान्तवाक्यानि—'वाचारम्भणं विकारो नामधेयं, मृत्तिकेत्येव सत्यमित्यादि' इत्यादीनि। अत्र मृत्तिकापदं भिक्षुपादप्रसारणन्यायेन मुख्यं कारणं "सदेव सोम्येदमग्र आसीत्" इति प्रकृतसद्रूपपरमेव, इति सद्भावेन परमार्थत्वमजातवादम्, कार्यात्मना स्वरूपतोऽभावं च गोचरयति। अतः सदात्मना परमार्थत्वं तत्फलभूतोऽजातवादश्च स्पष्टमत्रावगम्यते।

अजातवादस्य मूलं सद्विवर्तवादः

गौडपादकारिकाऽप्यजातवादं परिणामवाददृष्ट्या, आरम्भवाददृष्ट्या चाजातवादं सांख्यानां वैशेषिकाणाञ्च परस्परविवादविषयमुपक्षिप्य तदुभयसम्मतमजातवादं सद्विवर्तवादावलम्बनेन साधयति। बौद्धानामजातवादः प्रपञ्चस्य स्वभावेन, न तु सद्भावेन सद्विवर्तवादपर्यवसायिना। तत्र गौडपादकारिकाऽलातशान्तिप्रकरणेऽजातवादं "सद्भावेन ह्यदं सर्वम्" इति सद्भावेन प्रतीति न तु स्वभावेन। पण्डितप्रवरश्रीविधुशेखरभट्टाचार्यास्तु "सद्भावेन ह्यदं सर्वम्" इति कारिकायाः स्वभावेनेदं सर्वमिति परिवर्तनेन गौडपादाचार्याणामपि बौद्धानामिव स्वभाववादः सम्मत इति सद्भावेनेति पदस्य स्थाने स्वभावेनेति पाठभेदमवलम्ब्य समर्थयन्ति। अतो गौडपादकारिकाया अजातवादो नानौपनिषदः, न वाऽऽस्तिकः, न वा भाष्यविरुद्ध इति निगदव्याख्यातम्। सर्वथा त्वद्वैतपदार्थः "मायामात्रमिदं सर्वमद्वैतं परमार्थतः" इति श्लोके द्वैतमिथ्यात्वपरमेव, न त्वन्यथाप्रत्ययादित्वपरं द्वैताभिमतम्। द्वैताभावश्च द्वैतस्य सत्त्वत्रैविध्यवादे परमार्थतो द्वैताभावमभिप्रेत्य, सद्विवर्तवादे तु सद्रूपेणाजातवादमभिप्रेत्यैव। यत्रैकसत्तावादः 'सन् घटः' इत्यादौ सत्तादात्म्यमात्रमभिप्रेत्य। इदमेवाभिप्रेत्य कृत्स्नप्रसक्त्यधिकरणे "श्रुतेस्तु शब्दमूलत्वात्" इति सिद्धान्तव्याख्यानावसरे भगवत्पादानां भाष्यम्—

"नह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते। नहि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति। अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते, पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणाममवतिष्ठते, वाचारम्भणमात्रत्वादविद्याकल्पितस्य नामरूपभेदस्य" इति।

"अतश्च न निरवयवत्वं ब्रह्मणो कुप्यति। न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था, तत्प्रतिपत्तौ फलानवगमात्। सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा; तत्प्रतिपत्तौ फलावगमात्" (भगवत्पादभाष्यम्) इति।

अत्र न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्थेति भाष्येण परिणामाख्यविकारप्रतिपादने न श्रुतीनां तात्पर्यम्, किन्तु परिणामश्रुतेरप्यपरिणामप्रतिपत्तावेव तात्पर्यावगमात् स्पष्टमजातवादं भगवत्पादाः समर्थयन्ति, किन्तु तत् सद्विवर्तवादमभिप्रेत्य, न तु व्यावहारिकभोक्तृभोग्यलक्षणविभागसहव्यवहारदशामभिप्रेत्य।

तदयमत्र निष्कर्षः—सृष्टिश्रुतयः, जन्मादिश्रुतयः, तत्पराणि ब्रह्मसूत्राणि, भगवत्पादभाष्यं च सत्तात्रैविध्यवादमभिप्रेत्य, गौडपादाभिमताजातवादस्त्वेकसत्तावादमाश्रित्येत्युभयस्य जगज्जातवादस्य जगदजातवादस्य च वेदान्तब्रह्मसूत्रतद्भाष्यादिभिर्न विरोधलेशः।

पुराणादावद्वैतवादः

अत्राद्वैतपदं बहुषु वेदान्तवाक्येषु द्वैतमिथ्यात्वमभिप्रेत्य प्रवृत्तमिति परीक्षितम्। पुराणेषु बहुष्वद्वैतवादो द्वैतमिथ्यात्वमभिप्रेत्य, तद् द्वैताभाववद्ब्रह्मपरमिति श्रीभागवतादिपर्यालोचनेनाद्वैततत्त्वशुद्धयादौ विवेचितम्। विशेषतो विष्णुपुराणगतस्य—

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्॥

इति वाक्यमवलम्ब्यैव।

गीतायामद्वैतवादः

भगवद्गीताऽपि नवमेऽध्याये—

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्॥

इति द्वैतवति ब्रह्मणि द्वैताभावरूपप्रपञ्चमिथ्यात्वनिरूपणमुखेन "नेह नानाऽस्ति किञ्चन" इति श्रुत्यर्थमुपपादयति। अतः प्रपञ्चमिथ्यात्वमभिप्रेत्यैवाद्वैतपदं द्वैतोपलक्षितब्रह्मपरम्, द्वैताभावात्मकब्रह्मपरं वा। तत्राद्ये द्वैताभावमात्रमतात्त्विकम्, द्वितीये तु द्वैताभावोऽपि ब्रह्मस्वरूपत्वात् तात्त्विक इति सिद्धम्।

द्वैतमिथ्यात्ववाद एवाद्वैतवादः, न तु द्वैताभिमतोऽन्यः

इदमेवाभिप्रेत्याद्वैतसिद्धिः—"अद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वाद् द्वैतमिथ्यात्वमेव प्रथमं प्रतिपादनीयम्" इति प्रस्तौति। अत्र "द्वैतमिथ्यात्वमेव" इत्येवकारेण द्वैतसत्यत्वं व्यावर्त्यते, यत्तु "यतो वा इमानि भूतानि जायन्ते" इत्यादिजगत्कारणब्रह्मपराणां वाक्यानां जगत्सत्यत्वं विना नोपपत्तिरिति भावेन द्वैतिनो मन्यन्ते, तत्र पूर्वोद्धृततदनन्यत्वाधिकरणकृत्स्नप्रसक्त्यधिकरणगतानां भाष्यवाक्यानां गौडपादीयप्रकरणचतुष्टयगतानां कारिकाणाञ्च पर्यालोचनेन सृष्टी जगज्जन्मादिवाक्यानां तात्पर्याभावावगमाच्चैषां मुख्यं तात्पर्यं द्वैतमिथ्यात्व एवेति भगवत्पादाशयः श्रीमधुसूदनसरस्वत्याद्वैतमिथ्यात्वमेव प्रथममुपपादनीयमिति वाक्येन सूच्यते। अनेनाभिधेयप्रधानाद्वैतसिद्धिर्भगवत्पादाभिमतं द्वैतमिथ्यात्वं प्रधानमवलम्ब्येति निरूपितम्।

अद्वैतसिद्धेर्लक्ष्यं द्वैतमिथ्यात्वमेव

अभिधानप्रधाना त्वद्वैतसिद्धिस्तामधिकृत्य निबद्धो निबन्धविशेषो न केवलं द्वैतमिथ्यात्वमात्रम्, किन्तु बहुप्रपञ्चकृतत्तत्क्रियाभेदान्, न्यायामृतादिनिरस्यमानान् तत्तन्मतनिरसनेन यथान्यायामृतक्रमं निरस्यति। अत्रैवकारपदेन द्वैताभिमतं ब्रह्मकारणताप्रयुक्तं जगत्सत्यत्वं वार्यते। द्वैतिनो हि "जन्माद्यस्य यतः" इति जगत्कारणत्वेन ब्रह्मणो लक्षणाद् ब्रह्मकार्यं जगत् सत्यमेव, न मिथ्येति मन्यन्ते।

इदमत्रालोचनीयम्—ब्रह्मकारणत्वप्रयुक्तं जगतः कार्यत्वमिव कथं तत्सत्यत्वमपीति। नहि कार्ये कारणभावः कार्य-कारणयोः सत्यप्रयुक्त इति—

> अन्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः।
> नान्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः॥

इति खण्डनखण्डखाद्ये विवेचयति।

न च जगतः सत्यत्वं प्रमाणावसेयम्। 'सन् घटः' इत्यादि प्रत्यक्षं प्रत्यक्षस्य वर्तमानग्राहित्वात् तात्त्विकं सत्त्वमेव गोचरयति। तत्तु सत्तात्रैविध्यवादे व्यावहारिकं यावद् घटादिकम्,

न त्वखण्डाकारज्ञानानन्तरकालिकमपि तत्। घटादीनां मिथ्यात्वं ह्यखण्डाकारसाक्षात्कार-प्रयुक्तं न तत्प्राक्कालिकसत्त्वेन विरुध्यते।

प्रत्यक्षस्य द्वैतमिथ्यात्वाविरोधः

प्रत्यक्षं कालान्तरे मिथ्यात्वं न गृह्णातीत्येतावता न प्रत्यक्षबाध्यत्वं मिथ्यात्वस्य; अन्यथा "स एष यजमानोऽञ्जसा स्वर्गं लोकं याति" इति श्रुत्या मरणानन्तरलोकान्तरगमनं श्रौतं देहात्मैक्यज्ञानेन प्रत्यक्षेण विरुद्धत्वादप्रमाणमापद्येत। शबरस्वामी तु शाबरभाष्ये आत्मवाद-प्रकरणे प्रत्यक्षश्रौतविज्ञानयोर्भिन्नविषयकत्वात् प्रत्यक्षेण नास्त्यागमबाध इति भाषते। "शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः" इति वेदान्तानां कर्माङ्गकर्तृप्रकाशकतयाऽप्रामाण्यमाशङ्क्य "अधिकोपदेशात्तु" इति सूत्रेण वेदान्तानामसंसार्यात्मपरत्वात्, कर्माङ्गस्य च जीवस्य संसारित्वाद् भिन्नविषयत्वेन नार्थवादत्वमिति विवेचितम्।

भाष्यकारोऽपि—"यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसम्बन्धमधिक्रियते; तथाप्यशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदं नाधिकारेऽपेक्ष्यते" इति कर्मकाण्ड-वेदान्तयोर्विषयभेदं व्यवस्थापयति। अयमेव न्यायः प्रत्यक्षावगतसत्यत्व-मिथ्यात्वयोरपि, मिथ्यात्वात् संसारित्वादेरिव भावित्वात् सत्त्वस्य चासंसारित्वादेरिवातत्कालिकत्वाच्च बाध्य-बाधकभावः।

प्रपञ्चसत्यत्वं हि सद्विवर्तवादे सत्तादात्म्यमात्रं 'सन् घटः' इत्यादिप्रत्यक्षावसेयं न मिथ्यात्व-विरोधि, किन्तु तदनुकूलमेव; अन्यथा सत्तादात्म्यमात्रेण सत्यत्वे प्रपञ्चस्य द्वैतमतेऽसत्ख्याति-वादे शुक्तिरूप्यादीनाम्, किं बहुना? शशशृङ्गादीनामपि सत्प्रतीतिस्वीकारात् सत्यत्वमापद्येत। अतः प्रपञ्चसत्यत्वे श्रुतिविरुद्धे न प्रत्यक्षप्रमाणेन मिथ्यात्वबाधः। श्रुतिरपि जगत्कारणत्वादिना यावत्कार्यसत्त्वमेव तस्य सत्त्वं गमयति, न तु तद्बाधदशायामपि। अतः प्रपञ्चमिथ्यात्वे प्रत्यक्षादिबाधशङ्काया अनवसरात् प्राधान्येन प्रपञ्चमिथ्यात्वस्य वेदान्तविषयत्वे न कापि बाधा।

किञ्च, मिथ्यात्वपरस्यागमस्य प्रत्यक्षेण विरोधः कथमिति विवेचनीयम्। तत्र तयोर्विरुद्ध-विषयत्वं नोपपद्यते। प्रपञ्चः सत्य इति ज्ञानं 'सन् घटः' इति ज्ञानमेव यदि, तर्हि तत् तेन सत्ता-दात्म्यस्यैवागमात् 'सदेवेदम्', 'अद्वितीयम्' इत्यध्यारोपापवादन्यायेन घटादेरध्यारोपितत्वस्य, अपवादस्य च निरूपणाद् न विरुद्धम्। ब्रह्म सप्रपञ्चमिति ज्ञानमध्यारोपसिद्धम्। तत्र प्रत्यक्षेण ब्रह्म सप्रपञ्चमिति यदि ज्ञानं स्यात्, तर्हि ब्रह्म निष्प्रपञ्चमिति ज्ञानस्य तेन विरोधः स्यात्। न च ब्रह्म सप्रपञ्चमिति कस्यापि ज्ञानं सम्भवति। तदुक्तं भाष्ये—

"ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणानर्थिकैव प्राप्ता ? न; इन्द्रियाविषयत्वेन सम्बन्धाग्रहणात् । स्वभावतो विषयविषयाणीन्द्रियाणि न ब्रह्मविषयाणि । सतीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा सम्बद्धं कार्यमिति गृह्येत । कार्यमात्रं तु गृह्यमाणं किं ब्रह्मणा सम्बद्धम्, किमन्येन केनचिद्वा सम्बद्धमिति न शक्यं निश्चेतुम् । अनेन स्पष्टमवगम्यते—ब्रह्म सप्रपञ्चमिति ज्ञानं न कस्यापीति, इति न प्रत्यक्षेण सप्रपञ्चत्वज्ञानेन ब्रह्मनिष्प्रपञ्चत्वज्ञानस्य श्रौतस्य बाधः । सन् घट इति हि ज्ञानं न ब्रह्म सप्रपञ्चत्वज्ञानम्, तत्तु बाधायां सामानाधिकरण्यात् प्रपञ्चमिथ्यात्वस्य साधकत्वेन, न बाधकम् ।

वस्तुतस्तु आगमस्य प्रत्यक्षेणान्येन वा प्रमाणेन विरोधशङ्का, तत्परिहारश्च पूर्वमीमांसायामर्थवादाधिकरणे सूत्रकारैस्तद्भाष्यकारादिभिश्च सम्यगेव विवेचितः । तत्र प्रपञ्चमिथ्यात्वसत्यत्वविषयेऽपि तेनैव न्यायेन गतार्थत्वान्न तच्छङ्का, परिहारो वा कर्तव्यः ।

प्रत्यक्षस्य श्रुतिबाधकत्वशङ्कापरिहारयोः पूर्वमीमांसामूलकत्वम्

तत्र हि "शास्त्रदृष्टविरोधाच्च" इति सूत्रेण शास्त्रविरोधेन, दृष्टविरोधेन, शास्त्रदृष्टविरोधेन चार्थवादानाम्—"न चैतद्विद्मो ब्राह्मणा वा स्मोऽब्राह्मणा वा" इति, "को हि तद्वेद यदमुष्मिंल्लोकेऽस्ति वा न वा" इत्यादावप्रामाण्यमाशङ्कितम् । अत्रापि वेदान्तानां प्रत्यक्षविरोधेनागमविरोधेनेव चाप्रामाण्यमाशङ्क्यते । तदर्थवादाधिकरणसिद्धान्तन्यायेनैवात्रापि परिहारः सम्भवतीति नात्र वेदान्तेषु प्रत्यक्षादिविरोधशङ्कापरिहारादिकं सप्रयोजनम् ।

तदीयसिद्धान्तन्यायो हि—"अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्यात् । शब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत" इति सूत्रसिद्धः । अयमत्र सूत्रार्थः—

याऽऽत्मवपोत्खेद मनस्तेय-वागनृतवादादिष्वनुपपत्तिरुक्ता, सा नात्र प्ररोचनार्थत्वपक्षे । तत्र स्तेयादेः प्रयोगेऽनुष्ठाने ह्यर्थवादानां विवक्षिते प्रत्यक्षतया तद्विरोधश्रुत्या विरोधः स्यात् । न चार्थवादरूपस्य शब्दस्यार्थस्त्वनुष्ठानरूपो दृश्यत इति । अनेनेदमवगम्यते—अनुष्ठापकयोर्निराकाङ्क्षवाक्यार्थयोर्विरोधेऽप्रामाण्यशङ्काऽवसरः, न तु निराकाङ्क्षवाक्यार्थनिष्पत्तेः पूर्वं पदार्थान्वयदशायां विरोधः किञ्चित्करः । तत्रार्थवादो विधिना पदैकवाक्यत्वेन प्रामाण्यात् पदस्थानीयः । अतः पदार्थान्वयदशायां तत्र विरोधो न किञ्चित्करः । सावकाश निरवकाशादिन्याया हि निराकाङ्क्षयोरेव प्रमाणयोर्विरोधशङ्कापरिहारार्थाः । न च प्रपञ्चमिथ्यात्वपरस्यागमस्य प्रपञ्चसत्यत्वपरस्य प्रत्यक्षादेरा-

गमस्य च विरोधो वाक्यार्थयोः। प्रपञ्चसत्यत्वपराणि हि 'सदेवेदम्' इत्यादि वाक्यानि सर्वाणि 'नेह नानाऽस्ति किञ्चन' इत्यादिनिषेधवाक्यापेक्षितप्रतियोगिसमर्पकत्वान्निषेधवाक्यपदस्थानानि न स्वयं निराकाङ्क्षवाक्यार्थपराणि। अतः पदस्थानीयेन सप्रपञ्चत्वपरेण वाक्येन तदप्रपञ्चत्वपरवाक्यार्थस्य न विरोधः। अतः प्रत्यक्षागमादिविरुद्धत्वात् प्रपञ्चमिथ्यात्वश्रुतिर्नान्यथा नयनमर्हति। अतोऽद्वैतपदार्थो बहुतरश्रुतिसिद्धः। माण्डूक्योपनिषत्सजातीयं तत्समानविषयं च "नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमव्यवहार्यमग्राह्यलक्षणाचिन्त्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवं चतुर्थं मन्यन्ते" इति रामतापनीयोपनिषद्याम्नायते। तत्र ह्येतद्वाक्यानन्तरमेव—"स आत्मा स विज्ञेयः सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्धुरो द्वैतरहित आनन्दरूपः" इति स्पष्टं द्वैताभावपरतयैवाद्वैतपदं श्रुत्यैव व्याख्यायते। अतो भगवत्पादाभिमतमद्वैतमुक्तश्रुतिसिद्धं द्वैताभाववद्ब्रह्मपरम्, यदेवाधिकृत्य "अथातो ब्रह्मजिज्ञासेति' शारीरिकमीमांसायां बादरायणाचार्येण सूत्रितम्।

ब्रह्मपदार्थो जिज्ञासासूत्रे मण्डनाभिमतो जीवात्मतत्त्वम्

अत्र ब्रह्मपदार्थो मण्डनाभिमतजीवाश्रयाज्ञानवादमनुसृत्य जीवात्मतत्त्वमेवेति भामती। तन्मते हि विशिष्टो जीवोऽहंपदार्थो बद्धः, अज्ञानोपहितं जीवात्मस्वरूपं कारणं तदनुपहितमात्मस्वरूपं शुद्धमिति सिद्धान्तबिन्द्वादौ निष्टङ्कितम्। विवरणमते तु यत्र मायाविशिष्टं ब्रह्म कारणम्, तत्प्रतिबिम्बो जीव इत्यादि मन्यते, तत्र 'जन्माद्यस्येति' सूत्रसिद्धं जिज्ञास्यं ब्रह्म जीवात्मतत्त्वातिरिक्तमेव।

जीवात्मतत्त्वब्रह्मपदार्थतायास्तैत्तिरीयोपनिषद्भाष्यमूलत्वम्

तत्र प्रथममतेऽज्ञानं जीवाश्रितं तदुपाधिर्वा, निमित्तकारणमात्रमज्ञानावरणेन प्रपञ्चात्मना ब्रह्मविवर्तमात्रतयोपपद्यते। द्वितीये तु यत्र मायायाः, ब्रह्मणः, उभयस्य चोपादानत्वम्? तत्र मायापरिणाम्युपादानम्, तदाश्रितं तद्विषयो वा ब्रह्म विवर्तोपादानम्।

अयमपरो विशेषः—यत्प्रथममतेऽन्तःकरणादिबाह्यप्रपञ्चान्तस्य सर्वस्याधिष्ठानमज्ञानोपहितं जीवात्मतत्त्वम्। द्वितीयमते तु मायाविशिष्टं जीवात्मतत्त्वतोऽतिरिक्तं ब्रह्मतत्त्वं सर्वप्रपञ्चाधिष्ठानं ततो विलक्षणम्। अस्य प्रस्थानद्वयस्य मूलं "तदधीनत्वात्" इति सूत्रगतम्—"अविद्यात्मिका हि बीजशक्तिः परमेश्वराश्रिता मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोध-

रहिताः शेरते संसारिणो जीवाः" इति भाष्यम्। तत्र "यदा तु जीवो महान्, तदाप्यव्यक्तत्वजीवभावस्य "महतः परममव्यक्तम्" इत्युक्तम्। "अविद्या ह्यव्यक्तम्" इति भाष्यम्। आद्यं भाष्यं द्वितीयस्य प्रस्थानस्य, प्रथमं तु मूलं द्वितीयस्येति विवेकः।

अत्रेदं मीमांस्यम्—ब्रह्ममीमांसायां जिज्ञास्यतया प्रथमसूत्रे विवक्षितं ब्रह्मस्वरूपं किं मण्डनाभिमतजीवात्मतत्त्वम्, उत पञ्चपादिकाभिमतब्रह्मतत्त्वमिति।

(i) अपरमत्र जिज्ञास्यम्—कं वाऽभिधेयं शारीरकपदस्याभिप्रेत्य ब्रह्ममीमांसाया अस्याः शारीरकमीमांसेति समाख्या।

(ii) अपरो विचारस्तु यद्यात्मतत्त्वातिरिक्तं ब्रह्मतत्त्वमभिप्रेत्य ब्रह्मजिज्ञासा, तर्हि कथमध्यासभाष्यस्य केवलमहमध्यासमात्रनिरूपणपरस्य ब्रह्ममीमांसया संगतिः? तथात्मतत्त्वमात्रजिज्ञासायां प्रस्तुतायामध्यासभाष्येणाहमध्यासमात्रं साधयित्वा "जन्माद्यस्य यतः" इति कथं जगत्कारणत्वेन ब्रह्मलक्षणम्? उभयत्रोपनिषदां ब्रह्मसूत्राणाञ्च कथमेकवाक्यता?

(iii) अद्वैतसिद्धेः स्वारस्यं किमात्मतत्त्वमात्रतात्मजिज्ञासायामुतान्यत्र, आहो उभयत्र।

ब्रह्मजिज्ञासायां प्रस्तुतं ब्रह्मतत्त्वं जीवात्मतत्त्वमात्रमपि, तदतिरिक्तं ब्रह्मतत्त्वमपि, परन्तु प्रस्थानभेदेन, अतः सर्वा शारीरिकमीमांसा, उपनिषदश्च केवलजीवात्मतत्त्ववाक्यपरतयाऽपि प्रस्थानभेदेन योजनमर्हन्ति।

शारीरकपदार्थः, शारीरकमीमांसापदस्वारस्यं च मण्डनमते

तत्र प्रथमे मते शारीरकपदार्थः शरीरे भवः शारीरः जीवात्मा, ततोऽज्ञातार्थे कन् प्रत्ययात् शारीरकपदं सन्दिग्धात्मतत्त्वपरमिति केवलजीवात्मतत्त्वसन्देहनिरासार्थं ब्रह्मजिज्ञासा। ब्रह्मपदेनापि जीवात्मतत्त्वमेव विवक्ष्यते। एतदेवात्र भामत्यपि—"अथ यदसंदिग्धम्प्रयोजनञ्च न तत्प्रेक्षावत्प्रतिपित्सागोचरः। यथा समनस्केन्द्रियसंनिकृष्टः स्फीतालोकमध्यवर्ती घटः, करटदन्ता वा। तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः। तथाहि—बृहत्त्वाद् बृंहणत्वाद्वाऽऽत्मैव ब्रह्मेति गीयते। स चायं आकीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेन्द्रिय-मनो-बुद्धि-विषयेभ्यो विवेकेनाहमित्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्धः, इति न जिज्ञासास्पदम्। न हि जातु कश्चिदत्र सन्दिग्धे—'अहं वा, नाहं वेति' इति। न च विपर्यस्यति—नाहमेवेति। न चाहं 'कृशः', 'स्थूलः', 'गच्छामि' इत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहा-

लग्नोऽयमहङ्कार इति साम्प्रतमित्या"दिना "न 'चाहम्' इति सर्वजनीनस्फुटान्तरानुभवसमर्थितात्मा देहेन्द्रियादिव्यतिरिक्तः शतस्य उपनिषदां सहस्रैरप्यन्यथयितुम्, अनुभवविरोधात्। न ह्यागमाः सहस्रमपि घटं पटयितुमीशते। तस्मादनुभवविरोधादुपचरितार्था एवोपनिषदः" इत्यन्तेन 'अहं'मध्यासमाक्षिप्य "इदमनाकूतमित्या"दिना "भवेदेतदेवं यदि 'अहम्' इत्यनुभव आत्मतत्त्वं प्रकाशेत। न त्वेतदस्ति। यथा हि समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयात्मतत्त्वं श्रुति-स्मृतीतिहास-पुराणेषु गीयते। न चैतान्युपक्रम-परामर्शोपसंहारैः क्रियासमभिहारेणेदृगात्मतत्त्वमभिदधति तत्पराणि सन्ति। शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्" इत्यादिना 'स्थूलोऽहम्', 'अन्धोऽहम्' 'गच्छामि' इत्यादयोऽप्यध्यासतया व्याख्याताः। तदेवमुक्तेन क्रमेणाहंप्रत्यये पूतिकूष्माण्डीकृते, भगवती श्रुतिरप्रत्यूहाकर्तृत्व-भोक्तृत्व-सुख दुःख शोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेधमर्हतीति सिद्धान्तयन्ती जीवात्मतत्त्वमेव ब्रह्मपदार्थ इति विवेचयति।

इदं हि जीवाश्रयोऽज्ञानमिति मण्डनसिद्धान्तम्, तदभिमतं विशिष्टोपहितानुपहितभेदभिन्नमात्मतत्त्वं मण्डनाभिमतं मूलीकृत्येति मण्डनपृष्ठसेवी वाचस्पतिः। अत्र विशिष्टं जीवमादाय पूर्वपक्षः, अनुपहितं संविन्मात्रमादाय सिद्धान्तः। "जन्माद्यस्य यतः" इति सूत्रम्, "यतो वा इमानि भूतानि जायन्ते" इत्याद्युपनिषच्छ्रोपहितं जीवात्मतत्त्वं कारणमभिप्रेत्य।

जीवात्मतत्त्वब्रह्मतायां तैत्तिरीयोपनिषत्तात्पर्यम्

एतन्मते हि "ब्रह्मविदाप्नोति परम्" इति ब्रह्मवल्ल्यामनुपहितं ब्रह्म प्रस्तुत्य, "तदेषाऽभ्युक्ता . सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्" इति सत्य-ज्ञानानन्तरूपेणानाद्यविद्याकल्पितभेदभिन्नेन जीवात्मतत्त्वमज्ञानोपहितं कारणत्वेन प्रस्तुत्य, तस्यैव "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः"इत्यादिना सर्वजगत्कारणत्वमुपक्षिप्य, तदेवाऽन्नमय प्राणमय-मनोमय-विज्ञानमयानन्दमयात्मना जाग्रत्स्वप्नविशिष्टाहमर्थजीवात्मनोपसंहृत्य, तदधिष्ठानतयाऽनुपहितं जीवात्मतत्त्वं 'ब्रह्मपुच्छं प्रतिष्ठेति" विविच्य, तदेव विपरीतक्रमेणानन्दवल्ल्यां "यतो वा इमानि भूतानि" इत्यनुकृष्यान्नमयादीनां तत्तत्कारणाद्यादिरूपमज्ञानोपहितकारणस्वरूपान्तं निष्कृष्य, तस्यापि "ब्रह्म पुच्छं प्रतिष्ठेति" सर्वाधिष्ठानतया प्रस्तुतेऽनुपहिते "ब्रह्मविदाप्नोति परम्" इति परमप्रकृते शुद्धे ब्रह्मणि पर्यवसानम्—"सैषा भार्गवी वारुणी विद्या। परमे व्योमन् प्रतिष्ठिता" इत्युपसंह्रियते।

इदं च पुच्छं ब्रह्म जीवात्मतत्त्वमेवेत्यानन्दमयप्रकरणान्ते "ब्रह्म पुच्छं प्रतिष्ठे"त्युपसंहारानन्तरं "तस्यैष एव शारीर आत्मा यः पूर्वस्य" इति वाक्येन जीवात्मतत्त्वमेवेति निर्णीयते।

तदनन्तरं "सोऽकामयत बहु स्यां प्रजायेय" इति, "ब्रह्म पुच्छं प्रतिष्ठा "इति नपुंसकब्रह्मशब्देन" प्रस्तुतस्यापि ब्रह्मणः 'सः' इति पुल्लिङ्गेन तच्छब्देनानुकर्षणाच्च जीवात्मतत्त्वातिरिक्तं ब्रह्मात्र मुख्यार्थं इति गम्यते। अतो "जन्माद्यस्य यतः" इति सूत्रस्य ब्रह्मलक्षणार्थं प्रवृत्तस्याप्यज्ञानोपहित-जीवतत्त्वविषयकत्वमेवेति प्रतीयते।

अत्र "सोऽकामयत" इत्यात्मतत्त्वं प्रकृत्य "इदं सर्वमसृजत यदिदं किञ्च" इति सर्वजगत्कारणत्वं यद्वर्णितम्, तदेव "तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। "स वा एष पुरुषोऽन्नरसमयः" इत्युपक्रमेऽपि ब्रह्मवल्ल्यामाम्नातम्। एवं चात्मतत्त्वस्यैव ब्रह्मपदार्थत्वमादाय तैत्तरीयोपनिषद् प्रवृत्ता, अध्यासभाष्यमपि। अयं चार्थो भगवत्पादानां दशश्लोक्यापि व्यक्तीक्रियते। इयमत्र दशश्लोकी—

दशश्लोक्या जीवात्मतत्त्वब्रह्मतायां मूलता

न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात् सुषुप्त्यैकसिद्धस्तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणा ध्यानयोगादयोऽपि।
अनात्माश्रयोऽहं ममाध्यासहानात् तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात् तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न सांख्यं न शैवं न तत्पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा।
विशिष्टानुभूत्या विशुद्धात्मकत्वात् तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न चोर्ध्वं न चाधो न चान्तर्न बाह्यं न मध्यं न तिर्यङ् न पूर्वाऽपरा दिक्।
वियद्व्यापकत्वादखण्डैकरूपस्तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न शुक्लं न कृष्णं न रक्तं न पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घम्।
अरूपं तथा ज्योतिराकारकत्वात् तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपञ्चः।
स्वरूपावबोधो विकल्पासहिष्णुस्तदेकोऽवशिष्टश्शिवः केवलोऽहम्॥
न जाग्रन्न मे स्वप्नको वा सुषुप्तिः न विश्वो न वा तैजसः प्राज्ञको वा।

अविद्यात्मकत्वात् त्रयाणां तुरीयस्तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥
अपि व्यापकत्वाद्धि तत्त्वप्रयोगात् स्वतस्सिद्धभावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत्समस्तं तदन्यत् तदेकोऽवशिष्टश्शिवः केवलोऽहम् ॥
न चैकं तदन्यद् द्वितीयं कुतः स्यात् न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात् कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ इति ।

अत्र हि "न भूमिर्न तोयमि"त्यादिना "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः"इत्यादिना पञ्चभूततादात्म्यं जाग्रदवस्थान्नमयस्वप्नावस्थ-प्राणमय-मनोमय विज्ञान-मयसुषुप्त्यवस्थानन्दमयातिरिक्तं सर्वाधिष्ठानमनुपहितमात्मचैतन्यं तत्तदुपाधिविविक्तसंविन्मात्र-स्वरूपेणानुसन्धीयते । तत्र "तदेकोऽवशिष्टश्शिवः केवलोऽहम्"इति, "तुरीयं शिवमद्वैतं चतुर्थं मन्यन्ते" इति माण्डूक्योपनिषदर्थस्तत्तदुपाधिव्यतिरिक्तात्मस्वरूपनिरूपणपरेण, अपरेण भागेन चानुसन्धीयते । तथा चात्मतत्त्वमनुपहितमेव सर्ववेदान्तसिद्धमिति भगवत्पादैः प्रतिपाद्यते । तदत्रान्तिमे श्लोके "न चैकम्"इति, "सर्ववेदान्तसिद्धं ब्रवीमि" इत्यवाङ्मनसगोचरत्वं प्रतिपाद्यते ।

अध्यासभाष्यमध्यहमध्यासनिरूपणमात्रेण तदतिरिक्तजगत्कारणत्वाध्यासानिरूपणेऽप्यात्मानं कृतकृत्यं मन्यते । तदतिरिक्तात्मतत्त्वमेव ब्रह्मतत्त्वमिति पक्षे तु जन्मादिसूत्रेणाध्यासभाष्यविषयस्य ब्रह्मणो लक्षणम्, अहमध्यासभाष्येण त्वहमध्यासमात्रनिरूपणमिति भिन्नवाक्यताऽध्यासभाष्य-लक्षणसूत्रयोरापद्येत । एवमध्यासभाष्येण सर्वजगदध्यासानिरूपणाज्जन्मादिसूत्रतद्विषयाः कारणवाक्यानि च न निर्विशेषपरतया व्याख्यानमर्हेयुः, इति जीव-ब्रह्मैक्यमेव शाङ्करमतेऽपि वेदान्तार्थः स्यादित्यद्वैतसिद्धान्तस्यौपनिषदत्वं मण्डनसिद्धान्ते भाष्याभिमत एव विश्वस्यते । इदमेव तत्त्वं मनसि निधायाद्वैतसिद्धिरपि निबन्धः—

"मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्य ज्ञान-सुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः ।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥"

इति मङ्गलश्लोकेनोपक्रमते ।

अद्वैतसिद्धिमङ्गलश्लोकस्य लघुचन्द्रिकादेश्च जीवात्मतत्त्वतायां मूलता

अयं हि श्लोको ब्रह्मानन्देन लघुचन्द्रिकायामेवं व्याख्यायते, विट्ठलेशेन च । तत्र ब्रह्मा-नन्दीयं व्याख्यानम्—

"विष्णुः व्यापकं जीवस्वरूपम्। मोक्षं प्राप्त इव स्वयं विजयते। कीदृशो विष्णुर्मोक्षं प्राप्त इव? अखण्डधीगोचर इति। संसर्गाविषयकमनोवृत्तिविशेषविषयीभूत इत्यर्थः। ननु तादृशधीविषयत्वे मोक्षप्राप्तिं प्रति नोद्देश्यतावच्छेदकत्वसंभवः; उद्देश्यतावच्छेदककालावच्छिन्नत्वस्य विधेयगतत्वेन व्युत्पत्तिसिद्धस्य प्रकृते बाधात्। यदा हि तादृशधीविषयीभूत आत्मा, तदा तस्य न मोक्षः; तस्याविद्यारूपबन्धशून्यात्मरूपत्वाभावात्।

अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः।
निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः॥

इति च। अविद्याया अस्तमयः संस्कारादिकार्यरूपेणाप्यनवस्थानात्। सा स्थूलरूपा संस्कारादिरूपा च। तथा च विदेहताकालीनोऽस्तमय एव मुख्यो मोक्षः। ज्ञातत्वोपलक्षित आत्मापि विदेहताकालीन एव। जीवन्मुक्तिकालीनस्य ज्ञातत्वोपहितत्वस्यापि कदाचित् संभवेन ज्ञातत्वेनोपलक्षितत्वस्य सर्वदाऽसंभवात्तदुपलक्षितस्यैव मोहनिवृत्तित्वम्, जीवन्मुक्तौ संस्कारादिरूपेण मोहसत्त्वात्, स्थूलाज्ञाननिवृत्तेस्तत्त्वज्ञानविशेषादिमनःपरिणामरूपतासंभवेन ज्ञातात्मरूपत्वासंभवाच्च। न चोक्तविषयत्वक्षण एव तादृशाविद्यास्तमयः संभवति; चरमधीरूपविद्यावतः क्षणस्याविद्या-तत्प्रयुक्तदृश्यविशिष्टकालपूर्वत्वाभावनियमेन सिद्धस्याविद्यास्तमयस्य विदेहताकालीनस्य विद्यावति क्षणे संभवाभावात्, अत आह—"मिथ्याबन्धविधूननेन विकल्पोज्झितः" इति। ब्रह्मात्मैक्याज्ञानरूपबन्धस्य तादृशास्तमयेन दृश्यशून्य इत्यर्थः। अत्र बन्धस्य मिथ्यात्वोक्त्या तदुच्छेदस्य ज्ञानाधीनत्वज्ञापनेन न ज्ञानोत्पत्तिकालीनत्वमिति ज्ञापितम्। तथा च उद्देश्यतावच्छेदककालावच्छिन्नत्वबोधस्यौत्सर्गिकत्वात् सर्गाद्यकालीनद्व्यणुकपक्षकजन्यतासम्बन्धेन कर्तृसाध्यकानुमितौ निरवच्छिन्ने कर्तरि विधेये तादृशकालावच्छिन्नत्वबोधवत् प्रकृतेऽपि तस्य बाधितत्वान्न तत्र तद्बोधः। अत्र बन्धविधूननमविद्यातत्कार्यशून्यत्वम्, दृश्यशून्यत्वमनादिसाधारणदृश्यशून्यत्वमिति तयोर्भेदः। विधूननेनेति तृतीया ज्ञापकहेतौ, न तु कारकहेतौ। नह्यविद्याया अस्तमयो नाम व्यावहारिकध्वंसरूपो विद्याजन्योऽस्मत्सिद्धान्ते स्वीक्रियते, दृश्यान्तरध्वंसो वा तज्जन्यः। तथा सति तस्य निवर्तकाभावेन "विद्वान्नामरूपाद्विमुक्तः" इत्यादिश्रुतिबोधितस्य विदुषि सर्वदृश्योच्छेदस्य बाधापत्तेः। तत्त्वज्ञानोत्पत्तिद्वितीयक्षणे हि तत्त्वज्ञानादिसर्वदृश्यनाशोत्पादाद्दुक्तक्षणद्वितीयक्षण उक्तनाशस्य नाशोत्पत्त्यसंभवः, तत्त्वज्ञानजन्यस्य नाशस्यैव तत्त्वज्ञाननाशहेतुत्वे स्वीकृतेऽप्युक्तबाधापत्तेस्तादवस्थ्यात्। तत्त्वज्ञानजन्यस्य दृश्यान्तरनाशस्य, तत्त्वज्ञानस्य च यौ नाशौ तयोर्नाशकाभावात्तयोः स्वनाशकत्व-

स्वीकारेऽप्युक्तापत्तितादवस्थ्यात्, अप्रामाणिकानन्तनाशकल्पने गौरवाच्च। तस्माच्चरमतत्त्वज्ञानस्य दृश्याश्रयकालपूर्वत्वाभावनियम एव स्वीक्रियते, न तु नाशहेतुत्वम्।

यत्तु बद्धपुरुषैः प्रातीतिकमस्तमयादिकं कल्प्यते, न तस्य नाशहेतुत्वम्। यद्यपि ज्ञापकहेतुत्वमपि दृश्यास्तमयं प्रत्यविद्यास्तमयत्वेन नास्ति; जीवन्मुक्ते प्रातीतिकाविद्यास्तमये तद्व्यभिचारित्वात्, जीवन्मुक्ते प्रातीतिकस्य दृश्यास्तमयस्य कल्पने नियमाभावात्; तथापि दृश्यास्तमयकालीनत्वरूपेणाविद्यास्तमयस्य दृश्यास्तमयं प्रत्यस्त्येवेति ध्येयम्।

अथवा माऽस्तु प्रातीतिकं तादृशाविद्यास्तमयादिकम्, अविद्योच्छेदोपलक्षितः पूर्णानन्दरूप आत्मा मोक्षः। अविद्योच्छेदश्च तदीयस्थूलसूक्ष्मरूपाश्रयकालपूर्वत्वाभावः सर्वदृश्याश्रयकालपूर्वत्वाभावरूपेण दृश्योच्छेदेन व्याप्यः; मोक्षस्य दृश्योच्छेदोपलक्षितात्मरूपकैवल्यरूपत्वात्।

यद्वा—ननु दृश्योच्छेदस्तत्त्वज्ञानोत्पत्तिक्षणे न संभवति; अनादिदृश्यानां ज्ञानानुच्छेद्यत्वात्, अविद्या-तत्कार्ययोरेव तदुच्छेद्यत्वात्। तत्राह—मिथ्याबन्धेति। मिथ्याबन्धविधूननेन विकल्पोज्झित इति योजना। तथा च अविद्योच्छेदेन दृश्योच्छेदव्याप्तिरित्यर्थलाभात्—अविद्योच्छेदस्य दृश्योच्छेदव्याप्यतालाभेनाविद्यारूपबन्धस्य मिथ्यात्वोक्त्याऽविद्याप्रयुक्तदृश्यमात्रस्य मिथ्यात्वलाभेनानादिदृश्यानामपि ज्ञानोच्छेद्यलाभादुक्तव्याप्यतायाः सम्भवः। तथा च सर्वदृश्योच्छेदोपलक्षितपरमानन्दरूपात्मरूपकैवल्यप्राप्तिस्तत्त्वज्ञानोत्तरमेव, न तत्क्षणे, इति नोद्देश्यतावच्छेदकधीविषयत्वकालीनत्वं विधेये मोक्षलाभे विवक्षितम्। उज्झित इति निष्ठाप्रत्ययेनोच्छेदस्यातीतकाले मोक्षप्राप्तेर्लाभादत्यन्ताभावत्वविशिष्टरूपस्योच्छेदस्यापि दृश्यत्वात्तादृशे मोक्षकाले तस्यातीतत्वादिति भावः।

मोक्षं कीदृशम्? तत्राह-परमेत्यादि। निरतिशयापरिच्छिन्नसुखमात्रस्वरूपमित्यर्थः। ननु मुक्तस्य प्रकाशकाभावेन प्रकाशत इत्यर्थकं विजयत इत्युक्तम्, तत्राह—स्वयमिति। प्रकाशसम्बन्धकं विनैवेत्यर्थः। नन्वेवं विजयत इत्यनुपपन्नम्; तस्यापि प्रकाशसम्बन्धार्थकत्वात्। स्वयमित्यस्य प्रकाशान्तरं विनेत्यर्थकत्वेन विजयत इत्यस्य स्वात्मप्रकाशसम्बन्धार्थकत्वेऽपि विष्णोर्दृश्यत्वेन मिथ्यात्वापत्तिः। अथ विजयत इत्यस्योत्कर्षान्तरमेवार्थः, न तु प्रकाशसम्बन्धः। तदा प्रकाशमानन्दरूपत्वालाभेन मोक्षस्य प्रयोजनत्वालाभः। तत्राह—सत्यज्ञानसुखात्मक इति।

यथात्मन आनन्दत्वेनानन्दरूपं मोक्षं प्राप्त इवेत्युक्तम्, अत एवानन्दावाप्तिबोधकश्रुतेरनावृतानन्दैक्यमर्थः, न त्वानन्दसम्बन्धः, तथा प्रकाशरूपत्वेन विष्णोः प्रकाशत इत्यस्यानावृतचिदभेदबोधकत्वम्, न तु प्रकाशसम्बन्धार्थकत्वम्। तथा च दृश्यत्वाभावान्न मिथ्यात्वापत्तिः।

न च प्रकाशरूपतोक्तिर्व्यर्थेति वाच्यम् ; अपरोक्षव्यवहारयोग्यसुखस्यैव पुरुषार्थत्वम्। उक्त-योग्यत्वं चानावृतचिद्रूपत्वेन तादृशचित्ताद्रात्म्येन वा। तथोक्तरूपानन्दस्यान्यथाभावेऽप्याद्य-भस्तीति ज्ञापनार्थत्वेन तस्याः सार्थक्यात्। ननु ज्ञानस्याज्ञानतत्कार्यविरोधितायाः शुक्त्यादिज्ञान-स्थले दृष्टतया शुक्तत्वेऽप्यनादिसाधारणदृश्यमात्रविरोधित्वमदृष्टत्वान्न युक्तम्, तत्राह—माये-त्यादि। मायया कल्पितं प्रयुक्तम्। अत एव मृषाभूतं यन्मातृतामुखं प्रमातृत्वादिरूपं द्वैत-मात्मभिन्नं तदभिन्नप्रपञ्चाश्रय इत्यर्थः। तथा च शुक्त्याद्यज्ञानस्यैव चिच्छिद्रत्वसम्बन्धादेरपि तत्प्रयुक्तत्वेन शुक्त्यादिज्ञानस्य तद्विरोधितायाः दृष्टतया ब्रह्मज्ञानस्यापि ब्रह्माज्ञानप्रयुक्तदृश्यमात्र-विरोधित्वं युक्तमिति भावः। मृषाद्वैतादिज्ञानस्य तद्विरोधितायाः दृष्टतया ब्रह्मज्ञानस्यापि ब्रह्मा-ज्ञानप्रयुक्तदृश्यमात्रविरोधित्वं युक्तमिति भावः। मृषाद्वैताश्रयत्वोक्त्या मुमुक्षात्वानधिकारी सूचितः। नन्वखण्डब्रह्माकारज्ञानस्य दृश्योच्छेदकत्वे आपातज्ञानरूपस्यापि तस्य तत्स्यात्, तत्राह—श्रुतिशिखोत्थेति। श्रुतीनां कर्मोपासनाकाण्डरूपाणामुपकार्यत्वेन शिखेव मुख्यम् यन्महा-वाक्यं तज्जनितेत्यर्थः। तथा च निष्कामकर्मोपासनानुष्ठानद्वारकचित्तशुद्धिनिसैरापताद्वारोक्ष-श्रुत्युपकृतवाक्यजन्यज्ञानस्यैव तदिति भावः।

अत्र विठ्ठलेशीयं विवरणं यथा—वयं तु विष्णुः जीवः वस्तुतः सत्यज्ञानसुखात्मकोऽपि सन् (अज्ञाते कन्) मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयो जातः, मुक्तोऽपि सन् अज्ञानेन बद्धत्वेन भ्रान्त इत्यर्थः। ततश्च वस्तुतो बद्धस्य तत्त्वेन भ्रान्तस्य मुमुक्षासंभवात् सः मुमुक्षुः सन् गुरुमनुसृतः, ततस्तदुपदिष्टश्रुतिशिखोत्थाखण्डधीगोचरोऽभूत्। निष्कामकर्मोपासनानुष्ठानेन शुद्धैकाग्रचित्तः सन् आत्मानं सत्यज्ञानसुखरूपब्रह्मत्वेन साक्षात्कृतवान्। ततश्च मिथ्याबन्धविधून-नेन विकल्पोज्झितो मिथ्याबन्धापगमात् तत्प्रयुक्तविकल्पेन दुःखेन रहितः सन् परमानन्दैक-तानात्मकं मोक्षं प्राप्त इव। अवास्तवसम्बन्धभ्रमस्यैव सत्त्वात्, मोक्षरूपस्य तत्सम्बन्धाभावादिवे-त्युक्तम्। ईदृशः सन् विजयते स्वप्रकाशरूपोत्कर्षवानित्यर्थः।

लघुचन्द्रिकादितात्पर्यनिष्कर्षो जीवात्मतत्त्वब्रह्मतायाम्

अयं हि श्लोकः—विष्णुः "ब्रह्मविदाप्नोति परम्" इति प्रस्तुतमनुपहितं शुद्धमात्मतत्त्वम्,-अनाद्यविद्याप्रयुक्तज्ञाताज्ञातविभागवत्सत्यज्ञानानन्तरूपमज्ञानोपहितं कारणस्वरूपतामापन्नम्, माया-कल्पितमातृताद्युपमृषाद्वैतप्रपञ्चाश्रयः, आकाशाद्यानन्दमयान्ततादात्म्यापन्नं जाग्रत्स्वप्नसुषुप्त्यवस्था-विशिष्टजीवात्मस्वरूपम्, अखण्डधीगोचरः, तदुपाध्याद्यविद्याध्वाने प्रमाणजन्यवृत्त्युपधानेना-

नाद्यविद्यानिवृत्त्या तत्प्रयुक्तज्ञाताज्ञातविभागशून्यम्, मिथ्याबन्धविधूननेन निष्कम्पोषितः अखण्डाकारवृत्त्याऽनाद्यज्ञाननिवृत्त्या विगलिततत्प्रयुक्तसर्वविकल्पहीनम्, तत एव मोक्षं प्राप्त इव मुक्तात्मस्वरूपं स्वयं विजयते। अनिर्वचनीयस्याज्ञानस्य तत्प्रयुक्तस्य चाभावेन ज्ञाताज्ञातविभागशून्यत्वेन प्रमाणव्यापारं विनैव स्वप्रकाशं भवतीति पूर्वोक्तं तैत्तिरीयमर्थमेव—संगृह्णाति। विष्णुपदेनात्मतत्त्वव्यतिरिक्तब्रह्मतत्त्वविवक्षायां मोक्षं प्राप्त इवेति नान्वितं स्यात्; बन्धस्य तत्राप्रसक्तत्वात्, इति पूर्वोक्तरीत्या माण्डूक्योपनिषदर्थस्यागमवैतथ्याद्वैतालातशान्तिप्रकरणचतुष्टयात्मकगौडपादकारिकोपबृंहितस्य जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयातीतात्मतत्त्वस्यैव तैत्तरीयोपनिषद्यपि प्रतिपादनान्माण्डूक्योपनिषदेकवाक्यताऽप्युक्तमङ्गलश्लोकस्य तैत्तरीयोपनिषदश्च सिद्धयति।

श्रुतिशिरोत्थाखण्डधीगोचर इति पदेनाखण्डार्थज्ञानस्य वेदान्तोत्थत्ववर्णनाच्छाब्दापरोक्षत्वं सूच्यत इव, परन्तु भामत्यभिमते शाब्दपरोक्षतावादेऽप्यभिहितान्वयेऽर्थजन्यत्वेऽपि शाब्दबोधस्य शब्दप्रयोज्यत्वमात्रेण शाब्दबोधव्यवहारवद् भामत्यभिमते शाब्दपरोक्षवादेऽपि ध्यानसहकृतमनोजन्यत्वेऽप्यखण्डाकारज्ञानस्य ध्यानस्य शब्दमूलकत्वाच्छाब्दिकत्वव्यवहार उपपद्यते। तत्रायं निष्कर्षः—भामतीमते निदिध्यासनमङ्गि, श्रवणमनने अङ्गे; प्रस्थानान्तरे श्रवणमङ्गि, मनननिदिध्यासने अङ्गे। मतद्वयेऽपि ब्रह्मणोऽखण्डाकारसाक्षात्कारो मोक्षसाधनमिति समानम्। अधिकं तृतीयपरिच्छेदसमालोचनावसरे व्यक्तीभविष्यति।

प्रश्नोपनिषदो जीवात्मतत्त्वब्रह्मतायां मूलता

तत्रालातशान्तिप्रकरणान्ते "नैतद् बुद्धेन भाषितम्" इति वर्णनात्तस्य सौगतसिद्धान्तपरत्वं भवतीति पण्डितप्रवरश्रीविधुशेखरशास्त्रिणां मतमिति केचनाक्षिपन्ति, परन्तु नात्र बुद्धपदं सौगतपरम्, किन्तु तत्त्वज्ञानिपरम्। तेनानुपहितमात्मतत्त्वमिदं प्रत्यस्तमितभेदं सन्मात्रं वाङ्मनसागोचरं संविन्मात्ररूपमवाच्यम्, लक्ष्यं वेत्येव बोध्यते, यदेव प्रश्नोपनिषदि षष्ठप्रश्नोपसंहारे "अवचनेन प्रोवाच" इति वक्तुमशक्यमित्येव विवदयते। अज्ञानादिसर्वबन्धनिवृत्तौ केवलचिन्मात्रे ज्ञाताज्ञातविभागशून्ये यत्र—

> न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
> न मुमुक्षुर्न वा मुक्तिरित्येषा परमार्थता॥

इति परमार्थतः सर्वाभावः प्रतिपाद्यते। इदमेव मूलीकृत्य—

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।

गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥

इति । न चात्र शशविषाणादिवदसत्त्वं द्वैतप्रपञ्चस्य मन्यते, किन्त्वविद्यानिवृत्त्या सर्वाभाव एव, शशविषाणादितुल्यत्वाभावात् । अतो "नैतद् बुद्धेन भाषितम्" इति वचनस्य प्रश्नोपनिषदः षष्ठप्रश्नेनैकवाक्यतया प्रश्नोपनिषदेकवाक्यताप्यनुपहितात्मपरमात्मतायामुपपद्यते ।

कठवल्ल्या जीवात्मतत्त्वब्रह्मतायां मूलता

कठवल्ली तु—

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः ॥

इति प्रश्नोत्तरं प्रकम्य विशिष्टं जीवस्वरूपं शरीरातिरिक्तमसंसार्यनुपहितमात्मतत्त्वञ्च—

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥

इत्याम्नाति । न चात्रासंसार्यात्मतत्त्वातिरिक्तं ब्रह्मतत्त्वम् । 'येयं प्रेते विचिकित्से'ति प्रश्नो हि जीवात्ममात्रविषयः, न तु तदतिरिक्तब्रह्मविषयः; "अन्यत्र धर्मादन्यत्राधर्माद्" इत्यस्यापि प्रकृतसंसार्यात्मतत्त्वस्यासंसारिस्वरूपत्वविवक्षायामेव तात्पर्यात्, अन्यथा "अन्यत्र धर्मादन्यत्राधर्मात्" इत्यस्य जीवात्मतत्त्वातिरिक्तब्रह्मपरतायामयं प्रश्नस्तुरीयः स्यात् । न च तुरीयः प्रश्नः कोऽपि स्वतन्त्रो नचिकेतोऽभिमतः । नचिकेता हि—

देवैरत्रापि विचिकित्सितं पुरा
न हि सुविज्ञेयमणुरेष धर्मः ।
अन्यं वरं नचिकेतो वृणीष्व
मा मोपरोत्सीरति मा सृजैनम् ॥

इति वरान्तराय बहुधा प्रलोभितोऽपि—

देवैरत्रापि विचिकित्सितं किल
त्वञ्च मृत्यो यन्न सुज्ञेयमात्थ ।

वरस्तु नास्य त्वादृशोऽन्यो न लभ्यः
नान्यो वर एतस्य तुल्यः कश्चित् ॥
न वित्तेन तर्पणीयो मनुष्यो
लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा ॥
जीविष्यामो यावदीशिष्यसि त्वं
वरस्तु मे वरणीयः स एव ॥

इति वरान्तरं प्रत्याचष्टे। सति चैवम्—"अन्यत्र धर्मादन्यत्राधर्मात्" इत्यत्र चतुर्थ-प्रश्नकल्पनायां प्रकरणविरोधोऽपि।

"आनुमानिकमप्येकेषाम्" इत्यधिकरणे भगवत्पादा अपि कठोपनिषदं सांख्यपरमाशङ्क्य "त्रयाणामेव चैवमुपन्यासः प्रश्नश्च" इति सूत्रेण प्रश्नत्रयोपपत्तिं तत्रोपपादयति। इदञ्च तत्रत्यं भाष्यम्—"इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वम्, ज्ञेयत्वं वा, यस्मात्त्रयाणामेव पदार्थानामग्नि-जीव-परमात्मनामस्मिन् ग्रन्थे कठवल्लीषु वरप्रदानसामर्थ्याद्वक्तव्यतयोपन्यासो दृश्यते" इति।

"तत्राग्निविषयक एकः प्रश्नः, द्वितीयस्तु जीवविषयकः, तृतीयस्तु परमात्मविषयः। प्रतिवचनमपि—

लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्वा यथा वा ॥

इत्यादिनाऽग्निविषयम्,

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।
यथा च मरणं प्राप्य आत्मा भवति गौतम ॥
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथाश्रुतम् ॥

इति व्यवहितं जीवविषयम्—

"न जायते म्रियते वा विपश्चित्" इत्यादि बहुप्रपञ्चं परमात्मविषयं निर्दिश्यते। नैवं प्रधान विषयः प्रश्नोऽस्ति, अतोऽपृष्टत्वादनुपन्यसनीयत्वं तस्येति।

अत्राह—योऽयमात्मविषयः प्रश्नः "येयं प्रेते विचिकित्सा मनुष्येऽस्ति" इति, किं स एवायम्—"अन्यत्र धर्मादन्यत्राधर्मात्" इति पुनरनुकृष्यते, किं वा ततोऽन्योऽयमपूर्वः प्रश्न

उत्थाप्यत इति । किञ्चातः ? स एवायं प्रश्नः पुनरनुकृष्यत इति यद्युच्येत, द्वयोरात्मविषययोः प्रश्नयोरेकतापत्तेरग्निविषय आत्मविषयश्च द्वावेव प्रश्नौ, इत्यतो न वक्तव्यं त्रयाणां प्रश्नोपन्यासाविति । अथान्योऽयमपूर्वः प्रश्न उत्थाप्यत इत्युच्येत, ततो यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोषः, एवं प्रश्नव्यतिरेकेणापि प्रधानोपन्यासकल्पनायामदोषः स्यादिति ।

अत्रोच्यते—नैवं वयमिह वरप्रदानव्यतिरेकेण प्रश्नं कञ्चित् कल्पयामः; वाक्योपक्रमसामर्थ्यात् । वरप्रदानोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्रवृत्तिराऽऽसमाप्तेः कठवल्लीनां लक्ष्यते । मृत्युः किल नचिकेतसे पित्रा प्रहिताय त्रीन् वरान् प्रददौ । नचिकेताः किल तेषां प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्याम्, तृतीयेनात्मविद्याम् । तत्र यदि "अन्यत्र धर्मात्" इत्यन्योऽयमपूर्वः प्रश्न उत्थाप्येत, ततो वरप्रदानव्यतिरेकेणापि प्रश्नकल्पना स्यात् ।

ननु प्रष्टव्यमेतत्—अपूर्वोऽयं प्रश्नो भवितुमर्हति । पूर्वो हि प्रश्नो जीवविषयः "येयं प्रेते विचिकित्सा मनुष्येऽस्ति नास्ति" इति विचिकित्साभिधानात् । जीवश्च धर्मादिगोचरत्वाद् न—"अन्यत्र धर्मात्" इति प्रश्नमर्हति । प्राज्ञस्तु धर्माद्यतीतत्वात् "अन्यत्र धर्मात्" इति प्रश्नमर्हति । प्रश्नच्छाया च न समाना लक्ष्यते; पूर्वस्यास्तित्व-नास्तित्वविषयत्वाद् उत्तरस्य धर्माद्यतीतवस्तुविषयत्वात् । तस्मात् प्रत्यभिज्ञानाभावात् प्रश्नभेदः, न पूर्वस्यैवोत्तरत्रानुकर्षणमिति चेत्, न; जीव-प्राज्ञयोरेकत्वाभ्युपगमात् । भवेत् प्रष्टव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञात् स्यात्, न त्वन्यत्वमस्ति "तत्त्वमसि" इत्यादिश्रुत्यन्तरेभ्यः । इह च "अन्यत्र धर्मात्" इत्यस्य प्रश्नस्य प्रतिवचनं "न जायते म्रियते वा विपश्चित्" इति जन्म-मरणप्रतिषेधेन प्रतिपाद्यमानं शारीरपरमेश्वरयोरभेदं दर्शयति । सति हि प्रसङ्गे प्रतिषेधो भागी भवति । प्रसङ्गश्च जन्म-मरणयोः शरीरसंस्पर्शाच्छारीरस्य भवति, न परमेश्वरस्य ।

यत्तु प्रश्नच्छायावैलक्षण्यमुक्तम्, तददूषणम्; तदीयस्यैव विशेषस्य पुनः पृच्छ्यमानत्वात् । पूर्वत्र हि देहादिव्यतिरिक्तस्यात्मनोऽस्तित्वं पृष्टम्, उत्तरत्र तु तस्यैवासंसारित्वं पृच्छ्यत इति । अनेन चेदमवगम्यते—जीवस्यैवोपहितानुपहितभेदेन भेदं गृहीत्वाऽनुपहितमात्मतत्त्वमेव कठवल्लीप्रतिपाद्यमिति ।

अत्राधिकरणभाष्यं जीवात्मतत्त्वप्रज्ञतायां मूलम्

"अत्ता चराचरग्रहणात्" इत्यत्र—

यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः॥

इत्यत्र कठवल्ल्यां प्रतिपाद्यमानोऽत्ता संहर्ता, न तु भोक्ता जीवोऽन्यो वेति सिद्धान्तितम्। तत्र हि वाक्ये सः अत्ता यत्र तत्र सुविज्ञेयमिति प्रतिपादनात् सृष्टि-स्थिति-संहारकर्तृत्वानोपहितं कारणमात्मतत्त्वमपि विशिष्टो जीव इवानुपहित आत्मतत्त्वे पर्यवस्यतीति शाप्यते। तच्चानुपहितमसंसार्यात्मतत्त्वमेवेति तत्रापि व्यक्तम्।

गुहां प्रविष्टावित्यधिकरणभाष्यं जीवात्मतत्त्वब्रह्मतायां मूलम्

"गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" इतिसूत्रव्याख्यानावसरेऽपि विज्ञानात्म-परमात्मानाविहोच्येयातामिति सिद्धान्तं प्रस्तुत्य, तयोः परस्परविलक्षणत्वात् संसारित्वा-संसारित्वयोर्जीवपरमात्मनोश्छायातपवद् वैलक्षण्यमुक्तम्। अधिकमन्यत्र। सर्वथा कठवल्ल्या अप्यनुपहितजीवात्मतत्त्वपरमात्मतायामेव तात्पर्यम्।

एतन्मते हि जीवेश्वरपरमात्मनां पक्षान्तरे जीवात्मेश्वरशुद्धब्रह्मस्वरूपाणामिव भेदाभेद-व्यवस्था स्थिरम्। तत्र प्रथममते जीवेश्वरयोर्भेदो घटाकाश-मठाकाशयोरिव। अभेदस्तु तयोरेव विगलितोपाध्योरिव। विशिष्टानुपहितात्मनोरुपहितानुपहितात्मनश्चोपाधितदभावाभ्यां भेदा-भेदौ; यथा घटाकाश-महाकाशयोर्मेदामण्डपाकाश-महाकाशयोः। उपाधिसम्बन्धेन तयोर्भेदः, तदभावे त्वभेदः।

गौडपादकारिका-माण्डूक्य-बृहदारण्यकादीनां जीवात्मतत्त्वब्रह्मतायां मूलता

गौडपादकारिकाया अद्वैतप्रकरणममुमर्थमुपबृंहयति। अत्र "तत्त्वमसि" इति वाक्यार्थोऽपि विशिष्टं जीवमुद्दिश्य अनुपहिताभेदवर्णनं प्रथमे विशेषणत्यागमात्रेण, अन्यत्र तूभयत्रापि विशेषणत्यागेनेति त्वन्यदेतत्। माण्डूक्य कठवल्ली-तैत्तिरीयोपनिषच्छान्दोग्योपनिषदामप्यत्रैव तात्पर्यमुपगम्यते।

तत्रापि "सदेव सोम्येदमग्र आसीत्" इति सद्रूपं कारणं प्रस्तुत्य, "अनेन जीवेनात्मनानु-प्रविश्य" इति तस्य विशिष्टजीवात्मनाऽभेदं परामृश्य "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" इति सत्पदार्थमात्मस्वरूपतया निष्कृष्य 'तत्त्वमसि' इति नवकृत्वोऽभ्यस्यते।

बृहदारण्यकोपनिषत्तु—"तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयः" इति पुत्रादिभ्यः प्रेमास्पदत्वमहमर्थस्यात्मनः प्रस्तुत्य "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्युपक्रम्य—"न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति। आत्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि अरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं भवति।" इत्यनुपहितमात्मतत्त्वमेव प्रतिपादयतीति वाक्यान्वयाधिकरणे शारीरिकमीमांसायां व्यवस्थापितम्। तत्र हि पुत्र-वित्तादिकं भोग्यजातं सर्वं वित्तमात्मार्थतया भवतीति वर्णनाद्भोक्तैवात्माऽहमर्थः प्रतीयत इति पूर्वपक्षयित्वा परमात्मोपदेश एवायमिति परमात्मैवात्रात्मेति सिद्धान्त्यते। तत्र जीवात्मविषयतया पूर्वपक्षः, परमात्मविषयतया च सिद्धान्त इति स्वीकारे प्रश्नोत्तरयोर्वैयधिकरण्यमापद्येत। अतो जीवस्यैव संसारित्वासंसारित्वविशेषकृतं भेदमादाय पूर्वोत्तरपक्षाविति वक्तव्यम्। अतो वाक्यान्वयाधिकरणं तदुपपादयति बृहदारण्यकोपनिषच्च न जीवात्मतत्त्वातिरिक्तं किमपि सूचयति। किं बहुना? "अथातो ब्रह्मजिज्ञासा" इति प्रस्तुतं ब्रह्म पूर्वोक्तैः कारणैरज्ञानोपधानेन कारणात्मतया प्रस्तुत्य, "आनन्दमयोऽभ्यासात्" इत्यानन्दमयाधिकरणेनानुपहितासंसार्यात्मतत्त्वमेव तद् ब्रह्मेति परामृश्य प्रथमाध्याये प्रथमपाद इन्द्रप्रतर्दनाधिकरणे "मामेवानुविजानीहि" इत्यादौ मांपदार्थतया विज्ञेयमात्मतत्त्वं "शास्त्रदृष्ट्या तूपदेशो वामदेववदि"ति शास्त्रजन्याखण्डाकारप्रत्ययवेद्यमनुपहितमात्मतत्त्वमेवेत्युपसंहरति।

ब्रह्मसूत्रभाष्यभागान्तरमपि जीवात्मतत्त्वब्रह्मतायां मूलम्

"शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः" इति सूत्रोपक्षिप्तं वेदान्तानां कर्माङ्गकर्तृस्तावकतयाऽर्थवादत्वम्, "अधिकोपदेशात्तु" इति सूत्रेणासंसार्यात्मतत्त्वस्यैव वेदान्तप्रतिपाद्यत्वादनवसरं सूचयन् सूत्रकारो जीवात्मतत्त्वमेवानुपहितं सर्ववेदान्ततात्पर्यविषयं सूचयतीति प्रागुक्तम्।

मुक्तात्मस्वरूपप्रकरणं जीवात्मतत्त्वब्रह्मतायां मूलम्

"सम्पद्याविर्भावः स्वेन शब्दात्" इति स्वेन रूपेणाभिनिष्पत्तिं मुक्तस्य प्रतिज्ञाय, कथं पुनर्मुक्त इत्युच्यते? इत्याशङ्क्य, नैष दोषः; यत आत्मैवात्र ज्योतिश्शब्दात् प्रकरणे ग्रहीतुं शक्य इति प्रतिपादितम्। अन्यान्यपि सूत्राणि तद्भाष्याणि, तत्तदुपनिषद्वाक्यानि चानुपहितस्य जीवात्मतत्त्वस्यैव परब्रह्मरूपत्वमवगमयन्तीति स्पष्टं तत्र तत्रोल्लिखितम्।

"अथातो ब्रह्मजिज्ञासा" इति ज्ञेयं ब्रह्म प्रस्तुत्य तस्य जगत्कारणत्वं लक्षणमुक्त्वा "जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च" इति मोक्षमाणसाम्यलिङ्गेन मुक्तामुक्तस्वरूपोपसंहारेण च ब्रह्मसूत्राणां सविशेषब्रह्मवाद एव तात्पर्यमिति शङ्का तु जगत्कारणत्वस्याक्षेपत्वात्कारणवाक्यानां सर्वेषामध्यारोपापवादन्यायेन निर्विशेषब्रह्मावबोध एव तात्पर्यमिति, जगद्व्यापारवर्जमिति सगुणोपासनफलैश्वर्योपसंहारात्, ब्रह्मज्ञानफलस्य साम्यापत्तिमात्र इत्यादिनाऽनुपदिष्टात्मस्वरूपमात्रतया निर्देशेनोपसंहाराच्च न सूत्राणामुपक्रमोपसंहारादिभिः सविशेषे पर्यवसाने तात्पर्यमुन्नेतुं शक्यम्।

लघुचन्द्रिकातात्पर्यनिष्कर्षः

लघुचन्द्रिका हि "अद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात्" इत्येतद्व्याख्यानावसरे सर्वकार्योपादानत्वबोधकश्रुतेरपि लक्षणवाक्यविधया निःश्रेयससाधननिर्विकल्पज्ञानजनकत्वेऽपि तत्र तादृशनिश्चयस्य सर्वद्वैततादात्म्यविशिष्टधीपूर्वकत्वात्, सर्वतादात्म्यस्यैव ब्रह्मणि सर्वविषयकत्वरूपत्वात्, सर्वोपादानत्वस्य ब्रह्मणि स्वात्मकसर्वजनकरूपत्वात्, "एकमेवाद्वितीयम्" इति, "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपम्" इति श्रुतिद्वये लक्षणादिवृत्त्या द्वैतवत्परब्रह्मनिष्ठस्वावच्छिन्नवृत्तिकअन्यतररूपत्रैकालिकत्वविशिष्टात्यन्ताभावस्य प्रतियोगि द्वैतमिति धीरूपो मिथ्यात्वनिश्चय इत्युपपादनेन जगत्कारणत्वं ज्ञेयस्योपास्यस्य वा ब्रह्मणो न स्वरूपमिति ज्ञाप्यते; अन्यथा जगत्कारणत्वस्यापि स्वरूपलक्षणत्वे "जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च" इति मुक्तस्यात्मनस्तत्क्रतुन्यायेन जगद्व्यापारोऽपि स्यात्, इति तन्निषेधो नोपपद्यते। अत एव "विकारावर्ति च तथा हि स्थितिमाह" इत्यनेन यथा न निर्विकारं रूपमितरालम्बनाः प्राप्नुवन्ति, यथा परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठन्ते, एवं सगुणेऽपि निरवग्रहैश्वर्यमनवाप्य सावग्रह एवावतिष्ठन्त इति सावग्रहैश्वर्यप्रतिपादनं मुक्तस्येति प्रतिपादनमुपपद्यते। ज्ञेयस्वरूपान्तर्गतत्वे तु जगद्व्यापारस्य सगुणोपासकस्यापि तद्भावापत्तौ जगद्व्यापाराद्यापद्येत। अतः सृष्टिवाक्यानां सृष्टौ न तात्पर्यम्, किन्तु निर्विशेषवाक्यशेषतया तटस्थलक्षणविधया, अध्यारोपापवादविधया च निर्विशेष एव पर्यवसानम्।

आनन्दमयाधिकरणादिकमपि जीवात्मतत्त्वब्रह्मतायां मूलम्

आनन्दमयाधिकरणोपक्रमे हि भगवत्पादानामिदं भाष्यम्—"द्विरूपं हि ब्रह्मावगम्यते—नामरूपविकारभेदोपाधिविशिष्टम्, तद्विपरीतं च सर्वोपाधिविवर्जितम्" इति द्विरूपं ब्रह्म प्रस्तुत्य "तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकभावलक्षणः सर्वो व्यवहारः। तत्र कानिचिद् ब्रह्मण उपासना-

न्यभ्युदयार्थानि कानिचित् क्रममुक्त्यर्थानि, कानिचित् कर्मसमृद्ध्यर्थानि। तेषां गुणविशेषोपाधिभेदेन भेदः। एक एव तु परमात्मेश्वरस्तैस्तैर्विशेषैर्विशिष्ट उपास्यो यद्यपि भवति; तथापि यथागुणोपासनमेव फलानि भिद्यन्ते" इत्युपासनाप्रकरण एव गुणानां विवक्षा, ज्ञानप्रकरणे तु सद्योमुक्तिकारणमात्मज्ञानमुपाधिविशेषैरुपदिश्यमानमप्यविवक्षितोपाधिसम्बन्धम्, ज्ञानप्रकरण उपाधिविशेषाणां गुणविशेषाणां वाऽध्यारोपापवादन्यायेनैवाविवक्षेत्युपसंहरति। अतः कारणवाक्यानां पर्यालोचनया ब्रह्मणः सप्रपञ्चत्वं न सत्यमिति वक्तुं शक्यते, प्रत्युत तन्मिथ्यैव। अतोऽद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वाद् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयमित्युक्तम्। उपासनापरेषु वाक्येषूपासनोपयोगितया फलविशेषसाधकतया निर्दिष्टा गुणा आहार्यारोपविषयत्वाद् वाग्धेन्वादिवत् सत्या न भवितुमर्हन्ति। वेदान्तानामर्थवादत्वमिति वदन्तोऽपि मीमांसकाः सगुणस्य, निर्विशेषस्य वा ब्रह्मणोऽज्ञातोऽप्युपासनपरत्वं स्वीकुर्वन्ति। श्रीभाष्यकारादयो भगवत्पादाश्च समन्वयाधिकरणे तदसहत्वमसहमानास्तन्मतं निरस्यन्ति।

पदार्थतत्त्वनिर्णयकारा द्वितीयपरिच्छेदोपक्रमे मीमांसकानां निर्गुणोपासनमपि सम्मतम्, परन्तु तदसत्यत्वमात्रं तत्र विशेष इति वदन्तो भगवत्पादानां श्रीभाष्यस्य वा पूर्वपक्षमनुगच्छन्ते। अतो जगतः सत्त्वे जगत उपास्यकोटौ प्रवेशेऽध्यारोपापवादन्यायेन ज्ञेयकोटौ प्रवेशने न सत्यत्वमवधातुं शक्यते। तदेवं जीवात्मतत्त्वमेव ब्रह्ममीमांसायां ज्ञेयतया प्रतिज्ञातमिति मण्डनसिद्धान्तं वाचस्पतिसिद्धान्तं वाऽवलम्ब्याद्वैतसिद्धिः प्रवर्तते मङ्गलश्लोकपर्यालोचनयेति। न चैतावता प्रस्थानान्तरे तेषामनादरः। तदपि हि शाब्दापरोक्षवादादिप्रसङ्गेन ब्रह्माज्ञानाश्रयत्ववादादिसमर्थनेन च तत्र सम्भोपपाद्यते। तथाप्यादरातिशयः मण्डनसिद्धान्त इति प्रतिभाति।

शारीरकमीमांसापदस्य मण्डन-विवरणमतद्वयाविरोधः

शारीरकमीमांसेति ब्रह्ममीमांसानामापि जीवात्मतत्त्वपरमात्मतामात्रे स्वरसम्, अज्ञातार्थे कन्प्रत्ययेन शारीरस्यैव सन्दिग्धस्यात्र जिज्ञासनात्। प्रस्थानान्तरेऽपि शारीरकपदं शरीरपदस्योपाधिपरत्वान्मायोपहितब्रह्मपरतया योजयितुं शक्यम्, न चात्र श्रीभाष्याद्यभिमतशरीरशरीरिभावेन शारीरपदव्युत्पत्तिः सम्भवति; तदभिमतस्य शरीरलक्षणस्य दुर्निरूपत्वात्, तस्यान्तर्यामिब्राह्मणादावुपाधिपरतया युक्तत्वसमर्थनाच्चेत्यद्वैततत्त्वशुद्धौ रामानुजशृङ्गभङ्गादिसमालोचनेन विवेचितम्। सोपाधिकब्रह्मपरत्वेऽपि शारीरकपदस्य कन्प्रत्ययस्तु वेदान्तानां सविशेषपरत्वं वा निर्विशेषपरत्वं वेति सन्देहनिवारणार्थतयोपपद्यते। अतः शारीरकमीमांसेति समाख्या प्रस्थानद्वयस्याप्यनुगुणा। - -

अध्यासभाष्यस्य मण्डनमते स्वारस्यम्

अनाध्यासभाष्यं साक्षाद्ब्रह्मात्मतत्त्वपरमात्मताप्रस्थान एवानुगुणम्; तथापि तदुपलक्षणं सर्वप्रपञ्चाध्यासज्ञापीति शारीरकमीमांसाभाष्यवार्त्तिके विवेचितम्। अतः प्रस्थानान्तरेऽपि "जन्माद्यस्य यतः" इति जगत्कारणत्वद्वारा निर्विशेषब्रह्मलक्षणं पूर्वोक्तरीत्या न दुष्यति।

तत्र प्रस्थानद्वयेऽपि ब्रह्मजिज्ञासापरत्वाद् गुणविशेषाणां तत्र तत्र तद्द्वारतया विवक्षितानामध्यारोपं विना नोपपत्तिः। अतः पक्षद्वयेऽप्युपोद्घाततयाऽध्यासभाष्यं प्रवृत्तम्। "सूचनात् सूत्रमुच्यते" इति वचनाद् ब्रह्मशब्देन निर्विशेषपरेण सूचितोऽध्यासोऽपीत्यध्यासभाष्यस्यापि सूत्रारूढत्वम्। तत्राप्यध्यासभाष्यस्य पूर्वपक्षेणोपक्रमस्तु—"आक्षिप्य भाषणाद्भाष्यम्" इति काव्यमीमांसागतं भाष्यलक्षणं मूलीकृत्य, अथवाऽध्यासभाष्यस्यापि जिज्ञासाधिकरणवर्गकविशेषपरत्वात् वर्णकस्याप्यधिकरणवत् पञ्चावयवकत्वात् पूर्वपक्षभाष्यमत्र संगतम्।

इदमत्राध्यासभाष्यम्—"युष्मदस्मत्प्रत्ययगोचरयोर्विषय-विषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां चाध्यासो मिथ्येति भवितुं युक्तम्; तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्म-धर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदं' 'ममेदमि'ति नैसर्गिकोऽयं लोकव्यवहारः" इति।

अत्राहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इति पूर्वपक्ष-सिद्धान्तयोः समानम्। तत्र पूर्वपक्षेऽहमर्थोऽखण्डो मुख्यात्मा, सिद्धान्ते संविन्मात्रं मुख्यात्मा, आत्मानात्मसंवलितोऽहमर्थोऽध्यस्तो मिथ्यात्मेति विवेकः। अध्यासाक्षेपः—सिद्धान्तसिद्धमात्मानात्मसंवलितं रूपमादाय तदसम्भवपरम्। अस्मत्प्रत्ययविषयः संविन्मात्रम्, युष्मत्प्रत्ययविषयोऽनात्मान्तःकरणादिकञ्चाहमर्थान्तर्गतरूपद्वयम्।

अत्राध्यासभाष्ये पूर्वपक्षे "युष्मदस्मत्प्रत्ययगोचरयोर्विषय विषयिणो"रित्यत्र गोचरयोर्विषयविषयिणोरिति गोचरत्वं विषयित्वञ्च संविन्मात्रस्य स्वप्रकाशत्वेन विषयत्वफलव्याप्यत्वाभावेन च, इदमेवाभिप्रेत्य तत्त्वप्रदीपिकादौ स्वप्रकाशत्वलक्षणविचारः सावसरः। इदन्तु अद्वैतसिद्धावपि जडत्वनिरुक्तिप्रकरणे व्यतिरेकविधया, द्वितीयपरिच्छेदे साक्षाच्च समालोचितम्।

अध्यासभाष्यार्थनिष्कर्षः

अत्र विषयिपदेन संवित्स्वप्रकाशत्वबोधनात्तस्याज्ञातत्वाभावात्किञ्चिद्रूपेण ज्ञातत्वम्, किञ्चिद्रूपेणाज्ञातत्वमित्यधिष्ठानलक्षणाभावादधिष्ठानज्ञानरूपकारणाभावः सूच्यते।

अत्राध्यासे कारणानि चत्वारि—(१) विवेकाग्रहः, (२) सादृश्यज्ञानम्, (३) पूर्वपूर्वप्रमाहितसंस्कारः, (४) अधिष्ठानज्ञानञ्च। तत्र 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्यनेन विवेकग्रहाद् विवेकाग्रहरूपकारणाभावः सूच्यते, "तमःप्रकाशवद्विरुद्धस्वभावयोः" इत्यनेन सादृश्यज्ञानाभावः सूच्यते। पूर्वपूर्वप्रमाहित संस्कारः कारणमिति वा तदसम्भवो वा नात्र स्पष्टं प्रतीयते; तथापि सिद्धान्तेऽध्यस्ताध्यास इत्यध्यासनिबन्धनोऽध्यास इति सूचनात्पूर्वपूर्वप्रमाहितसंस्कारोऽपि कारणम्, परं त्वत्र तदभावादध्यासासंभव इति पूर्वपक्षिणा मन्यत इति ज्ञाप्यते।

अत्र सिद्धान्ते यद्यप्यत्यन्तविविक्तयोधर्म-धर्मिणोरविवेकेनेति विवेकाग्रहरूपकारणमस्तीति ज्ञाप्यते, अध्यस्ताध्यास इति तु प्रागुक्तरीत्या पूर्वपूर्वप्रमाहितसंस्कारो न कारणमिति सूच्यते। "मिथ्याज्ञाननिमित्तः" इत्यनेन स्वप्रकाशस्याप्यज्ञानविषयत्वादधिष्ठानज्ञानमत्र सूच्यते। सादृश्यज्ञानं कारणमत्र सिद्धान्ते न समर्थ्यते; तत्कारणं तु तन्न नियतं कारणम्। कारणत्वेऽपि कथञ्चन सादृश्यं सुलभमिति 'नविलक्षणत्वा'धिकरणसिद्धान्ते वर्ण्यत इति न दोष इत्यभिप्रेत्य, अथवाऽध्यासभाष्येऽपि "अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति" इत्यत्र रत्नप्रभोक्तरीत्या सादृश्यज्ञानकारणतानियमाभावः सूच्यते।

भामतीमतेऽपि मूलाविद्यासमर्थनम्

अत्र भामतीमते मूलाविद्या नास्ति। "मिथ्याज्ञाननिमित्तः" इत्यत्र तया मिथ्याज्ञानमध्यास इति व्याख्यानादिति प्रतीयते, परन्तु कल्पतरुः—"अध्यस्य व्यवहारः" इत्यनेन अध्यासस्य व्यवहारहेतुतोक्तौ मिथ्याज्ञाननिमित्त इत्यनेन पौनरुक्त्यमिति केचित्, तन्न; पूर्वपूर्वभ्रमसंस्कृताविद्यया चितः सम्प्रतितनाध्यासनिमित्तत्वात् इति भ्रमस्यैव मिथ्याज्ञानस्येवाविद्याया अपि कारणत्वव्यवस्थापनान्मूलाविद्यापि भामत्या मण्डनपृष्ठसेविन्या स्वीक्रियते। अत एव ब्रह्मसिद्धौ "अनादिरप्रयोजना चाविद्या" इति मिथ्याज्ञानातिरिक्ता मूलाविद्यापि साध्यत इति तदीयटीकादौ व्यक्तम्।

परस्पराध्यासेऽपि ब्रह्ममात्रस्य संसर्गाध्यास एव न स्वरूपाध्यासः, तत्र द्वैतमतनिरासः

प्रायेणात्राद्वैतसिद्धान्तस्य मूलं तत्त्वं ब्रह्मनिष्प्रपञ्चत्वमध्यासभाष्यमवलम्ब्यैव। न्यायसुधया युष्मदस्मत्प्रत्ययगोचरयोरिति भाष्यं यथावदनूद्य तत्र विषय-विषयिणोः परस्पराध्यासो यः साधितः स न संगतः। यदि परस्पराध्यासस्तदुक्तरीत्या, तर्हि ब्रह्मणोऽपि मिथ्यात्वमापद्येत। अनात्मनि ब्रह्मसंसर्गमात्राध्यासे तु तेन न्यायेन प्रपञ्चस्यापि संसर्गमात्राध्यासेन निर्वाहान्मिथ्यात्वसिद्धिर्नस्यादित्याक्षिप्यते। ब्रह्मणोऽनात्मनि संसर्गाध्यासमात्रमिति ब्रह्मसिद्धौ विवेचितम्। तस्यैवाक्षेपो न्यायसुधयाऽत्र क्रियते। अनात्मन्यात्मनः संसर्गाध्यासमात्रे मूलं भगवद्गीतायाम्—

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥

इति श्लोके "न चाहं तेष्ववस्थितः", "मयि भूतानि" इति भगवता स्वयं वर्णनाद् भगवत्येव प्रपञ्चानामध्यासः, सोऽप्यध्यास एव, न तु परमार्थतः सत्त्वेन, इति "न च मत्स्थानि भूतानि इत्युक्तम् । अत आत्मनोऽनात्मनि संसर्गाध्यासमात्रमिति ब्रह्मसिद्ध्याशयः । एतदाशयस्तु— संसर्गाध्यासमात्रं संनिकृष्टस्थले, यथा लोहितः स्फटिक इत्यत्र लौहित्यस्य स्फटिके संसर्गाध्यासमात्रम् ; पुष्पस्य तत्र सन्निहितत्वात् । यथा प्रपञ्चस्यासन्निकृष्टस्य ब्रह्मणि स्वरूपतोऽध्यासस्तथा संसर्गतोऽपि तथा ब्रह्मणः सन्निकृष्टस्य न स्वरूपतोऽध्यासः, किन्तु संसर्गमात्रस्येत्यद्वैतिनां प्रक्रिया ।

अत्र न्यायसुधाया आक्षेपो भाष्याशयविरुद्ध इति स्पष्टमवगमान्न्यायसुधाया नायमाक्षेपो युक्त इति न्यायामृतकारादिभिर्नूनं त्यक्तप्रायः, अतो न्यायामृतकारैरस्याक्षेपस्यात्र नोपक्षेपः, न वा तन्निरासार्थमद्वैतसिद्धेः प्रयत्नः ।

न्यायामृतकारा हि सति सम्भवेऽद्वैतसिद्धान्तमद्वैताक्षेपप्रकारं च संगृह्णन्ति । मधुसूदनसरस्वत्योऽपि यथावदेव सर्वमाक्षेपं निरस्यन्ति, स्वसिद्धान्तञ्च स्थापयन्ति । तत्र न्यायामृतस्याद्वैतसिद्धेश्च प्रथमपरिच्छेदोऽध्यासभाष्यविमर्शनार्थः, येन सर्वोऽध्यासभाष्यसिद्धान्तः सम्यगालोडितः ।

अद्वैतसिद्धेः प्रथमपरिच्छेदार्थसंग्रहः

तत्राध्यासभाष्यम्—"अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इत्यध्यासमुपसंहरति । अद्वैतसिद्धिरपि प्रथमपरिच्छेदेन षष्टिप्रकरणानि संगृह्णानाऽध्यासभाष्यस्याहमध्यासस्योपसंहारमेवाहमर्थानात्मत्वनिरूपणेन, कर्तृत्वाध्यासोपपादनेन, देहात्मैक्याध्याससमर्थनेन चोपसंहरति । अध्यासस्तत्र—"एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः" इत्युपसंहारात् । तत्र मिथ्याप्रत्ययशब्दस्य चानिर्वाच्यपरतया विवरणाद् भामत्यादिष्विवाद्वैतसिद्धौ प्रथमपरिच्छेदे देहात्मैक्याध्यासनिरूपणानन्तरमनिर्वाच्यत्वव्यवस्था संगृह्यते । अध्यासभाष्यसिद्धार्थाः पदार्था अद्वैतसिद्धेः प्रथमपरिच्छेदे संगृहीताः षष्टिसंख्याकाः । त इमे—

१ विप्रतिपत्तिवाक्यस्य विचाराङ्गत्वनिरूपणम्
२ पक्षतावच्छेदकविचारः
३ प्रथममिथ्यात्वनिरूपणम्
४ द्वितीयमिथ्यात्वनिरूपणम्
५ तृतीयमिथ्यात्वनिरूपणम्
६ चतुर्थमिथ्यात्वनिरूपणम्
७ पञ्चममिथ्यात्वनिरूपणम्
८ मिथ्यात्वमिथ्यात्वनिरूपणम्

९ दृश्यत्वनिरुक्तिः
१० जडत्वनिरुक्तिः
११ परिच्छिन्नत्वनिरुक्तिः
१२ चित्सुखीयमिथ्यात्वनिरुक्तिः
१३ सोपाधिकत्वभङ्गः
१४ आभाससाम्यभङ्गः
१५ प्रत्यक्षबाधोद्धारः
१६ प्रत्यक्षप्राबल्यभङ्गः
१७ प्रत्यक्षस्यानुमानबाध्यत्वम्
१८ प्रत्यक्षस्यागमबाध्यत्वम्
१९ अवच्छेदन्यायवैयर्थ्यभङ्गः
२० बहिर्शीत्यानुमितिसाम्यभङ्गः
२१ प्रत्यक्षस्याबाध्यत्वे बाधकम्
२२ मानबाधोपपत्तिः
२३ सत्यत्वानुमानभङ्गः
२४ मिथ्यात्वे विशेषतोऽनुमानानि
२५ आगमबाधोद्धारः
२६ असतः साधकत्वम्
२७ असतः साधकत्वाभावे बाधकम्
२८ दृग्दृश्यसम्बन्धभङ्गः
२९ अनुकूलतर्कनिरूपणम्
३० प्रतिकर्मव्यवस्था
३१ प्रतिकूलतर्कनिराकरणम्
३२ मिथ्यात्वश्रुत्युपपत्तिः
३३ अद्वैतश्रुतेर्बाधोद्धारः
३४ एकमेवेत्यादिश्रुत्यर्थविचारः
३५ ज्ञाननिवर्त्यत्वस्यानुपपत्तिः
३६ दृष्टिसृष्ट्युपपत्तिः
३७ एकजीवाज्ञानकल्पितत्वोपपत्तिः
३८ अविद्यालक्षणम्
३९ अज्ञानप्रत्यक्षोपपत्तिः
४० अविद्यानुमानोपपत्तिः
४१ अविद्यायामर्थापत्तिः
४२ अविद्याप्रतिपादक श्रुत्युपपत्तिः
४३ अविद्याप्रतीत्युपपत्तिः
४४ अज्ञानस्य शुद्धचिन्निष्ठत्वोपपत्तिः
४५ अज्ञानस्य सर्वज्ञाश्रयत्वोपपत्तिः
४६ अज्ञानस्य जीवाश्रयत्वोपपत्तिः
४७ अविद्याया विषयोपपत्तिः
४८ अहमर्थस्यानात्मत्वनिरूपणम्
४९ कर्तृत्वाध्यासोपपत्तिः
५० देहात्मैक्याध्यासनिरूपणम्
५१ अनिर्वाच्यत्वलक्षणम्
५२ अनिर्वाच्यत्वानुमानम्
५३ ख्यातिबाधान्यथानुपपत्तिः
५४ निषेधप्रतियोगित्वानुपपत्त्याऽनिर्वचनीयत्वसमर्थनम् ।
५५ नासदासीदित्यादिश्रुत्यर्थापत्तिः
५६ असत्ख्यातिभङ्गः
५७ अन्यथाख्यातिभङ्गः
५८ आविद्यकरजतोत्पत्त्युपपत्तिः
५९ भ्रमस्य वृत्तिद्वयत्वोपपत्तिः
६० सत्त्वत्रैविध्योपपत्तिः

इति प्रथमं प्रवचनम्

अथ द्वितीयं प्रवचनम्

वादजल्पादिकथास्वरूपम्

तत्राद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम्; तस्यैव मुख्यतात्पर्यविषयत्वात्। द्वैतसत्यत्वं तु व्यावहारिकम्। अध्यारोपापवादविधयाऽध्यारोपितमेव जगत्कारणादिवाक्यैर्विवक्षितमवान्तरतात्पर्यविषयत्वान्न मुख्यं प्रतिपादनमर्हति। व्यावहारिकत्वेऽपि जगत्कारणत्वादीनां सदसद्विलक्षणत्वेऽपि व्यवहारनिर्वाहकत्वमसतोऽपि साधकत्वान्न विरुध्यते।

तत्र प्रतिपादनं गुरु-शिष्ययोर्वादकथया। वादि-प्रतिवादिनोर्भिन्नभिन्नसिद्धान्ताग्रहिणोः परस्परं जयफला जल्पकथा। वितण्डाकथा तु परपक्षनिग्रहमात्रार्था। तत्र गुरु-शिष्ययोर्वादकथायां साधारणधर्मासाधारणधर्माभ्यां विप्रतिपत्तेश्च शिष्यस्य संशयः प्रयोजकः। सा च तत्तद्दर्शनानां प्रकरणप्रस्थानानि, भाष्यप्रस्थानानि च श्रवणविधिमूलानि। जल्पकथायां तु वादिनोरन्येषां वा सभ्यानां निश्चये वादिभ्यां निश्चिते न संशयाभावमुद्दिश्य विचारे प्रवृत्तिः, किन्तु विजयादिकमेवोद्दिश्य; तथापि तत्रापि तात्कालिकसंशयाभावेऽपि सार्वदिकसंशयाभावप्रयोजकसंस्कारदार्ढ्याय आहार्यसंशयः विप्रतिपत्तिवाक्यप्रयुक्तोऽपेक्ष्यते, इति विप्रतिपत्त्यावश्यकता। संशयाभावमुद्दिश्य विचारः सर्वत्र समानः।

विप्रतिपत्तिवाक्योपयोगः

स च संशय आहार्योऽनाहार्यो वेति त्वन्यदेतत्। आहार्यानाहार्यसाधारणसंशयमात्रं विचारप्रयोजकम्। यद्यपि विचारे विप्रतिजन्यसंशयस्योपकारकत्वम्, अनुमितौ तु न तस्याङ्गत्वम्; तथापि यत्र विमतमिति पक्षनिर्देशः, तत्र पक्षतावच्छेदकसमर्पकतया विप्रतिपत्तेरस्त्युपयोगः। वर्णात्मकः शब्दो नित्यः, अन्धकारत्वं भाववृत्तिरित्यादिरूपेण विशिष्य तत्तत्पक्षनिर्देशे तु नानुमाने विप्रतिपत्तेरावश्यकता। न्यायामृते इदञ्च विप्रतिपत्तिप्रदर्शनं वस्तुत इत्युक्त्वा विमतमित्येव प्रायेण पक्षनिर्देशाद् विप्रतिपत्तेरावश्यकता सूचिता। न चाद्वैतसिद्धेरपि विप्रतिपत्तेरावश्यकतायामेवाग्रहः, न वा विमतमित्येव पक्षनिर्देशे। ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं मिथ्येत्यनुमानप्रयोगे विवक्षिते तु न विप्रतिपत्तेरावश्यकता।

अत्र न्यायामृतमपि विप्रतिपत्तिमुखेन ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नमित्येव पक्षमुपक्षिपति। एवं पक्षनिर्देशस्तु नाद्वैतनिबन्धे कुत्रापि दृश्यते; तथापि कृत्वा-

चिन्तया तत्र पक्षतावच्छेदकानां तत्तद्विशेषणानां प्रयोजनं न्यायामृतकारैरिव ब्रह्मानन्दादिभिरपि निष्कृष्यते ।

पक्षतावच्छेदकदलप्रयोजनानि

अत्रानुमाने शुक्तिरूप्यं दृष्टान्त इति द्वैत-केवलाद्वैतोभयसम्मतम् । तत्र द्वैतमतेऽसत्ख्यातिस्वीकारेऽपि शुक्तिरूप्यादेरसतोऽपि शुक्तिज्ञानबाध्यत्वस्य स्वीकाराद् वस्तुतस्तन्मते नामान्तरेण विपरीतख्यातेरेव स्वीकाराच्च शुक्तिरूप्यदृष्टान्तता, एवमद्वैतमते शुक्तिरूप्यादिस्थलेऽनिर्वचनीयख्यातिः । द्वैतमते त्वसत्ख्यातिर्विपरीतख्यातिर्वा । अतः शुक्तिरूप्यादौ सिद्धसाधनतावारणार्थं 'ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति' इति प्रथमं विशेषणम् ।

सत्त्वेन प्रतीत्यर्हत्वमिति विशेषणं तु 'सन् घटः', 'सन् पटः', 'सच्छुक्तिरूप्यम्' इत्यादावित्र सद्विशेष्यकप्रतीतिविषयकत्वं सत्तादात्म्यवत्त्वं वा बोधयति । इदं तु प्रथमविशेषणे दत्तेऽप्यसति बाधावारणार्थम् । असत्तु शशशृङ्गादिकं न सद्विशेष्यकप्रतीतिविषयः, सत्तादात्म्यवद्वा । यद्यपि द्वैतमते शशशृङ्गादिकमपि सदिति प्रतीयत इति स्वीक्रियते; तथापि तत्र सत्त्वं शशशृङ्गादीनां नाधिष्ठानानुवेधेन, किन्त्वाविद्यकवृत्तिविशेषेण । शुक्तिरूप्यादीनां तु तन्मतेऽपि सदिति प्रतीयमानत्वं न कस्मिंश्चिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वाभावेन, किन्तु शशशृङ्गादिसाधारणासत्त्वाभावेन । शशशृङ्गादीनां त्वसत्त्वमत्यन्ताभावप्रतियोगित्वमात्रेण, न तु कस्मिंश्चिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वाभावेन; शशशृङ्गादीनां कुत्राप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वाभावात् । अतः सत्त्वेन प्रतीत्यनर्हत्वाभावरूपं सत्येन प्रतीत्यर्हत्वं शशशृङ्गादौ नास्ति, शुक्तिरूप्यादौ तु वर्तते ।

इदञ्च सत्त्वेन प्रतीत्यर्हत्वं ब्रह्मसाधारणम् । यद्यपि ब्रह्माखण्डं न सदिति प्रतीयते; तत्राखण्डे सदादिभेदस्य बाधितत्वात् । सदादिभेदेन ज्ञानं ह्यनाद्यविद्याप्रयुक्तं तद्भेदमादायाभूताभूतभागकल्पनया ब्रह्माधिष्ठानस्यापि भवति । तदानीं तु सद् ज्ञानं सन् आनन्द इत्येव सत्तादात्म्यज्ञानं चिद्रूपादावपि संभवति । तदयं निष्कर्षः—'सन् घटः' इत्यादौ सति घटादिकम्, तद्भेदोऽप्युभयं कल्पितम्, सद् ज्ञानमित्यादौ तु भेदमात्रमनाद्यविद्यया कल्पितम् ।

न च चिद्रूपे ब्रह्मणि सदिति प्रतीयमानेऽपि तस्य स्वरूपतोऽनध्यासान्मिथ्यात्वम् । अतश्चिति बाधः स्यान्मिथ्यात्वानुमानस्येति तद्वारणार्थं चिद्भिन्नत्वं विशेषणम् । चिद्भेदस्तु स्वरूपसम्बन्धमात्रेण शुक्तिरूप्यादावन्यत्र चासति वर्तते, इति न तावन्मात्रेणासत्यपि बाधवारणं

सम्भवति। अतो नात्र किमपि विशेषणं कार्यमिति पक्षतावच्छेदकनिष्कर्षः। तदेवं विप्रतिपत्त्यावश्यकतां मिथ्यात्वानुमानपक्षतावच्छेदकप्रयोजनानि चाधिकृत्य विशिष्य निवेदितम्। अतः परं मिथ्यात्वप्रकारविशेषाः, अन्ये च तदनुबन्धिनो विषया विमृश्यन्ते।

तत्राद्वैतसिद्धिप्रथमपरिच्छेदे पञ्चमिथ्यात्वनिरूपणम्, मिथ्यात्वमिथ्यात्वनिरूपणम्, दृश्यत्व-जडत्व-परिच्छिन्नत्वादिहेतुनिरुक्तिः, मिथ्यात्वानुमानस्य सोपाधिकत्वभङ्ग इति प्रथमं द्वादशप्रकरणान्यालोचितानि।

मिथ्यात्वलक्षणमूलभाष्यादि

तत्र भाष्याभिमतं मिथ्यात्वमध्यासभाष्ये "अध्यासो नामातस्मिन् तद्बुद्धिरित्यवोचाम" इति भाषणात्, समन्वयसूत्रे 'अविद्यानिवृत्तिपरत्वाच्छास्त्रस्य' इति भाषणाच्च साक्षात् स्वात्यन्ताभाववति प्रतीयमानत्वमिति चतुर्थमिथ्यात्वं चित्सुखाभिमतम्, तस्यैव तुल्यवित्तिवेद्यतया 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्' इति द्वितीयमिथ्यात्वलक्षणेऽपि तात्पर्याल्लघुचन्द्रिकायामुभयत्रापि "नेह नानास्ति किञ्चन" इति श्रुतेरेव मूलत्वव्यवस्थापनाद् भाष्यारूढे द्वितीयचतुर्थमिथ्यात्वे, ज्ञाननिवर्त्यत्वं तृतीयमिथ्यात्वञ्च।

तत्र चतुर्थमिथ्यात्वं साक्षात् "यत्तदद्रेश्यमग्राह्यम्" इत्यारभ्य-"तद्भूतयोनिं परिपश्यन्ति धीराः" इत्याम्नातपरविद्यामूलमिति तु परे। प्रथममिथ्यात्वं तु "नासदासीन्नो सदासीत्" इत्युपनिषद्भाष्यावगतमिति मन्तव्यम्।

सदसद्विलक्षणत्वमिथ्यात्वनिष्कर्षः, तत्र मतान्तरशङ्कानिरासश्च

तत्र प्रथमं मिथ्यात्वं सदसद्विलक्षणत्वम्। यत्तु "नासदासीन्नो सदासीत्" इति श्रुत्यर्थापत्तिगम्यम्। अत्र हि श्रुतौ सदसच्छब्दौ—"यदन्यद्वायोरन्तरिक्षाच्च तत् सत्। वायुरन्तरिक्षञ्चासत्" इति श्रुत्यनुसारेण भूतपरौ; प्रसिद्धपरत्वेऽप्रसक्तप्रतिषेधात्। तदानीमित्यस्य 'नासदासीत्' इत्यनेनैव सिद्धत्वेन 'आसीद् रजः' इत्यस्य वैयर्थ्यात्, अन्यथा 'आनीदवातम्' इति वाक्यशेषाद् ब्रह्मानिर्वचनीयं स्यादिति न्यायामृताशयः। अद्वैतसिद्धिकारास्तु—

"नासदासीन्नो सदासीत् तदानीं तम आसीत् तमसा गूढमग्रे प्रकेतम्"

इति श्रुतौ सदसच्छब्दौ प्रसिद्धसदसत्परौ। 'नो सदासीत्' इत्यनेन प्रपञ्चस्य सद्भिन्नत्व उक्ते प्रसक्तस्यासत्त्वस्य निषेधार्थमारम्भः। "आसीद्रजो नो व्योम" इति रजःप्रभृतिनिषेध एवा-

न्याय न कस्यापि वैयर्थ्यम्; 'आनीदवातम्' इति वाक्यशेषात्। ब्रह्मणस्तु नानिर्वाच्यत्वम्; श्रुत्यन्तरविरोधादिति प्रतिपादयन्ति।

अत्र लघुचन्द्रिका—"अननुगमे विकल्पासंभवादसत्त्वस्य सद्भिन्नत्वनिषेधप्रसञ्जितत्वेऽप्यदोषेण 'नासदासीत्'' इति नाप्रसक्तप्रतिषेधः, नापि तदानीमदवैयर्थ्यम्; तस्य रजआदिनिषेध एवान्वयात्। रजआदिनिषेधस्तु व्यावहारिक-प्रातिभासिकसाधारणसर्वलोकनिराकरणार्थमिति नाप्रसक्तनिषेधत्वापत्तिः। तथा च "नासदासीदि"त्यप्रसक्तप्रतिषेधासम्भवात् सदसद्भिन्नत्वाभावीदित्यर्थ एव तात्पर्यम्; ब्रह्मानिर्वाच्यत्वं तु न सम्भवति" इति विवेचयति। अत्र सदसद्विलक्षणत्वं सत्त्वासत्त्वोभयाभाव इति विवक्षितम्। तत्र सत्त्वं प्रसिद्धमबाध्यत्वम्, असत्त्वं तु क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वम्। तत्र क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपासत्त्वाभावो ब्रह्मणोऽपि, शुक्तिरूप्यादेरपि। अबाध्यत्वरूपसत्त्वाभावस्तु शशशृङ्गादेरपि, शुक्तिरूप्यादेरपि। अतः शुक्तिरूप्यादेरिव सत्त्वाभावासत्त्वाभावोभयवत्त्वं प्रपञ्चस्य साध्यते। अत्र सदसद्विलक्षणस्यापि प्रपञ्चस्य सत्त्वेन प्रतीत्यर्हत्वे शुक्तिरूप्यादेरिव नाबाध्यत्वे प्रमाणम्। अतः 'सन् घटः' इत्यादिप्रत्यक्षं न प्रपञ्चमिथ्यात्वधीविरोधि। 'सन् घटः' इत्यत्र प्रतीयमानः सन् पदार्थोऽधिष्ठानरूपं ब्रह्मैव, यत्तादात्म्यं प्रपञ्चस्य, न तु तत्र सत्त्वमबाध्यत्वम्; विरोधात्। अधिष्ठानानुवेधो हि 'सन् घटः' इत्यत्र तादात्म्येन प्रतीयते; तत्र सत्तादात्म्यमाश्रसाध्यासात्। एकसत्तावादेन 'सन् घटः' इति प्रतीतेर्व्यवस्था। सत्तात्रैविध्यवादे तु प्रपञ्चगतमेव सत्त्वं 'सन् घटः' इत्येन सदिति प्रतीयते, तदपि सत्त्वं न सदसद्विलक्षणत्वविरोधि, यतो नात्राबाध्यत्वरूपं सत्त्वं तत्र विवक्ष्यते। बाध्यत्वं तु घटादेः पारमार्थिकत्वेनाभावादुपपद्यते; तथाप्यर्थक्रियाकारित्वं सत्ताजातिमत्त्वं वा घटादेर्न विरुद्धं सदसद्विलक्षणत्वेऽपि, इति प्रत्यक्षविषयगतं सत्त्वं मिथ्यात्वाविरोधि किञ्चिद् वक्तव्यम्। अतः सदसद्विलक्षणत्वेऽपि घटादेः शुक्तिरूप्यादेरिव न सत्त्वेन प्रतीतिविरोधः, न वा बाध्यत्वविरोधः।

सत्त्वासत्त्वयोः परस्परविरहरूपत्वनिरासः

अत्र न्यायामृतकाराः—सदसद्विलक्षणत्वं मिथ्यात्वं प्रपञ्चस्यानुचितमिति—वर्णयन्ति। कारणं तु तत्र यदि सत्त्वाभावासत्त्वाभावयोः परस्परविरहरूपत्वादेकाभावेऽपरसत्त्वमादाय, तर्हि तु तत् स्यादपि, परन्तु नात्रासत्त्वं प्रसिद्धं गृह्यते सत्त्वमिव, किन्तु क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वं ब्रह्मसाधारणं किञ्चिद्विवक्ष्यते। तद्विवक्षायां तु पूर्वोक्तरीत्या न विरोधलेशोऽपि। सत्त्वमिदमसत्त्वं पारिभाषिकमिव, परन्तु द्वैतमतेऽपि न प्रसिद्धमसत्त्वं गृहीत्वा सत्त्वाभावो वर्णयितुं शक्यते, तन्मतेऽप्यसत्ख्यातिस्वीकारादसतः शुक्तिरूप्यादेः सत्त्वेन प्रतीत्यर्हत्वस्यापि प्रतीतिः सन्

इति स्वीकारात्। तत्र सत्त्वेन प्रतीत्यर्हत्वनिर्वाह उक्तरूपमसत्त्वमादायैवेति वक्तव्यम्। अत्यन्ताभाव-प्रतियोगित्वमसत्त्वमिति तन्मते स्वीकाराद केवलं शुक्तिरूप्यादौ, किन्तु घटादावपि सत्त्वेन प्रतीत्य-र्हत्वं न सत्त्वस्य मुख्यस्य विवक्षायां निर्वोढुं पार्यते। अतः क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्व-रूपमसत्त्वमादायैव सत्त्वेन प्रतीत्यर्हत्वं द्वैतमतेऽपि निर्वहणीयम्।

न्यायचन्द्रिका तु प्रसिद्धसदसत्त्वे गृहीत्वाऽपि सत्त्वासत्त्वयोः परस्परविरहरूपत्वं वर्णयितुं न शक्यत इत्युक्तरूपमेवासत्त्वमादायासतोऽपि सत्त्वेन प्रतीत्यर्हत्वं निर्वहणीयं शुक्तिरूप्यादेरिवेति मन्यते। तत्र तयोः परस्परविरहरूपत्वं व्यभिचारान्न युक्तम्। यत्र सत्त्वे सत्त्वाभावः, न तत्रास-त्त्वम्, तथा यत्रासत्त्वे सत्त्वाभावः, न तत्र सत्त्वमिति सत्त्वासत्त्वयोः परस्परविरोधः।

प्रमेयत्वे प्रमेयत्ववद् दृश्यत्व मिथ्यात्वयोर्दृश्यत्व-मिथ्यात्ववत् सत्त्वासत्त्वयोः सत्त्वासत्त्वस्वीकारे त्वात्माश्रयो दोषः। दृश्यत्व मिथ्यात्वयोर्दृश्यत्वं घटादिवद् दृश्यत्वातिरिक्तं न मन्यते। एवं मिथ्यात्वेऽपि मिथ्यात्वं दृश्यत्वेन प्रतियोगि-तदभावसाधारणेन, न तु मिथ्यात्वेनेति नात्माश्रयः। न चायं न्यायोऽत्र संभवति। अतो न्यायचन्द्रिकोक्तं दूषणं दुर्निवारम्। अतः परस्परविरह-रूपत्वसम्भवः।

अत्र सत्त्वासत्त्वयोः प्रसिद्धं रूपं गृहीत्वैव परस्परविरहरूपत्वं न सम्भवतीति न्यायचन्द्रिकायामुक्तम्। क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वघटितं सदसद्विलक्षणत्वम्। तदाशयस्तु मिथ्यात्वलक्षणे सत्त्वासत्त्वे उभे न प्रसिद्धे ग्रहीतव्ये; तयोः परस्परविरहरूपत्वस्य बाधात्, किन्तु क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपमेवासत्त्वं तत्र विवक्षणीयमिति। न चैतावता सत्त्वासत्त्वयोः सर्वत्रैवंरूपतायामेव तात्पर्यमुन्नेयम्; परस्परविरहरूपत्वं प्रसिद्धयोः सत्त्वासत्त्वयोर्न संभवतीत्यत्रैव तात्पर्यात्। अतः प्रकृतमिथ्यात्वलक्षणे सत्त्वासत्त्वयोरसत्त्वं प्रसिद्धं न ग्रहीतव्यम्, किन्तूक्तरूपमेवेति मिथ्यात्वलक्षणमेवमद्वैताभिमतमद्वैतसम्मतासत्त्वाभाव-विवक्षायां न कथमपि दुष्टम्।

तत्र प्रपञ्चस्य सत्त्वासत्त्वाभावोभयवत्त्वेऽपि ब्रह्मवत् सत्स्वरूपतामङ्गीकृत्य सन्निति प्रतीतिविषयत्वं वक्तुं न शक्यते। तत्र ब्रह्मण एकस्य सत्स्वभाववत् सर्वस्य प्रपञ्चस्यापि प्रत्येकं तत्स्वभावकल्पने हि सर्वत्र सन्नित्येकाकारप्रतीत्यनुपपत्तिः; इदं रजतमित्यादौ रजतं विनापि रजतादिव्यवहारवत् 'सन् घटः' इत्यादौ सद्रूपं घटादि विनापि प्रतीत्युपपत्तेः। ब्रह्मणः सद्रूपत्वं तु तस्य प्रमितत्वादुपपद्यते। शुक्तिरूप्यादेर्जगतश्च न

तथा प्रमितत्वम्; जगतः सद्रूपे ब्रह्मणि कल्पितत्वेन घटादिज्ञानस्य सर्वस्य विकल्पांशेऽप्रामाण्यस्यैव ब्रह्मसिद्धि-तत्त्वशुद्ध्यादावुक्तरीत्यौचित्यात्। तदेवं सत्त्वासत्त्वयोः परस्परविरहरूपत्वाभावात् सदसद्विलक्षणत्वरूपं मिथ्यात्वमव्याहतम्। सत्त्वासत्त्वयोः परस्परविरहरूपत्वं हि सत्त्वे सत्त्वाभावासत्त्वाभावोभयवत्त्वात्। तत्र यदि सत्त्वे सत्त्वम्, तर्ह्यात्माश्रयः। यदि तत्रासत्त्वम्, तर्हि सत्त्वस्याप्यसत्त्वापत्तिः। अतः सदसद्विलक्षणत्वस्य मिथ्यात्वे न व्याघातलेशोऽपि, न वा तत्र सत्त्वेन प्रतीत्यर्हत्वविरोधः। तत्र द्वैतमते सद्विलक्षणस्यासतः सत्त्वेन प्रतीत्यर्हत्वेऽविरुद्धे कैव कथाऽद्वैतसिद्धान्ते तत्र सत्त्वेन प्रतीत्यर्हत्वे। 'घटः सन्' इति प्रत्यक्षं हि घटादेरधिष्ठानानुवेधेन सत्तादात्म्यमेव गोचरयति, न त्वबाध्यत्वरूपं तस्य सत्त्वम्; तस्य स्वरूपतो बाध्यत्वात्। न च सत्त्वं सर्वत्र सत्प्रतीतावबाध्यत्वम्, द्वैतमते शुक्तिरूप्यादावसति तस्य बाधात्।

एतेन सत्स्वभावतोऽपि ब्रह्मण इव सत्स्वभावता परास्ता। नहि घटादीनां सत्स्वभावता प्रत्येकं भिन्ना; अन्यथा सत्ताजात्यादेरनुगतव्यवहारप्रयोजकत्वायोगात्। परमते जातिकल्पनाऽपि नोपपद्येत, सत्ताजात्यादेरेवात्र सत्यतायां तु तस्य सदसद्विलक्षणत्वेनाविरोधान्न सदसद्विलक्षणत्वे मिथ्यात्वे प्रत्यक्षादिविरोधशङ्कापि।

न चाधिष्ठानानुवेधे सन्निति चाक्षुषप्रत्यक्षायोगः। 'सन् घटः' इत्यादिप्रत्यक्षे घटाद्यंश एव चाक्षुषत्वम्, न सदंशे; तस्य स्वप्रकाशत्वेन तज्ज्ञानार्थमिन्द्रियसन्निकर्षानपेक्षणात्। अत एव भाष्यम्—"न च पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति नियमः; अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति" इति। न चायमेकान्तेनाविषयः; अस्मत्प्रत्ययविषयत्वात्। प्रातिभासिकाध्यास एव पुरोऽवस्थितत्वमधिष्ठानस्यापेक्षितम्, न तु घटाद्यध्यासे; अन्यथाऽतीन्द्रियाध्यासेऽपि सतश्चाक्षुषत्वापत्तिः। अतः सतश्चाक्षुषत्वव्यपदेशस्तत्र घटादेश्चाक्षुषस्य तादात्म्याध्यासमात्रेण, तदाकारवृत्तेश्च चाक्षुष्यास्तत्राध्यासेन। सति चैवं 'सन् घटः' इत्यत्रापि नीरूपस्यापि चाक्षुषत्वसमर्थनमद्वैतसिद्धिकाराणां कृत्वाचिन्तया न्यायामृतनिरासार्थमेव, न तु वस्तुस्थितिमनुसृत्य।

वस्तुतस्तु 'सन् घटः' इत्यादि प्रत्यक्षं 'सदेव सौम्य' इति श्रुतिरिवाध्यारोपसिद्धं सत्तादात्म्यमेवानुवदति, न तु सत्त्वम्। अत एव तत्र—'एकमेवाद्वितीयम्' इति सदतिरिक्तस्य तत्रापवाद उपपद्यते, इति तेन न्यायेन 'सन् घटः' इत्याद्यबाध्यत्वं सदंश एव, न तु घटादिप्रकारांशे।

अत एव ब्रह्मविद्याभरणेऽप्युक्तम्—"नेह एव नानात्वं प्रमाणतः, न विरुद्धांशोऽर्थे" इति। अतः 'इदं रजतम्' इति ज्ञानस्य 'नेदं रजतम्' इति ज्ञानापवादकत्वम्, 'सन् घटः' इति ज्ञानस्य 'नेह नानास्ति किञ्चन' इति श्रुतिजन्यप्रत्यक्षादिविषयापवादकत्वं न युक्तम्, इति प्रत्यक्षादिविरोधे प्रत्यक्षादिविरोधशङ्का द्वैतिनां निरस्ता। निषेधेऽपि ब्रह्मणः सत्त्वेन प्रत्यभावोऽपि नास्तीति न ब्रह्मणोऽपि मिथ्यात्वापत्तिः।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमिथ्यात्वविचारः

एतेन—"नेह नानास्ति किञ्चन" इति श्रुतिरिदं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वमपि व्याख्यातम्।

एतच्चानुसन्धेयम्—"यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः" इति वाक्ये पञ्चजनशब्द-निर्दिष्टानामसङ्ख्यातत्वादनन्तप्राणादिवस्तुनिषेधपरता तथा "यस्य ब्रह्म च क्षत्रं च" इत्यादावपि सर्वद्वितीयोपलक्षणतया सर्वद्वितीयपरत्वस्यावश्यकत्वात् द्वैतवति ब्रह्मणि द्वितीयाभावः।

इति चैवम्—"सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयम्" इति वाक्यार्थ एवात्र प्रकारान्तरेणाम्नायते। तत्र—यथा 'इदं रजतम्' इत्यस्य बाधज्ञानं 'नात्र रजतम्' इति लक्ष्यते, 'नेदं रजतम्' इति वा; उभयोरप्येकार्थपर्यवसानात्। एवमत्रापि 'इह ब्रह्मणि न नाना' इत्यनेनापि ब्रह्माद्वितीयमित्येव विवक्ष्यते। तथा च द्वैतवति ब्रह्मणि द्वैतनिषेधाद् द्वैतोपलक्षितब्रह्मबोधन एवोपक्रमवाक्यतात्पर्याद् द्वैतमिथ्यात्वमर्थसिद्धमित्यभिप्रेत्याद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वाद् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयमिति प्रस्तुतमद्वैतसिद्धावादौ।

सति चैवं प्रतिपन्नोपाधावित्यनेन स्वप्रकारकप्रतीतिविशेष्ये ब्रह्मणीत्येव विवक्षणीयम्। अत एव—नन्वेवमसत्त्वापत्तिरापातः। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं ह्यन्यत्रासत्त्वेन संप्रतिपन्नस्य घटादेः सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वे पर्यवसितम्; अन्यथा तेषामन्यत्र सत्त्वा-पातात्। तथा च कथमसद्वैलक्षण्यम्। नहि शशविषाणादेरितोऽन्यदसत्त्वमित्याशङ्क्य क्वचि-दुपाधौ सत्त्वेन प्रतीत्यनर्हत्वमसत्त्वम्, नान्यत्। इदञ्चोपाधिपदेन तदर्थेन सूचितमित्य-द्वैतसिद्धौ व्यक्तम्।

सति चैवं विप्रतिपत्तिवाक्येऽधिकरणसामान्यमुपाधिपदार्थं मत्वा सर्वत्रपदप्रयोगा-दिकं सम्बन्धविशेषविवक्षया शङ्का-समाधानादिकं च सर्वमप्रस्तावसरम्; ब्रह्मण्येव तादात्म्य-सम्बन्धेनैव प्रपञ्चस्याध्यारोपणात्, तत्रैव तदभावस्य बोधनात्, इति सत्तादात्म्येन प्रसक्तस्य

तेनैव निषेधात्, असतश्च ब्रह्मणि तादात्म्याभावाद्यासत्त्वाविशेष इति गम्यते। इदमेव गृहीत्वा सदसद्विलक्षणेऽसत्त्वं क्वचिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वमिति विवेचितम्। अतो न परिभाषामात्रमेतदसत्त्वम्; श्रुत्यनुगृहीतत्वात्।

अत्र निषेधतात्त्विकत्वपक्षे प्रतियोगिसत्यत्वापत्तिशङ्का प्रपञ्चमिथ्यात्व-तदभावयोरैक्यप्रतियोगितावच्छेदकत्वे न प्रसरतीति मिथ्यात्वमिथ्यात्वे न प्रपञ्चसत्यत्वापत्तिरिति प्रकरणान्तरे निष्कर्षार्थमात्रमत्रानुसन्धीयते। अत्र भावाद्वैतमेव मण्डनस्येत्यनुवादो न्यायामृतानुवादभ्रान्तिसिद्धं कृत्वाचिन्तया, वस्तुतः स वादो ब्रह्मदत्तस्यैवेति ब्रह्मसिद्धिव्याख्यायां भावशुद्धौ व्यक्तम्।

ज्ञाननिवर्त्यत्वमिथ्यात्वविचारः

अयमत्र निष्कर्षः—प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य तात्त्विकत्वेऽपि तृतीयमिथ्यात्वं ज्ञाननिवर्त्यत्वम्। तत्र प्रमाणम्—"तरति शोकमात्मवित्", "विद्वान्नामरूपाद्विमुक्तः" इत्यादिः श्रुतिः। अत्रत्यज्ञानपदेनाधिष्ठानसाक्षात्कारः प्रमाणतन्त्रो वस्तुतन्त्रो वा विवक्ष्यते, न तु स्वरूपज्ञानं स्वप्रकाशम्। तदप्युपहितान्याविषयकत्वे सत्युपहितविषयमेव। तेन 'सन् घटः' इत्यादावप्यधिष्ठानप्रकाशसत्त्वेऽपि सदंशे तस्य प्रमाणजन्यत्वाभावाद् व्यावहारिकप्रमाणस्यापि तस्य घटादिप्रकाशस्य एव प्रमाणजन्यत्वान्न तेनाज्ञाननिवृत्त्या सर्वनिवृत्त्यापत्तिः। अज्ञानोपहितं ब्रह्माधिष्ठानम्, भ्रमोपादानं वा, प्रमाणजन्यवृत्त्युपहितमखण्डचैतन्यमज्ञाननिवृत्त्युपलक्षितमिति विवेकः। व्यक्तीकरिष्यते चेदं ज्ञाननिवर्त्यत्वानुपपत्तिप्रकरणे। अत्रापि ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं ज्ञाननिवर्त्यत्वमिति सिद्धान्तोपक्रमे व्यक्तम्।

ज्ञाननिवर्त्यत्वस्याधिष्ठानसाक्षात्कारनिवर्त्यत्वरूपत्वात्
पूर्वज्ञानादावतिव्याप्त्यादेरनुक्तोपालम्भनता

सति चैवम्—"ननूत्तरज्ञाननिवर्त्ये पूर्वज्ञानेऽतिव्याप्तिः, मुद्गरपातनिवर्त्ये घटादावव्याप्तिः, ज्ञानत्वेन ज्ञाननिवर्त्यत्वविवक्षायामप्ययमेव दोषः, अधिष्ठानसाक्षात्कारत्वेन निवर्त्ये शुक्तिरूप्यादौ ज्ञानत्वेन ज्ञाननिवर्त्यत्वाभावात् साध्यविकलता, ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वविवक्षायां स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारेऽतिव्याप्तिः, उत्तरत्र ज्ञाननिवर्त्यत्वानुपपत्तिप्रकरणे सेतुदर्शननिवर्त्ये ब्रह्महत्यापापेऽप्यतिव्याप्तिरित्यादिकमनुक्तोपालम्भनम्, तेषां सर्वेषामधिष्ठानसाक्षात्कारत्वाभावात्, सेतुदर्शनस्य चोदनातन्त्रस्यैव पापनिवर्तकत्वेन प्रमाणजन्याधिष्ठानसाक्षात्कारत्वाभावाच्च। सत्यप्येवमद्वैतसिद्धिः कृत्वाचिन्तयाऽपि न्यायामृतनिरसनं स्वीकर्तव्यं मत्वा सर्वं निरस्यति।

वस्तुतस्तु ज्ञाननिवर्त्यत्वमधिष्ठानसाक्षात्कारनिवर्त्यत्वं न तत्प्रयुक्तान्यतरत्वमेव, इति मुद्गरपातादिनिवर्त्यघटादीनामिव पूर्वज्ञानादीनामप्यधिष्ठानसाक्षात्कारनाश्यत्वाभावातिव्याप्तिः, अव्याप्तिर्वा।

ज्ञानत्वेन ज्ञाननिवर्त्यत्वपक्षोऽप्यदुष्टः

निष्कर्षस्तु—ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं ज्ञाननिवर्त्यत्वम्। एवञ्च कार्यात्मना, कारणात्मना च द्विविधावस्थितिरत्रावच्छिन्नविरहस्य ज्ञानप्रयुक्तस्यैवात्र विवक्षणाद् "अविद्या सद् कार्येण नास्ति नासीन्न भविष्यति" इति बाधस्याविद्यायामपि सत्त्वेन तत्परिणामभूतभ्रमस्यापि तथात्वेन शुक्त्यज्ञान-रूप्यविभ्रमयोरपि मिथ्यात्वस्येष्टत्वेनालक्ष्यत्वाभावेनातिव्याप्त्यनवसरात्, शुक्तिज्ञाने 'रूप्यं नास्ति नासीन्न भविष्यति', इति प्रतीतेरानुमानिकत्वेन रूप्यस्यापि मिथ्यात्वात् साध्यवैकल्याभावाद्, उत्तरज्ञानेन पूर्वज्ञानस्य स्वात्मनावस्थितिविरहस्योत्तरज्ञानप्रयुक्तत्वे कारणात्मनावस्थितिविरहस्य तत्राभावादर्थान्तरस्यापि नावकाशात् परोक्षापरोक्षसाधारणस्यापि ज्ञानत्वस्य स्वरूपसम्बन्धरूपनिवर्तकतावच्छेदकत्वाङ्गीकारेणोपपत्तिसम्भवाच्च ज्ञानत्वेन ज्ञाननिवर्त्यत्वपक्षे न दोषः।

ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वादिपक्षोऽप्यदुष्टः

एवं ज्ञानत्वव्याप्यधर्मेण निवर्तकतापक्षोऽप्यदुष्ट एव; स्मृतित्वेन स्मृतेः संस्कारनिवर्तकताया अनङ्गीकारात्, स्मृतौ सत्यां संस्कारो दृढो भवतीत्येवानुभवात्। स्मृतिसामान्यस्यायथार्थत्वमेव न यथार्था स्मृतिरपि समस्तीति बिन्दुटीकोदाहृतपक्षानुसारेणानुभवत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वपक्षोऽपि न दोषाय। एवं भ्रमोत्तरसाक्षात्कारत्वेन तन्निवर्त्यत्वमिथ्यात्वपक्षोऽपि समीचीन एव; जीवन्मुक्तीयाज्ञानसंस्कारस्य चरमसाक्षात्कारेणैव निवृत्तिः, न तु ज्ञानसंस्कारेणेत्यङ्गीकारेण तत्रापि दोषाभावाद् अनाद्यध्यासानामप्यविद्योपादानत्वस्य तत्समकालिकत्वेन न्यायरत्नावल्यामुपपादितत्वेन स्वोपादाननिवर्तकज्ञाननिवर्त्यत्वपक्षस्याप्यदुष्टत्वात्, इति तृतीयमपि मिथ्यात्वं सूपपादमेव।

तुरीयमिथ्यात्वस्य चित्सुखीयत्वायोगशङ्का-तत्परिहारौ

चतुर्थमिथ्यात्वं तु स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वं चित्सुखाचार्याणामिति चन्द्रिकायाम्—

आद्यं स्यात् पञ्चपादुक्तं ततो विवरणोदितं।
चित्सुखीयं चतुर्थं स्यादन्त्यमानन्दबोधजम्॥

इति वचनात्। तत्र यद्यपि तत्त्वप्रदीपिकायां मिथ्यात्वलक्षणं दशधा—(१) प्रमाणागम्यत्वम्, (२) अप्रमाणज्ञानगम्यत्वम्, (३) अयथार्थज्ञानगम्यत्वम्, (४) सद्विलक्षणत्वम्, (५) सदसद्विलक्षणत्वम्, (६) अविद्या तत्कार्यान्यतरत्वम्, (७) ज्ञाननिवर्त्यत्वम्, (८) प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्, (९) बाध्यत्वम्, (१०) स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वमिति विकल्प्य सर्वमपि पूर्वपक्षिमुखेन निरस्य—

"सर्वेषामपि भावानां स्वाश्रयत्वेन सम्मते।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥"

इति,

"अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः।
अंशित्वादितरांशीव दिगेवैषा गुणादिषु॥"

इति च 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमिति' विवरणोदितं द्वितीयमिथ्यात्वमेव सिद्धान्तितम्; तथापि न तत्तदीयं मिथ्यात्वम्, किन्तु दशमं मिथ्यात्वमेव तन्मनोगतमिति विज्ञायते।

तत्र पूर्वपक्षोपन्यासावसरे न दशमः; संयोग विभाग-शब्दात्मविशेषगुणानामेकप्रदेशगतानां स्वात्यन्ताभावाधिकरणगततया प्रतीयमानानां परैः सत्त्वाद्यङ्गीकारादर्थान्तरतया दुरतिक्रमत्वादिति तत्पक्षो दूष्यते। तत्र यद्यपि सिद्धान्तोपन्यासावसरे तत्पक्षो दूषणोद्धारेण न समर्थ्यते; तथापि 'प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्व'पक्षसमर्थनावसरे पूर्वपक्षोपक्षेपावसरेऽनुपन्यस्तसंयोग-विभागादिष्वव्याप्यवृत्तित्वादर्थान्तरं स्वतन्त्रमाशङ्क्य तदव्याप्यवृत्तितया अनङ्गीकारेण तदाशङ्का निःसारिता। तत्र संयोगादीनामव्याप्यवृत्तिताऽनङ्गीकारपक्षो हि चित्सुखाचार्यैरेवोट्टङ्कितः, इति तेनैवात्यन्ताभावाधिकरणे प्रतीयमानत्वपक्षोऽपि समर्थितप्राय इति कृत्वैव चित्सुखीयं चतुर्थं स्यादित्युक्तम्।

तुरीयमिथ्यात्वमूलं परविद्या, न तु "नेह नानास्तीति श्रुतिः"

इदमपि मिथ्यात्वं द्वितीयं मिथ्यात्वमिव 'नेह नानास्ति' इति श्रुतिमूलमिति लघुचन्द्रिकातुल्यवित्तिवेद्यतया तस्यैवैवंरूपत्वमित्यभिप्रेत्य वदति। इदं तु प्रतिभाति—"यत्तदद्रेश्यमग्राह्यम्" इत्यादि "तद्भूतयोनिं परिपश्यन्ति धीराः" इत्यन्तपरविद्यामूलमिदं मिथ्यात्वमिति।

द्वितीय-तुरीयमिथ्यात्वयोर्विषयविवेकः

अत्र सर्वत्र मिथ्यात्वप्रकरणेऽधिकरणपदमधिष्ठानपरमेवाद्वैतमते साम्प्रतम्, इति स्वात्यन्ताभावाधिकरणे–प्रतीयमानत्वपदाभ्यां स्वस्वभावोभयाधिष्ठानकत्वमेव तत्र प्रतीयते, तेन मिथ्यात्वस्यातात्त्विकत्वपक्ष एव विवक्ष्यत इति प्रतीयते। अथवा भावाद्वैतमतमेवात्र विवक्ष्यत इति विषयविवेकोऽपि द्वितीय-चतुर्थमिथ्यात्वयोः। अन्यत् सर्वं द्वितीयमिथ्यात्वप्रकरणवदेवानुसन्धेयम्।

"अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम" इति भाष्यं तुरीयमिथ्यात्वे मूलम्

अत्र—"अध्यासो नामाऽतस्मिन् तद्बुद्धिरित्यवोचाम" इति भगवत्पादभाष्यं साक्षान्मूलम्। अनिवर्चनीयख्यातौ—"तद्वति तत्प्रकारकं ज्ञानं प्रमा" इति प्रमालक्षणं यद्यपि न युक्तम्; भ्रमस्यापि तद्वति तत्प्रकारकत्वात्; तथापि तदभाववति तत्प्रकारकत्वं भ्रम इति न विरुद्धमिति भाष्याशयः। एतदेव स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वं मिथ्यात्वमित्यनेन सूच्यत इति।

भ्रमस्यापि यावद्बाधं प्रामाण्यम्

तद्वति तत्प्रकारकत्वमध्यारोपेणैवेति यावद्बाधं प्रामाण्याविरोधः, किन्तु तद्वत्त्वं तदभाववाधकं न भवति। एतदेवाभिप्रेत्य मिथ्यात्वेनानिश्चीयमानार्थविषयकत्वलक्षणं प्रामाण्यं भ्रमस्यापीति सिद्धान्तः।

'सदेवेदम्' इत्यादौ बाधायां सामानाधिकरण्यसूचनं तुरीयमिथ्यात्वस्य लक्ष्यम्

तत्र तद्वति तत्प्रकारकत्वं तदभावतत्तद्वत्त्वेन, वस्तुतस्तद्वत एव तद्वत्त्वेन वेति संशये जगत्कारणत्वादिकं वस्तुतस्तद्वत्त्वेनेति शङ्कावारणं हि 'सदेवेदम्'इत्यादिवाक्येन यदि तद्वत्त्वेन कारणत्वं विवक्ष्यते, तर्हि जगत्सत्यत्वमेव शास्त्रार्थः स्यात्। तदा चाद्वितीयादिपदानां तदनुसारेणानयनं कर्तव्यम्। सामानाधिकरण्यं हि विशेष्य-विशेषणभाव एव मुख्यम्; अबाधात् कस्याप्यर्थस्य। यदि तु तदभाववति तद्वत्त्वमेव, तर्हि जगत्कारणत्वादीनां बाधेन बाधायां सामानाधिकरण्येन 'सदेवम्'इति वाक्यार्थः स्यात्। तत्र च तदभाववति तद्वत्त्वेन बाधायां सामानाधिकरण्यमेव तत्र युक्तमिति सूचनेनैव भवतीति तत्सूचनार्थं परविद्यादिवाक्यगम्यं स्वात्यन्ताभावाधिकरणे प्रतीयमानत्वरूपतुरीयमिथ्यात्वम् "अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम"इति भाष्योपबृंहितमत्र स्वीक्रियते। अधिकमन्यत्र।

पञ्चममिथ्यात्वं तन्मूलं च । तस्य तृतीयमिथ्यात्वाद्विवेकादिरत्र सद्विविक्तत्वस्यातिव्याप्त्यव्याप्ति- निरासेन लक्ष्ये समन्वयश्च

पञ्चमं मिथ्यात्वं सद्विविक्तत्वम् । अत्र च मूलम्—"अतोऽन्यदार्तम्" इति श्रुतिः । ब्रह्मभिन्नं मिथ्येति तु श्रुत्यर्थः । तत्र सद्विविक्तत्वं प्रमाणसिद्धभिन्नत्वम्, न तु सद्विलक्षणत्वमात्रं बाध्यत्वम्; ज्ञाननिवर्त्यत्वरूपमिथ्यात्वेन पौनरुक्त्यात् । तत्र प्रमासिद्धत्वं दोषनिष्ठकारणता-निरूपकज्ञानान्यधीविषयान्यत्वम् । तत्र दोषविधयाऽधिष्ठानावरणद्वारा निमित्तकारणाविद्या-प्रयुक्तविवर्तविषयकत्वाद् घटादिज्ञानं दोषकारणतानिरूपकं ज्ञानम्, तदन्यच्च ज्ञानं ब्रह्मज्ञानम्, ब्रह्मणः सत इव ब्रह्मविवर्तत्वाभावात् तदन्यत्वं घटादिज्ञानस्येति तद्विषयत्वाद् घटादेः सद्विविक्तत्वम् । शुक्तिरूप्यादौ त्वविद्यातिरिक्तकाचादिदोषकारणकत्वात् समन्वयः । अलीकेऽपि दोषविधयाऽविद्यायास्तदतिरिक्तस्य वा विकल्पाख्यज्ञाने कारणत्वाभावाद् दोषनिष्ठ-कारणतानिरूपकज्ञानान्यदेव ब्रह्मज्ञानमिवालीकज्ञानमपि, इति न तत्साधारणं सद्विविक्तत्वम् । अतो ब्रह्मणीव तत्रापि न व्यभिचारः; दृक्तादात्म्यरूपस्य दृश्यत्वस्य तत्राभावात् ।

असतः साधकत्वसमन्वयः, वेदान्तानां स्वरूपतो मिथ्याभूतानामपि ब्रह्मणि प्रामाण्यं च

तत्र चाऽऽविद्यकत्वेऽपि चक्षुरादीनां चक्षुरादिकरणत्वमात्रेणाविद्याकारणत्वं विना घटादिज्ञानस्य न भ्रमत्वनिर्वाहः; स्वरूपतोऽप्रमाणत्वेऽपि विषयतः प्रमाया अविरोधात् ।

"उपायाः शिक्ष्यमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥"

इति न्यायात्, सत्त्वस्य कारणतानवच्छेदकत्वाच्च । अतो वेदान्तानां यदि स्वत आविद्यकत्वेऽप्यविद्या स्वयं दोषविधया न निमित्तकारणम्, तदा वेदान्तस्याविद्यकत्वमात्रेण तत्त्वमस्यादिवाक्यजन्यज्ञानस्य न भ्रमत्वम्, येन ब्रह्मण्यतिव्याप्तिः स्यात् ।

अत्र वेदान्तानामाविद्यकत्वाद्वेदान्तजन्यज्ञानं मिथ्येति वादस्तु न द्वैतिनामन्यैपाश्रय-सरति; ब्रह्मणो विषयस्यानाविद्यकत्वात्, अबाधाच्च ।

मिथ्यात्वस्य प्रत्यक्षानुमानादिबाधोद्धारादिः

अत्राद्वैतसिद्धेः पद्ग्रिमप्रकरणेष्वाद्यानि दश प्रकरणान्यालोचितानि। तत्र पञ्चदशमारभ्य प्रत्यक्षबाधोद्धारः, प्रत्यक्षप्राबल्यभङ्गः, प्रत्यक्षानुमानबाध्यत्वम्, प्रत्यक्षस्यागमबाध्यत्वम्, अपच्छेदन्यायवैषम्यभङ्गः, प्रत्यक्षस्याबाध्यत्वे बाधकम्, भाविबाधोपपत्तिः, सत्यत्वानुमानभङ्गः, मिथ्यात्वे विशेषतोऽनुमानानीति दशप्रकरणानि मिथ्यात्वस्य तत्तच्छ्रुतिसिद्धस्य प्रत्यक्षादिना बाधशङ्कां वारयितुं प्रवृत्तानि।

प्रत्यक्षेण वर्तमानमात्रग्राहिणामपि मिथ्यात्वपरश्रुतिबाधायोगः, परिणामेनैव पूर्वस्य प्रत्यक्षस्य बाधयोगश्च

तत्र प्रत्यक्षादीनां पौरुषेयत्वाच्छ्रौतस्य मिथ्यात्वस्य बाधशङ्का नावसरति। तत्र प्रत्यक्षविरोधे श्रुतीनामन्यथा नयनं श्रुतेरर्थान्तरतात्पर्ये तदविरोधायान्यथानयनेन भवति। अत्र तु प्रत्यक्षेण वर्तमानमात्रग्रहेण भाविविषयाग्रहणाद् भाविबाधग्राधकत्वं बाधकज्ञानेन बाध्यत्वाच्च संभवति। तत्र यथा 'इदं रजतम्' इति ज्ञानस्य 'नेदं रजतम्' इति ज्ञानेन परेण बाधः, एवमत्रापि बाधकज्ञानेन परेण पूर्वस्य 'सन् घटः' इत्यादिप्रत्यक्षस्य बाध एव युक्त इति 'सन् घटः' इत्यादौ सामानाधिकरण्यं बाधायां पर्यवस्यति।

अपच्छेदन्यायेन प्रत्यक्षपारमार्थिकप्रामाण्यस्य बाधेऽपि व्यावहारिकं प्रामाण्यमबाधम्

यद्यपुपक्रमाधिकरणन्यायेन प्रथमस्य प्रत्यक्षस्य प्राबल्यं शङ्कितुं शक्यते; तथापि तस्यापच्छेदन्यायेन बाधाच्च पौर्वापर्यनियमे पूर्वेण परस्य बाधः, किन्तु परेणैव पूर्वस्य। अत्रापच्छेदन्यायेन यदि—"यदि प्रतिहर्ताऽपच्छिन्द्यात् सर्ववेदस दद्याद् यद्युद्गाताऽपच्छिन्द्याददक्षिणं यज्ञं संस्थाप्य पुनस्तेन यजेत" इति वचनसिद्धेऽपच्छेदद्वये प्रथमं प्रतिहर्त्रपच्छेदेऽनन्तरमुद्गात्रपच्छेदे च क्रमिके परेणोद्गात्रपच्छेदनिमित्तप्रायश्चित्तेन पूर्वस्य प्रतिहर्त्रपच्छेदनिमित्तप्रायश्चित्तस्य बाधेऽपि तद् दद्यात् "यत्पूर्वस्मिन् दास्यन् स्यात्" इति वचनात् प्रतिहर्त्रपच्छेदनिमित्तप्रायश्चित्तस्यापि सावकाशत्वं मन्यते, प्रकृते त्वागमेन प्रत्यक्षबाधे न तस्य सावकाशत्वमित्यपच्छेदन्यायवैषम्यम्, तर्हि प्रकृतेऽप्यागमेन प्रत्यक्षस्य बाधेऽपि व्यावहारिकं प्रामाण्यं तस्य स्वीक्रियत इति तद्वैषम्यभङ्गः।

प्रतिहर्त्रपच्छेदपूर्वत्वे "तद् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात्" इति वचनबलेन तस्य प्रामाण्यम्, अत्र तु न वचनसिद्धं प्रत्यक्षप्रामाण्यम्, अतः प्रत्यक्षाप्रामाण्यम्, अतः प्रत्यक्षस्यागमेनात्यन्तबाध एव

वस्तुतस्तु प्रतिहर्त्रपच्छेदनिमित्तप्रायश्चित्तस्योद्गात्रपच्छेदनिमित्तप्रायश्चित्तेन बाध आत्यन्तिक एव युक्तः, न तु बाधितस्यापि सावकाशत्वं विना वचनं कल्पयितुं शक्यते। प्रकृते तु प्रतिहर्त्रपच्छेदनिमित्तप्रायश्चित्ते बाधिते पुनरनुष्ठानं "तद् दद्याद् यत्पूर्वस्मिन् दास्यन् स्यात्" इति वचनेन प्रतिपाद्यते, इति 'क्षिमिव वचनं न कुर्यात्, नास्ति वचनस्यातिभारः' इति न्यायसिद्धं तस्य सावकाशत्वम्। न चात्रागमबाधिते प्रपञ्चसत्यत्वे पुनस्तत्सत्यत्वप्रतिपादकपरं किमपि वचनं श्रूयते, येन नात्यन्तिकबाधः प्रत्यक्षस्य स्यादित्यपच्छेदन्यायेन सर्वथा बाध एव प्रत्यक्षस्य स्वीकर्तव्यः। तेन च तदनन्यत्वाधिकरणसिद्धो ब्रह्मव्यतिरेकेण प्रपञ्चाभाव एव प्रामाणिकः सिद्ध्यति।

प्रतिहर्त्रपच्छेदपरत्वे पूर्वस्य बाध एव, इति प्रत्यक्षबाधायोगेनापच्छेदन्यायवैषम्यकल्पना युक्ता

न ह्यपच्छेदन्याये सर्वत्र बाधितस्यापि पूर्वस्य सावकाशत्वं विनापि वचनं कल्पयितुं शक्यम्; अन्यथा यदि प्रथममुद्गात्रपच्छेदः, अनन्तरं च प्रतिहर्त्रपच्छेदः, तत्र प्रतिहर्त्रपच्छेदेनोद्गात्रपच्छेदनिमित्तेऽदक्षिणयज्ञसंस्थापनपूर्वकपुनर्यज्ञानुष्ठाने बाधिते प्रतिहर्त्रपच्छेदनिमित्तप्रायश्चित्तानन्तरं पुनरप्युद्गात्रपच्छेदनिमित्तप्रायश्चित्तस्यानुष्ठानमापद्येत, इति तत्रात्यन्तिक एव बाधः परेण पूर्वस्य। अतो बाधितस्यापि कुत्रचन सावकाशत्वं वर्णनीयमिति कृत्वा नापच्छेदन्यायवैषम्यं शङ्कितुं शक्यम्।

न्यायचन्द्रिकामतेन दृश्यत्वहेतुसमन्वयः, दृश्यत्वस्य दृग्भिन्नत्वस्य विपक्षणेन फलव्याप्यत्व-वृत्तिव्याप्यत्व-साधारण-पक्षत्रयस्यापि निरासेन

अत्र मिथ्यात्वानुमाने दृश्यत्व-जडत्व-परिच्छिन्नत्वांशित्वरूपाश्चत्वारो हेतवः। तत्र न्यायचन्द्रिका—"दृश्यत्वं नाम फलव्याप्यत्वं वृत्तिव्याप्यत्वं साधारणं वेति त्रीनेव कल्पान्

पूर्वपक्षमुखेनोपक्षिप्य नाद्यः, अतीन्द्रियेऽभावेन भागासिद्धत्वात्, न द्वितीयः; ब्रह्मणोऽपि वेदान्तिभिर्वृत्तिव्याप्यत्वाभ्युपगमादनैकान्तिकत्वात्, न तृतीयः; ब्रह्मण्यनैकान्तिकत्वादेवेति निरस्य कमपि पक्षं नात्र समर्थयति; परन्तु नात्रौदासीन्यं मन्यते।

तदीयमत्र समाधानं तु—अयुक्तमेतत्; वृत्तिज्ञानमनभ्युपगच्छतामित्थं विकल्पानुत्थानात्, तदभ्युपगमे तेषामपसिद्धान्तनिग्रहात्। शिष्यश्चोदयतीति चेत्, स इत्थं शिक्षणीयः—दृश्यपदार्थ एव त्वया नावगतः। दृश्यत्वं हि दृगवच्छिन्नत्वम्। दृग् आत्मा। तेन ज्ञाततया, अज्ञाततया वा साक्षिवेद्यम्। अतो न दृश्यत्वस्यानात्मनि क्वचिदप्यसिद्धिरिति। आत्मनश्च स्वसंवेदनात्मतायाः प्रतिपादनीयत्वात्" इति।

न्यायामृतकारस्य दृश्यत्वस्य कल्पान्तरमादाय निरासः, अद्वैतसिद्धेः फलव्याप्यत्वातिरिक्तसर्वपक्षसमर्थनं च

तत्र दृश्यत्वं फलव्याप्यत्वं वृत्तिव्याप्यत्वं साधारणं वेति विकल्पत्रयमाशङ्क्य त्रितयमपि न हेतुरित्यत्र चित्सुखाः पूर्वपक्षः। सिद्धान्ते तु न कस्यापि पक्षस्य समर्थनं कृतम्, किन्त्वंशित्वरूपहेत्वन्तरेण कार्यसामान्यमिथ्यात्वं साधितम्। इदं छिद्रं दृष्ट्वा न्यायामृतकार उक्तवान्—त्रीन् विकल्पानतिरिच्य कदाचित् कथञ्चिद्विषयत्वं वा, स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिर्वा, अस्वप्रकाशत्वं वा इत्यपरानपि कल्पान् संकलयति, अद्वैतसिद्धिस्तु फलव्याप्यत्वातिरिक्तस्य सर्वस्य पक्षस्य क्षोदक्षमत्वादिति दृश्यत्वहेतुं समर्थयति।

तत्त्वप्रदीपिकाया दृश्यत्वहेतुस्यालेंऽशित्वहेतुसमादरः, दृग्भिन्नत्वरूपदृश्यत्वहेतुसमादरसूचना च

तत्त्वप्रदीपिका तु न्यायचन्द्रिकागतान् त्रीनेव प्रकारान् दृश्यत्वस्य पूर्वपक्षस्यावसरे संगृह्य तेषामसंभवं च पूर्वपक्षयित्वा तत्र किमपि समाधानं न्यायचन्द्रिकोक्तप्रकारेणाप्यसंकलय्यांशित्वहेतुत्वमेव तत्र मन्यते, परन्तु तत्र दृग्दृश्यसम्बन्धानुपपत्तिमुपपादयन्ती सा दृक्तादात्म्यरूपं न्यायचन्द्रिकोक्तं हेतुं समाद्रियत इवेति प्रतिभाति।

वृत्त्यभ्युपगमेन वृत्तिविषयत्वरूपदृश्यत्वस्य ब्रह्मणि व्यभिचारपरिहारेण समर्थनमद्वैतसिद्धेः, न्यायामृतोल्लिखितसर्वदृश्यत्वप्रकारसमर्थनं च।

इदं छिद्रमवलोक्य न्यायामृतमुक्तांस्त्रीन् प्रकारानिवापरानपि त्रीन् प्रकारान् हेतोः संदृश्य दृश्यत्वानुमाने हेतुं निरस्यति। परन्तु इतःप्राक्तनं न्यायचन्द्रिकाविवक्षितं तत्त्वप्रदीपिकयाऽर्थापत्तिविधया निरूपितं च प्रकारं दृश्यत्वस्य न मात्रामात्रेणापि स्पृशति। एवं संकल्प्य न्यायामृतं वेदान्तिभिर्वृत्तिस्वीकारात् तन्मतरीत्यैव दूषणं परीत्या परस्य निरसनं कर्तव्यं मत्वा वदति। तेन च न्यायचन्द्रिकायाः परिहारः सूच्यत इव। सिद्धिकारास्तु यद्यद्वैतदृष्ट्या वृत्तिमभ्युपगम्य दृश्यत्वहेतुनिरसनं क्रियते, तर्ह्यद्वैतसिद्धान्ता वृत्तिविषये सर्वेऽपि प्रकाराः श्रिश्यन्ताम्, येन ब्रह्मण्यनेकान्तिकत्वादिदूषणानामतीन्द्रिये भागासिद्ध्यादिपरिहाराणाञ्च प्रकारा अवगन्तुं शक्यन्त इति मन्यन्ते। तत्राद्वैतमतरीत्या फलव्याप्यत्वमात्रं न दृश्यत्वमत्र हेतूक्रियते, किन्त्वपरे न्यायामृतोल्लिखिताः पञ्चापि प्रकाराः समर्थ्यन्ते।

मिथ्यात्वानुमानस्य मिथ्यात्वविषयकत्वमध्यापनविधिप्रयुक्तत्वम्, स्वविधिप्रयुक्तत्वं वाऽध्ययनस्येति तत्त्वप्रदीपिकोक्तविधया, तेन मिथ्यात्वस्य मिथ्यात्वेऽपि न प्रपञ्चसत्यत्वम्

अत्र मिथ्यात्वमिथ्यात्वेऽपि प्रतियोगिनो न सत्यत्वमिति द्वितीयमिथ्यात्वावसरे तदतात्त्विकत्वपक्षोपपादनावसरे सिद्ध्यादौ सम्यग् विवेचितम्। अत्र तत्त्वप्रदीपिकोक्तं मिथ्यात्वानुमानस्य स्वविषयविषयकत्वमध्यापनविधिप्रयुक्तस्याध्ययनस्यापि स्वविधिप्रयुक्तत्ववदेकावच्छेदकावच्छेदेन समर्थितमित्यनुसन्धेयम्।

परस्पराध्यासोऽधिष्ठानस्य संसर्गमात्राध्यासेन, न स्वरूपाध्यासेनारोप्याणामिवेति ब्रह्मसिद्धिव्यवस्थाया न्यायामृतेनापि स्वीकारः

तत आभाससाम्यभङ्गावसरे ब्रह्मणोऽपि मिथ्यापत्तिर्या शङ्किता, तत्रापि दृश्यत्वादिकमेव हेतूक्रियते, न तु परस्पराध्यासः, तेन च परस्पराध्यासो ब्रह्मण्यानारोपिते संसर्गाध्यास-

मात्रेणेति ब्रह्मसिद्धिव्यवस्था न्यायसुधादिभिराश्रिता निरवद्येति न्यायामृतमपि स्वीकरोति । तथा-नारोपितेऽधिष्ठाने संसर्गाध्यासेऽप्यधिष्ठानविषयमेवाज्ञानं कारणम्, न त्वारोपितविषयमिति गुरुचन्द्रिकायुक्तमनुसन्धेयम् । तेन ह्यारोपितस्य परस्पराध्यासेऽधिष्ठानत्वं नापद्यते । तदेवं प्रत्यक्षादिना संभाव्यमानदोषेण श्रौतस्य मिथ्यात्वस्याबाध उपपादितः ।

जगत्कारणत्वादिपराणामागमानामध्यारोपापवादन्यायेन प्रवृत्तत्वात्, तेषामागमत्वेऽपि बाध्यतैव, न तु बाधकता

अर्थभावेऽपदोषागमेन तादृशस्यागमस्याबाधशङ्का तु जगत्कारणत्वाद्यागमस्याध्यारोपेणैवापवादार्थं प्रवृत्ततया 'इदं रजतम्', 'नेदं रजतम्' इत्यनयोरिवोभयोरपि प्रत्यक्षत्वाविशेषेऽप्यपवादेनारोपबाधस्यैव युक्तत्वादध्यारोपापवादस्थले उभयोरपि वाक्यैकवाक्यतयाऽन्वयानुभावकत्वात्, अध्यारोपस्य शब्दार्थत्वमात्रत्वात्, "अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्यात् शब्दार्थस्त्वप्रयोगभूतः" इति न्यायेनाध्यारोपेण विरोधस्याकिञ्चित्करत्वात्, अपच्छेदन्यायेन परेणापवादेन पूर्वस्यैव बाधस्य युक्तत्वाच्च नावसरति ।

सावकाशनिरवकाशन्यायो निराकाङ्क्षवाक्यार्थस्यास्ति, कारणवाक्यादिषु त्वप्राप्तानुपपत्तिन्यायः, अतः कारणवाक्यानामध्यारोपापवादन्यायेन प्रवृत्तानां न तन्न्यायेन व्यवस्था

तत्र सावकाशनिरवकाशादिन्यायेनागमस्य बाधाशङ्का तु—तत्र इदंत्रोभयोरपि निराकाङ्क्षवाक्यार्थत्वेनाप्राप्तानुपपत्तिन्यायस्यानवतारात् नावसरति । एतदुदाहरणेषु "आदित्यो यूपः" इत्यादावर्थवादस्य पदस्थानीयत्वात्, विध्येकवाक्यतयैव तस्य प्रामाण्यात्, तस्याप्रयोगभूतत्वाच्च न विध्येकवाक्यतार्थं तात्पर्यान्यथानुपपत्त्याऽर्थान्तरपरता दोषाय । "सोमेन यजेत" इत्यत्रापि पदार्थमात्रत्वात् सोम-यागयोरन्वयो विरुद्ध इति कृत्वैव विशिष्टलक्षणा स्वीक्रियते । प्राचीनमीमांसकास्तु शास्त्रदीपिकाकारादयः 'दध्ना जुहोति' इत्यादिगुणमात्रविधानस्थलेऽपि—

"विधाने वाऽनुवादे वा यागः करणमिष्यते ।
तत्समीपे तृतीयान्तं तद्वाचित्वं न मुञ्चति ॥"

इति वचनमुपष्टभ्य तात्पर्योपपत्त्यर्थमेव मत्वर्थलक्षणां स्वीकुर्वन्ति । खण्डदेवस्तु 'सोमेन' इति तृतीयाया इत्थम्भूतलक्षणार्थत्वमूरीकृत्य विशिष्टविधिपक्ष इव । पार्ष्ठिकबोधेन याग-

करणत्वं सोमस्य सुपपादमिति लक्षणापक्षं परिजहातीति त्वन्यदेतत्। इदमेवाभिप्रेत्याद्वैतसिद्धिः— तदुक्तमानन्दबोधाचार्यैः—

"तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम्।
पूर्वस्य बाधकं नायं सर्वं इत्यादिवाक्यजात् ॥"

इति। मानान्तराबाधितं हि परशास्त्रं स्वविरुद्धस्य पूर्वस्य बाधकम्, तात्पर्यविषय एव चार्थे प्रामाण्यात् प्रमाणस्य सतः परस्यैव प्रामाण्यं स्वीकर्तव्यम्। सर्वथाऽऽगमेनापि परेणापवाद-विधया प्रवृत्तस्य बाध एवागमस्यापि। अत्रोत्सर्गापवाद-सावकाश-निरवकाशादिबहुतरतत्तन्न्या-याबालम्बनागमस्याप्यागमान्तरविरुद्धस्य विरोधपरिहारार्थे प्रमाणविशेषस्य प्रमाणविशेषबाधे प्रसक्ते तद्वारणम्, तत्तद्विषयसंकोचाद्युदाहरणं तु तेषामप्यारोपापवादविषयाऽप्रवृत्तत्वात्, पौर्वापर्यनिय-माभावात्, विध्यर्थवादयोरिव पदैकवाक्यतया, वाक्यैकवाक्यतया वान्वयाभावाद् विषयभेदा-द्याकिञ्चित्करम्, इति नागमस्य प्रपञ्चमिथ्यात्वपरस्यापातततस्तस्य तत्सत्यत्वपरमूलस्यागमस्य च न बाधशङ्काऽप्यत्र।

मिथ्याभूतस्याप्यर्थक्रियाकारित्वस्याऽऽक्षेप-समाधानाभ्यां सत्त्वस्य कारणता-नवच्छेदकत्वादिनोपपादनम्

तत्रेयं शङ्का समुदेति–मिथ्यात्वे प्रपञ्चस्य कथमर्थक्रियाकारित्वमिति, इत्युक्तशङ्कानिरासार्थ-मुपरितनं प्रकरणम्—असतः साधकोपपत्तिप्रकरणं नाम। तत्रेदं प्रष्टव्यम्—सत एवार्थक्रियाकारि-त्वमित्यत्रोभयसम्मतं निदर्शनं किं नामेति? किमिदं सत्त्वस्यापि कारणतावच्छेदकत्वमभिप्रेत्य, उत तत्तत्पदार्थस्वरूपमात्रमर्थक्रियाकारीति मत्वा। आद्ये किं नाम सत्त्वमर्थक्रियाकारिता-वच्छेदकम्, किं त्रिकालाबाध्यस्वरूपं सत्त्वम्, उत तत्तद्व्यवहारमात्रनिर्वाहकं यावद्बाधं व्यावहारिकसत्त्वम्, उत सत्ताजात्यादिमत्त्वम्, उत कालसम्बन्धमात्रम्। तत्र न कारणता-वच्छेदकत्वं सत्त्वस्य कस्यापि—

"अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः॥"

इति खण्डनखण्डितम्।

तत्र पदार्थस्वरूपमात्रस्य तावदर्थक्रियाकारित्वं तु प्रातिभासिकस्य, व्यावहारिकस्य चानिर्वचनीयस्यापि सदसद्विलक्षणस्वरूपत्वान्न विरुद्धम्। अर्थक्रियाकारित्वञ्चेदं सत्त्वं निरस्याभावस्य कस्याप्यर्थक्रियाकारिणो नाद्वैतमार्गेऽपि संगतिः; असतो गगनकुसुमस्यार्थक्रियाकारित्वाभावात्, उपहितस्योपाधिवचनाप्रामाण्यात्, अन्येषामनिर्वचनीयानां मिथ्यात्वप्रसङ्गात्, परमतेऽपि घटादीनां मिथ्यात्वाभ्युपगतानामप्यर्थक्रियाकारित्वाच्च। तत्स्वरूपस्यानिर्वाच्यत्वं तु सत्त्वे घटाकालादिरूपं घटादिज्ञानविषयाणामभावादीनामप्यर्थक्रियाकारित्वात्, अर्थक्रियाकारित्वोपगतस्य धर्मस्यानिर्वचनीयसाधारण्यान्नासतोऽप्यर्थक्रियाकारित्वविरोधि।

असतोऽर्थक्रियाकारित्वेऽसत्पदेन सद्विविक्तत्वमात्रं विवक्ष्यते, तच्च सदसद्विलक्षणसाधारणमित्यादिव्यवस्थायाः सोदाहरणनिर्देशम्

असत्पदेन चात्र सद्विविक्तत्वं विवक्ष्यते, न शशशृङ्गादिकम्। न चानिर्वचनीयस्य कस्मिंश्चिदुपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपमसत्त्वम्, येन शशविषाणादिवदर्थक्रियाकारित्वाभावेऽनिर्वचनीयत्वं न स्यात्। न च सद्विलक्षणत्वमेव इवार्थक्रियाविरोधि; सिद्धान्तेऽसद्विलक्षणस्यैवार्थक्रियाकारित्वप्रयोजकत्वात्, सदसद्विलक्षणेऽनिर्वचनीयेऽसद्विलक्षणमात्रेण सद्विलक्षणेऽप्यर्थक्रियाकारित्वोपपत्तेः, स्वाप्निकानामिवानिर्वचनीयानां रेखागवयादीनामप्यर्थक्रियाकारित्वदर्शनाच्च। न च तत्र तज्ज्ञानमेवार्थक्रियाकारि; विषयाविशेषितस्य ज्ञानस्य स्वरूपसाम्यात् सर्वस्य ज्ञानस्य सर्वार्थक्रियाकारित्वापत्तेः, अर्थोपलक्षणमात्रेण ज्ञानस्य विशेषे तु सर्वत्रैवार्थक्रियाकारित्वापत्त्यार्थस्यासतोऽर्थक्रियाकारितायामर्थक्रियाकारिताकथाया भङ्गापत्तेः, ज्ञानस्यापि शुक्तिरूप्याद्याकारस्याविद्यावृत्तित्वेन प्रातिभासिकत्वेनाबाध्यत्वरूपसत्त्वाभावाच्च।

ज्ञानमात्रस्य स्वाप्नादौ नार्थक्रियाकारित्वम्, किन्त्वर्थाध्यारोपितस्यैवेति बहुतरोदाहरणेन निष्कर्षः

अयमत्र निष्कर्षः—

असतः बाधकत्वाभावे बिम्बरूपेण सतोऽपि प्रतिबिम्बाकारेणासतः प्रतिबिम्बस्य, स्वाप्नार्थस्य, स्फटिकारोपितलौहित्यस्य च शुभाशुभसूचनोपाधिसन्निधानसाधकत्वमनुभूयमानं

बाधितं स्यात् । एतेन रेखारोपितवर्णप्रत्यायकत्वं वर्णारोपितदैर्घ्यस्यार्थभेदप्रत्यायकत्वं च व्याख्यातम्; ककारं लिखति गकारं पठतीत्यादिसार्वलौकिकव्यवहारेण रेखाणामेव वर्णात्मत्वारोपेणार्थप्रत्यायकत्वम्, न तु तत्स्मारितवर्णानामित्यङ्गीकरणीयत्वात् । ध्वनीनामस्फुरणेऽपि दीर्घो वर्ण इति प्रत्ययेन दैर्घ्यादीनां वर्णे समारोपस्यैवाङ्गीकरणीयत्वाच्च । अत एव हि सवितृसुपिरादेः, तज्ज्ञानस्य चाऽरिष्टबाधकत्वमुपपद्यते; अवच्छिन्नस्य जनकत्वेऽवच्छेदकस्यापि तत्त्वावश्यकत्वात् । घटदेशकालौ गृहीत्वा ग्राह्यस्य तद्भिन्नदेशकालत्वस्य घटाभावादिसंबन्धस्य घटेनापि संबन्धे तद्देशकालभिन्नदेशकालत्वस्यैव व्याहत्यापत्त्या घटस्याभावे, वेदान्तसाध्यत्वे नित्यत्वविरोधापत्त्या ब्रह्मणो ज्ञाने, स्वस्य स्वजनकत्वे प्रतियोगि-प्रागभावयोः समकालिकत्वापत्त्या घटस्य प्रागभावे, प्रतियोगि तदभावयोः सदावृत्त्या भ्रम-प्रत्यवाययोरनुपपत्तिप्रसङ्गेन विशेषदर्शनविहितकरणयोस्तदभावे च सिद्धे इच्छानुपपत्त्या कामनाया एव व्याहत्यापत्त्या स्वर्गस्य कामनायाः, कार्याव्यवहितपूर्वकाले स्व-स्वव्याप्यान्यतरसत्त्वापत्त्याऽतीतस्य स्मृतौ, निःस्वरूपत्वव्याघातापत्त्याऽसतः परोक्षज्ञाने, घटस्यापि स्वजनकत्वे चिकीर्षाया एव व्याहत्या चिकीर्षाया घटस्य ज्ञाने, शुद्धब्रह्मणो वृत्त्यविषयत्वेन निवर्तकत्वायोगेन ब्रह्मणो ज्ञाने च विशेषणत्वस्य बाधादुपलक्षणत्वाङ्गीकारेऽपि सूर्यसुपिरादिज्ञाने सूर्यसुपिरादेर्विशेषणत्वे बाधकाभावान्नोपलक्षणत्वमित्यथतो विषयस्यापि साधकत्वस्यानुभवात् । अत एव शुक्तिरूप्यसर्पविज्ञानेनोत्कृष्टभयाद्यनुविधानोपपत्तिः ।

एतेन ज्ञानत्वेनैव जनकत्वम्, न तु विषयावच्छिन्नत्वादिनेति वस्तुतस्त्वित्यादिना प्रतिपादितं निरस्तम्; स्वरूपस्य सर्वज्ञानसाधारण्याभावेऽनुगतस्य कस्यचन धर्मस्यैवासर्पज्ञानादिव्यावृत्तिप्रयोजकत्वस्य वर्णनीयतया, तस्य च चाक्षुषत्वादिना सांकर्येण ज्ञानत्वजातिरूपत्वासंभवात् स्वरूपसंबन्धेन वाऽध्यासिकसंबन्धेन वा ज्ञानसंबन्धिविषयरूपस्य एव पर्यवसानाद्विषयस्यापि साधकत्वस्यैव युक्तत्वात् ।

एतेन—तज्जनकविलक्षणजन्यत्वेन तज्जन्यविलक्षणजनकत्वेन च हेतुना धर्मान्तरसंबन्धानपेक्षवैलक्षण्यानुमानमपि—पराहतम्; उक्तप्रकारेण विषयसंबन्धमपेक्ष्यैव वैलक्षण्यस्य वर्णनीयतया बाधात्, घटरूपोपाधिसंबन्धेनैव विलक्षणे घटसंयोगे व्यभिचारात्, अप्रयोजकत्वाच्च । अतीतादेरपि व्यावृत्तिजनकधीविषयत्वं व्यावर्तकत्वं विद्यत एवेति नानुपपत्तिः । एतेन—विषयस्येव विषयावच्छिन्नज्ञानस्यापि मिथ्यात्वमिति—सूचितम् । तुच्छत्वादर्शनमप्यबाधकम् । वस्तुतस्तु सर्वं न तावत् कारणतावच्छेदकम्, न वा तुच्छविलक्षणत्वम्, किन्तु दण्डत्वादिकमेव, तद्भेदाच्च कारणमपि भिन्नभिन्नम् । तथा च जनकत्वाद्यनुसारेण न सत्त्वासत्त्वसिद्धिः । तदुक्तं खण्डनकृद्भिः—

"पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥
अन्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः।
नान्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः ॥ इति।

एतेन—

अन्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः।
नान्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः" ॥

इति साम्यापादनम्—पराहतम्; अधिष्ठाने मया स्वरूपेण सत्ताङ्गीकारवत् त्वया तदनङ्गीकारेण वैषम्यात्। "कथमसतः" इति श्रुत्यादिकं तु तुच्छे जनकत्वनिषेधपरं नास्माकं प्रतिकूलम्; असन्मतेऽपि तुच्छस्य जनकत्वानङ्गीकारादिति सर्वमनवद्यम्।

दृश्यत्वस्य ज्ञानजन्यफलाधारत्वादिरूपस्य मिथ्यात्वाप्रयोजकत्वे सत्यत्वापत्तिः, अन्यथा दृक्तादात्म्यानुपपत्तिः, वृत्तिव्याप्यत्वं विषयत्वं तूपहितस्यैव, इति न ब्रह्मणः शुद्धस्य तेन मिथ्यात्वम्

तदेवं मिथ्याभूतस्यार्थक्रियाकारित्वात् तस्यासाधकत्वेऽनुपपत्तेर्दृश्यत्वेन मिथ्यात्वानुमाने न कोऽपि बाधः। तत्र दृश्यत्वस्य मिथ्यात्वाप्रयोजकत्वशङ्का तु सत्यत्वानुपपत्तिरेव बाधिकेति निरूपणार्थमनन्तरं प्रकरणम्।

तत्र—(१) ज्ञानजन्यफलाधारत्वम्, (२) ज्ञानजन्यहानादिबुद्धिगोचरत्वम्, (३) ज्ञानकर्मत्वम्, (४) ज्ञानाकारसमर्पकत्वम्, (५) दृश्यमानत्वविशिष्टत्वम्, (६) ज्ञानजन्यव्यवहारयोग्यत्वम्, (७) तत्संनिकृष्टकारणजन्यज्ञानसम्बन्धित्वम्, (८) यस्यां संविदि योऽवभासते, स तस्या विषयः, तथा च संविदि भासमानत्वम्, (९) सम्बन्धान्तराद् ज्ञानावच्छेदकत्वं दृश्यत्वं यद्यपि जन्यज्ञानविषयत्वमादाय वक्तुं शक्यम्; तथापि तदिदं दृश्यत्वं प्रातिभासिकसाधारणम्, संविन्मात्रसम्बन्धिविद्यादावनादावव्याप्तम्, तस्या विना जन्यज्ञानं साक्षिमात्रभास्यस्यानादेर्दृग्ध्यस्तत्वमात्रेणैव दृक्तादात्म्याभिधानस्य संभवात्; अन्यथा तन्मिथ्यात्वानुपपत्तेः।

अत एव न्यायचन्द्रिकायां दृक्तादात्म्यरूपमेव दृश्यत्वमत्र हेतूक्रियते। अद्वैतसिद्धौ तु वृत्तिव्याप्यत्वं ब्रह्मसाधारण्याभावेऽपि यद्धेतुत्वेन विवक्षितम्, तदिदं ब्रह्माखण्डं न वृत्तिव्याप्यमपि, किन्तु वृत्त्याऽऽवरणाभिभवे स्वप्रकाशमात्रं ब्रह्म, वृत्तिव्याप्यमुपहितं तूपहितरूपेण मिथ्यैवेति निरूपितम्। तथा च ब्रह्मणोऽपि दृक्तादात्म्यवद् वृत्तिव्याप्यत्वस्याप्यसंभवान्नानैकान्तिकत्वापत्तिः। एतत्प्रस्थानेऽविद्यादीनामपि प्रत्यक्षानुमानागमादिविषयत्वम्, वृत्तिविषयत्वेन मिथ्यात्वं च नानुपपन्नम्। नित्यपरोक्षगुरुत्वादीनामपि वृत्तिव्याप्यत्वमसत्त्वापादकाज्ञानाविषयत्वप्रयोजकविशिष्टचैतन्याध्यस्तत्वेनैव वृत्तिव्याप्यत्वात् तन्मते मिथ्यात्वोपपत्तिः। व्यवहारविषयत्वं त्वखण्डब्रह्मातिरिक्तस्यैव, इति तदन्यथानुपपत्त्या मिथ्यात्वमपि दृक्तादात्म्येनैव। वृत्त्युपहिते ब्रह्मणि वृत्तेर्दृक्तादात्म्यमादाय मिथ्यात्वव्यपदेशः। ज्ञानस्य परोक्षत्वापरोक्षत्वविभागादिकमपि न वृत्तिसम्बन्धमात्रेण, किन्तु तदवच्छिन्नचैतन्याध्यासेनैव। न च चैतन्यमात्राध्यासेन परोक्षत्वापरोक्षत्वविभाग उपपद्यते, किन्तु तदर्थं वृत्तिनिर्गमनादेोऽपि, येन प्रतिकर्मव्यवस्थादिकमुपपद्येत। यद्यपि दृक्तादात्म्यरूपदृश्यत्वज्ञानं वृत्तिसापेक्षम्; तथापि मिथ्यात्वप्रयोजकत्वं तादात्म्यस्यैव मुख्यम्; अत एव वृत्तिव्याप्यतापीत्यभिप्रेत्यैव न्यायचन्द्रिका दृक्तादात्म्यं दृश्यत्वमेव मिथ्यात्वप्रयोजकमिति वदति। सर्वत्र वृत्तेरुपयोग आवरणाभिभवार्थः। ब्रह्मव्यतिरिक्तेषु त्वावरणाभिभवार्थोऽपि, साक्षिचैतन्याभेदार्थोऽपि, चिदुपयोगार्थोऽपि वा। अधिकं सिद्धान्तलेशसंग्रहादौ व्यक्तम्।

ब्रह्मण इदन्तया वेद्यत्वाभावः; आवरणाभिभवमात्रार्थत्वाद् वृत्तेः

ब्रह्म नेदन्तया वेद्यम्, किन्त्वविद्यानिवृत्तिमात्रार्थतया। अत एव भगवत्पादभाष्यं "न हि शास्त्रमिदन्तया ब्रह्म बोधयति, अविद्यानिवृत्तिपरत्वाच्छास्त्रस्य" इति। तद्धि स्वप्रकाशं न स्वप्रकाशार्थं वृत्तिमपेक्षते। इदमेवाध्यासभाष्योपक्रमे "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोः" इत्यनेनापि सूच्यत इति प्रागेव व्यक्तीकृतम्।

एकमेवेत्यादिश्रुत्यर्थविचारः

तदेवं प्रतिकर्मव्यवस्थानुपपत्त्या दृश्यत्वस्य साक्षात्, परम्परया वा दृक्तादात्म्यरूपस्य मिथ्यात्वं विना ब्रह्मव्यतिरिक्तस्यानुपपत्त्या प्रत्यक्षानुमानादीनां मिथ्यात्व एव तात्पर्यस्य युक्तत्वेन

प्रपञ्चमिथ्यात्वमुपपादितम्। ततः प्रकरणचतुष्टयेन मिथ्यात्वश्रुतीनामुपपत्तिः। तत्राद्वैतसिद्धिकारैः "एकमेवाद्वितीयम्", "तरति शोकमात्मवित्" इत्यादिमिथ्यात्वपराणां वाक्यार्थो निर्णीयते, यदधिकृत्य तन्मिथ्यात्वलक्षणविचार एव विशदीकृतम्।

दृष्टिसृष्टिवादे तु सिद्धिकाराश्चन्द्रिकाकाराश्च स्वीयं वक्तव्यं सम्यगेव विवेचयन्ति।

एकजीववादनिष्कर्षः

एकजीववादेऽद्वैतसिद्धिनिष्कर्षस्तु—अविद्यावशात् सर्वशरीरेषु संसरतः समष्ट्यभिमानिन एव मुख्यजीवत्वेन, तस्यासुप्तत्वेन, सुप्ते च तस्मिन् लयकाले जगदप्रतीतेरिष्टत्वात्, संस्कारस्य कारणात्मनाऽवस्थितेः सुप्तपुनरुत्थानोपपत्तेः, समष्ट्यभिमानिन एव तदैक्येन प्रतिशरीरमहंममत्वविषयत्वेन च 'तव' 'मम' इत्यादिविकल्पाद्यनुपपत्तेः, ब्रह्मण एव जीवत्वेऽपि बन्धस्याऽऽविद्यकत्वेन नित्यमुक्तत्वश्रुतिविरोधाभावात्, भिन्नभिन्नान्तःकरणाभेदाध्यासेन तत्तदन्तःकरणमादाय प्रत्यक्त्व-पराक्त्वादिव्यवस्थोपपत्त्या तत एव चैत्रसुखानां मैत्रेणानुसन्धानस्य "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते" इत्येकत्वश्रुतिविरोधेनाविद्यायामित्यादिश्रुतेर्भ्रमप्राप्तबहुत्वादेवोपपत्तेर्वर्णनीयतयाऽविद्या कर्म बन्धादीनामनेकधर्मत्वोक्तश्चोपपत्त्येश्वरकारणत्वव्यवस्थापनसिद्धान्तविरोधाभावस्याविद्याचिन्मात्राश्रयत्वोपपादनावसरे निरूपयिष्यमाणत्वेन चानेकशरीरैकजीववादासंभवात्, समष्ट्यभिमानिनो जीवस्यैव सर्वज्ञत्वस्य—"तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप" इति स्मृत्यनुसारेण वर्णनीयतया सर्वज्ञत्वादिश्रुतीनामुक्तस्मृतेश्च निर्विषयत्वाभावेन तद्विरोधाभावात्, सामान्यतो मोक्षोपयोगिज्ञानविशेषलिप्सुत्वेनाज्ञाततत्त्वनिरत्वेन तत्त्वमस्यादिवाक्यवक्तृत्वेन वा कल्पितस्योपदेष्टृत्वसंभवेन "यदेव भगवान्" इत्यादिश्रुतिस्मृतिविरोध-मोक्षोपदेशवैयर्थ्यानामप्रसङ्गात्, शिष्यवद् गुरोरपि कल्पितत्वेन स्वप्नगुरोरिव प्रवचनादौ प्रवृत्त्युपपत्त्या सर्वव्यवस्थोपपत्तेः, प्रमामूलकत्वाभावेऽप्यबाधितविषयकत्वेन शास्त्रप्रामाण्योपपत्त्याऽनिश्चिताद्वैतकल्पकत्वाविरोधात्, एकत्वेन वस्तुनोऽसंसारिणोऽपि शुद्धचैतन्यस्य स्वाश्रिताविद्यावशेन कल्पकत्वाद्युपपत्तेः, अपूर्वज्ञातीयानुवृत्तिप्रसङ्गेनाशास्त्रप्रामाण्यस्योत्पत्तिविरोधित्वाभावेन कारणत्वस्यैव तद्विरोधित्वेन च कारणाभावात्, पूर्वं तत्त्वज्ञानानुत्पत्तावपि कारणसमवधाने इदानीं पश्चाद्वा तत्त्वज्ञानोत्पत्तिसंभवेन शास्त्रप्रामाण्याद्दार्ढ्यतत्त्वज्ञानोत्पत्तिविषयकभ्रमादेरपि संभवात्, "तद्यो यो देवानाम्" इत्यादिश्रुतीनां प्रतिबिम्बजीवभेदानुवादकत्वेन तद्विरोधाभावादेकजीववादोऽपि युक्त एवेति।

मिथ्यात्वस्याज्ञानमूलकत्वस्याध्यासभाष्य उल्लेखात् ज्ञानस्वरूपादिविचारस्याऽऽवश्यकता

सर्वोऽप्ययं मिथ्यात्वविचारः प्रधानमज्ञानं मूलीकृत्यैवात्मानं लभते। अध्यासभाष्येऽपि "मिथ्याज्ञाननिमित्तः" इत्यध्यासेऽज्ञानस्य निमित्तत्वं प्रस्तुतम्—"तमेतमेव लक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते, तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः" इति, 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि' इति।

अविद्याविरोधित्वं वृत्तेरेव, न तु चैतन्यस्य, अतो नाविद्याया ब्रह्माश्रयत्व-विषयत्वायोगः

अत्र 'अध्यासं पण्डिता अविद्येति मन्यन्ते' इत्यत्राध्यारोपे कार्याध्यास इव मूलाज्ञानमपि निरूप्यत इति व्यवस्थानुसन्धेया। अतोऽविद्याविरोधिनी विद्येति वाक्यनिर्दिष्टा विद्या का नामेति शङ्कायां ब्रह्मसिद्धिः—"न स्वभावभूता विद्याऽविद्यानिवर्तिका; अविद्यायास्तया विरोधाभावात्, विरोधे वा नित्यनिवृत्तेर्नित्यमुक्तं जगत् स्यात्। न च विद्यान्तरमस्य विरोधिनिवर्तकम्, ऐकात्म्यवादे व्यतिरिक्तस्य तस्यायोगात्। आगन्तुकस्य ब्रह्मस्वभावत्वानुपपत्तेश्च। स्वभाव एव विद्या नाम। तस्याश्चाविद्ययाऽविरोधान्नाविद्यानिवर्तकत्वमित्याशङ्क्य—केन पुनरविद्या निवर्तते? श्रवण-मनन-निदिध्यासनाभ्यसनैः साधनभेदे प्रादुर्भवति-त्यादिनाऽविद्याविरोधिनी विद्या श्रवणादिजन्याऽखण्डाकारवृत्तिरेवेति विवेचितम्। विवरणे—"एतद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः" इति भाष्यार्थं प्रपञ्च्य निरूप्यते। ब्रह्मविद्याभरणमप्यमुमर्थं स्पष्टयति। "अविद्यानिवृत्तिपरत्वात् शास्त्रस्य" इति वाचस्पत्युपबृंहणाय सि-द्धिरिममर्थमुपबृंहयति।

अविद्यास्वरूपे सर्वदर्शनाविप्रतिपत्तिः, तस्या ज्ञानेन निवृत्तौ च

न चाविद्यायां विद्यानिवर्त्यायां विप्रतिपत्तिः, यतः सर्वप्रतिवादिभिरभ्युपगतेयम्। तथा हि शून्यवादिना सत्त्वे यथादर्शनं नाविद्या, खपुष्पतुल्यत्वे न ज्ञानबाध्यता। विज्ञानवादिनोऽपि यथावभासं ज्ञानसद्भावे नार्थापह्नवः; नीलपीताद्याकाराणां ज्ञानाद्भिन्नत्वे [illegible], अत्यन्तासत्त्वे स्वहृदि अवभासायोगात् खपुष्पम्। बाह्यार्थवादिनामपि [illegible] रजतादिज्ञानस्य [illegible] समानरूपसद्भावेनाविद्यात्मकत्वमनुमोदितं [illegible]। अतो [illegible]

अपह्नवः, इति। अनादिरप्रयोजना च मूलाविद्याऽपि ब्रह्मसिद्धिसंमता। अतस्तत्स्वरूपभेदे सत्यपि नापत्त्यपोऽविद्यायाम्, तत्त्वज्ञानेन निवृत्तौ च सम्भवति।

अविद्याया अभावविलक्षणत्वे भावत्वव्यपदेशः, तस्या भावाभावविलक्षणत्वेनानिर्वचनीयत्वमेव स्वरूपम्

अस्या अविद्याया लक्षण-प्रमाणादिकं सर्वमपि तत्त्वप्रदीपिकादौ सम्यक् परीक्षितम्, यस्य न्यायसुधादौ निरासो दृश्यते। सा च भावरूपा। भावरूपत्वं च तस्या अभावविलक्षणत्वमात्रेण, परमार्थतस्तु भावाभावविलक्षणा तृतीयप्रकारा सेतीष्टसिद्ध्यादौ व्यक्तम्।

अविद्याभावरूपत्वे द्वैतिनामविप्रतिपत्तावपि न्यायामृतेन न्यायदृष्ट्या भावत्वनिरासाद् न्यायामृतनिरासलक्ष्यत्वादत्राद्वैतसिद्धेरत्राभावत्वनिरासः, वस्तुतस्तु भावत्वनिरासोऽप्यत्र

यद्यपि द्वैतसिद्धान्तेऽपि भावरूपमेवाज्ञानम्, नाभावरूपम्; तत्रानिर्वचनीयत्वादौ विप्रतिपत्तावपि तत्राविवादात्; तथापि तस्या भावरूपत्वसमर्थनं नैयायिकादिनिरासदृष्ट्यैव, न तु स्वदृष्ट्येति तदीय एव निबन्धे व्यक्तम्, इति न्यायामृतस्य तद्भावत्वनिरासो न वस्तुगतिमनुरुध्येति तन्निरासार्थमद्वैतसिद्धिकाराणां प्रयत्नो निष्प्रयोजनः; तथापि 'गतानुगतिको लोकः' इति न्यायेन न्यायामृतगतिमेवानुरुध्याद्वैतसिद्धिरप्यत्र कृत्वाचिन्तया गच्छति।

अविद्यालक्षणानां तत्त्वप्रदीपिकोक्तानां निरूपणम्, सर्वेषां लक्षणानां तत्र समन्वयश्च

तत्राविद्यालक्षणमानादिविषये तत्त्वप्रदीपिकामेवालम्बते, प्रायेण न्यायामृतनिरासार्थमद्वैतसिद्धिः। तत्राज्ञानलक्षणमनादिभावत्वे सति ज्ञाननिवर्त्यत्वम्, भ्रमोपादानत्वम्, ज्ञानत्वेन रूपेण ज्ञाननिवर्त्यत्वं वा। तत्राद्यस्य प्रपञ्चोपादानमूलाज्ञानेऽनादिभावत्वस्य, उपादानत्वस्य च विद्यमानत्वाल्लक्षणसमन्वयः। शुक्तिरूप्याद्यज्ञानानामेव ज्ञाननिवर्त्यरूपोपादानमपीति लक्षणसमन्वयः। भावत्वं चास्याभावविलक्षणत्वमात्रेण, तस्य ज्ञानाभावत्वनिरास एव तात्पर्यात्, तस्य भावाभावविलक्षणतृतीयप्रकारत्वात् तस्याभावोपादानत्वमपि न विरुद्धम्।

तृतीयप्रकारायां अविद्याया भावा-भावोभयोपादानत्वोपपत्तिः

न चोपादानोपादेयभावे साजात्यनियम इति तु 'न विलक्षणत्वात्' इत्यधिकरणेन सिद्धान्तितम्। अतस्तस्याभावभिन्नत्वेऽपि न भावत्वम्, किन्तु सदसद्विलक्षणत्वमेव; तथापि मायानामपि सतां तृतीयप्रकारत्वमत्याहतम्। यत्किञ्चित् साधर्म्यं तु सर्वत्र सत्त्वादिना सुलभमित्यपि तत्रैव व्यक्तम्।

ज्ञानस्याज्ञाननिवर्तकत्वम्, जीवन्मुक्तानां संस्कारस्यापि ज्ञानेनैव निवृत्तिरित्यादिविवेकः

ब्रह्मणो वृत्तिविषयत्वपक्षेऽपि स्वरूपसदुपाधिमतो ज्ञानस्यैव निवर्तकत्वादज्ञानस्य ज्ञाननिवर्त्यत्वम्। जीवन्मुक्ताज्ञानसंस्कारादीनामखण्डाकारवृत्तेश्चाज्ञानयुक्तत्वेन प्रारब्धस्य प्रतिबन्ध-कस्याभावे ज्ञाननिवर्त्यत्वम्; अप्रामाण्यज्ञानानास्कन्दितपटुतमसंस्कारसहितभ्रमव्याप्युत्पद्यमानाद्-बाधावहितस्याऽऽदेहादिमोक्षमप्यसमानस्य तत्त्वज्ञानस्यैवाज्ञाननिवर्तकत्वात्, "भोगेन त्वितरे क्षपयित्वा ततः संपद्यते" इति सूत्रस्य प्रारब्धाभावसहकारबोधनमात्रे तात्पर्यात्, स्वत एव संस्काराणां निवृत्तिरित्यस्यापि विना प्रयत्नं साक्षात्कारस्यानुवृत्तिबोधन एव तात्पर्याच्च।

अविद्याया भावाभावविलक्षणत्वरूपतृतीयप्रकारत्वाविरोधः, तस्य बाधोपपत्तिश्च

सत्त्वासत्त्वयोरिव भावाभावयोरपि परस्परविरहरूपत्वाभावस्य न्यायचन्द्रिकोक्तरीत्या स्वीकर्तव्यत्वान्न तृतीयप्रकारत्वविरोधः। अज्ञानस्य यावत् स्वसत्त्वं साक्षिभास्यत्वमप्य-विद्यावृत्त्युपहितचैतन्यस्यैव साक्षित्वादविद्यानिवृत्तिकाल एव साक्षित्वस्यापि निवृत्तेः संविन्मात्रस्या-साक्षित्वाच्च बाधायोगः।

अविद्याया भ्रमोपादानत्वलक्षणस्य निर्दुष्टत्वम्

भ्रमोपादानत्वं वाऽज्ञानलक्षणम्। इदं तु मायाऽपि परिणामविभयोपादानकारणमिति विवरणमताभिप्रायेण। उपादानत्वं हि तस्याः परिणामिविधयैव विवक्षितमिति न ब्रह्मण्यतिव्याप्तिः। अत्रापि तृतीयप्रकारत्वाद् भावाभावोभयोपादानत्वं यथायथमनाहतम्। अन्यदपि लक्षणमेव-मव्याहतं द्रष्टव्यम्।

भावरूप एवाज्ञानेऽहमज्ञ इति प्रत्यक्षं प्रमाणम्

अथ भावरूपेऽज्ञाने प्रत्यक्षप्रमाणोपन्यासः। यद्यपि द्वैतमतेऽपि भावरूपमेवाज्ञानम्, नाभावरूपमिति द्वैताद्वैतमतप्रक्रियाप्रस्तावे नायं विचारः सावसरः; तथापि न्यायामृतमनुसृत्यैव 'गतानुगतिको लोकः' इति न्यायेनाद्वैतसिद्धिरप्याऽऽन्तमनुगच्छति। 'अहमज्ञः', 'मामन्यं च न जानामि' इति प्रत्यक्षमज्ञानमवगाहते, न तज्ज्ञानाभावपरम्; धर्मि-प्रतियोगिज्ञानयोः सतोर्ज्ञाना-भावानुभवविरोधात्, भावरूपत्वे त्वज्ञानस्य धर्मिज्ञानस्य साक्षिज्ञानत्वात् साक्षिणश्चाज्ञानसाध-कत्वादुपपत्तिः।

अज्ञानस्य ज्ञानाश्रयत्वोपपत्तिः, साक्षिवेद्ये सुखादौ 'सुखं न जानामि' इति प्रतीत्युपपत्तिश्च

अत्राहमर्थस्याज्ञानाश्रयत्वेन नाज्ञानानुभवविरोधः। विवरणाचार्यैरहमज्ञ इति प्रतीतौ तस्य शुद्धचैतन्याश्रयत्वेऽप्यन्तःकरणाज्ञानयोरेकत्र द्वयमिति रीत्या शुद्धचैतन्याश्रयत्वेनैवोक्तानुभवस्य व्यवस्थापनात्, साक्षिवेद्ये सुखादौ तु साक्षिणोऽज्ञानाविरोधेऽपि 'सुखं न जानामि' इत्यादिप्रती-त्यापादनं न्यायामृतगतम्, तदीयचन्द्रिकागतम्, बिन्दुटीकायां च ब्रह्मानन्दसरस्वतीभिः सुख-स्यैवाज्ञानविरोधित्ववर्णनेन परिहृतम्। अत एव 'सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षि-भास्यम्' इति विवरणमुपपद्यते।

'न जानामि' इति प्रतीतेर्ज्ञानाभावाभावविषयत्वेऽप्यज्ञानस्य भावरूपतैव

वस्तुतस्तु 'न जानामि' इति ज्ञानप्रागभावविषयमित्येनाभाववादिना स्वीकर्तव्यम्। ज्ञान-प्रागभावश्च ज्ञानस्याज्ञानावस्थैवेति तेनापि भावरूपाज्ञानविषयत्वमेव पर्यवस्यति। अत एव चा-ज्ञानोपादानता, तदीयेनावरणेन ब्रह्मणो विवर्तमानता च सिद्ध्यति। अस्याज्ञानस्य भावरूपस्य विक्षेपशक्तिः प्रायेण सर्वसंमता, तस्यावरणशक्तौ परं विवादः। अधिकमन्यत्र।

भावरूपे ज्ञाने विवरणाचार्याद्यभिमता-नुमानप्रमाणोपन्यासः, सर्वेषां भावाभावविलक्षण-तृतीयप्रकाराज्ञानसाधनत्वाविरोधः

अथाज्ञानेऽनुमानप्रमाणं यथा—(१) प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्त स्वविषयाऽऽवरण-स्वदेशगत-वस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्; अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्;

(२) चैत्रप्रमा प्रागभावातिरिक्तानादिनिवर्तिका, प्रमात्वात्; मैत्रप्रमावत्; (३) विगीतो भ्रम एतज्ज्ञानाद्यातिरिक्तोपादानकः, विभ्रमत्वात्, संमतवदिति त्रयः प्रयोगाः। तत्राऽऽद्यमनुमानमेकाज्ञानपक्षे विवरणाचार्याणाम्। एवं तृतीयानुमानमपि। द्वितीयं तु जीवाज्ञानवादं तन्नानात्ववादं चाश्रित्य। सर्वत्र प्रागभावातिरिक्तत्वमेवानुमानस्य विषयः, न तु तस्य स्वरूपं भावत्वमपि वा, तेनाज्ञानस्य न भावाभावविलक्षणतृतीयप्रकारत्वविरोधः।

अविद्यानुमाने वस्तुपदप्रयोगप्रयोजनादिः

यद्यपि प्रथमानुमाने वस्तुपदं प्रयुक्तम्; तथापि तत्तृतीयप्रकारतापक्षेऽपि तद्वस्तुत्वस्य व्यावहारिकत्वं सत्यस्यानिर्वचनीयत्वेऽपि स्वीकाराच्च श्रुतिः; अन्यथा प्रमाणेनानुमानेन प्रमाणज्ञानस्यापि पक्षत्वेऽज्ञानविषयकाज्ञानान्तरसाधनाच्चानवस्था स्यात्। अतोऽत्र प्रथमज्ञानस्य प्रागभावव्यतिरिक्तत्वमेव साध्यम्। तत्र तत्र प्रमाणज्ञानेन भावत्वमेव साध्यत इति वर्णनमपि तस्याभावव्यतिरिक्तत्वाभिप्रायमेव। तत्रैव खल्वविद्यायां विप्रतिपत्तिः; अन्यथा विशिष्य प्रागभावव्यतिरिक्तेति विशेषणं वितथम्; वस्तुपदेन भावत्वविवक्षयाऽपि प्रागभावव्यावृत्तिसिद्धेः। अत एव द्वितीयानुमाने वस्तुपदाभावः। तृतीयानुमानेऽज्ञानाद्यातिरिक्तत्वविशेषणं तु ब्रह्मोपादानकत्वमात्रमादाय सिद्धसाधनवारणार्थम्, विवरणमतेऽज्ञानब्रह्मोभयोपादानत्वस्वीकारात्। तत्र मण्डनमते, वाचस्पतिमते वा ब्रह्ममात्रोपादानकत्वस्वीकारात् तन्मतनिरासाभिप्रायं तृतीयानुमानम्।

अनृत-मायाऽज्ञान-तमोनीहारादिघटितश्रुति-
प्रमाणानामावरणशक्ति-
मति, आवरणविक्षेपशक्तिद्वयवति
वाऽज्ञाने प्रमाणानामुपन्यासः

अथाज्ञाने श्रुतिप्रमाणोपन्यासः। तत्राज्ञाने "अनृतेन प्रत्यूढाः," "विश्वमायानिवृत्तिश्च" इति च श्रुतिः। ज्ञाननिवर्त्येऽज्ञाने मानम्, मायाऽविद्ययोरैक्यात्, तस्याः शक्तिभेदमात्रत्वादाऽऽवरणनिवृत्तिपरत्वस्यैव युक्तत्वाच्च, इति। श्रुतिद्वयमिदमज्ञाने प्रमाणम्। "ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।" इति तु ज्ञाननाश्यत्वमज्ञानस्य प्रतिपाद्यते। एवम्—"नासदासीद् नोसदासीत् तम आसीत् तमसा गूढमग्रे प्रकेतम्" इति श्रुतिः सदसद्विलक्षणावरणशक्तिमदज्ञाने प्रमाणम्। अनिर्वचनीयस्यापि कालसम्बन्धस्यानिर्वचनीयस्य स्वीकारात्

'तम आसीत्' इत्यासीच्छब्दप्रयोगोपपत्तिः । किं बहुना ? मायाशब्दो मिथ्याभूतविचित्रकार्यकारिपरः, शुक्तिरूप्यादौ तत्तदुपादानाज्ञानानां भावरूपाणां स्वीकारात् । विचित्रार्थक्रियाया व्यवहार एव साक्षात् मायाशब्दप्रयोगः । सर्वथा तु वज्रादौ पृथिव्यादिव्यवहाराभावेऽपि पृथिवीत्ववद् मायाशब्दव्यवहाराभावेऽपि न दोषः, 'नैमित्तिके सति निमित्तानुसरणम्, न तु निमित्तमस्तीति नैमित्तिकारोपः' इति न्यायाच्च । नीहार-तमःशब्दावपि "नीहारेण प्रावृताः", "तमसा गूढमग्रे" इत्यादिवाक्यगतौ मायाया आवरणशक्तौ प्रमाणम् । श्रुत्यन्तराणि चात्र प्रमाणानि सविमर्शमद्वैतसिद्धौ विस्तृतानि ।

जीवस्यानवच्छिन्नानन्दप्रकाशानुपपत्तिः, भ्रमस्य सोपादानत्वानुपपत्तिश्चाविद्यायां प्रमाणम्

अर्थापत्तिप्रमाणमप्यविद्यायामद्वैतसिद्धौ सविस्तरं परीक्षितम्—तत्रैका (१) तत्राऽऽद्या जीवस्यानवच्छिन्नब्रह्मानन्दप्रकाशानुपपत्तिः, (२) भ्रमस्य सोपादानत्वानुपपत्तिर्द्वितीया । तत्र जीवस्यानवच्छिन्नब्रह्मभावो जीवत्वेश्वरत्वादिविभागशून्यतायामेव, न तूपाधिप्रयुक्तजीवत्वावस्थायाम्, जीव ब्रह्माभेदेऽपि 'सन् घटः' इत्यादौ सदात्मना यथा ब्रह्मप्रकाशोऽसत्त्वापादकाज्ञानविषयत्वमात्राभावेन, एवमानन्दात्मनाऽप्रकाशोऽपि भवितुमर्हति; तथापि सदात्मनाऽप्रकाशोऽनानन्दतापादकाज्ञानवशात्, किन्तु तत्र सदाद्यात्मनाऽखण्डाकारब्रह्मणोऽज्ञानमनाद्यविद्याप्रयुक्तं सदादिभेदमादायैवेति जीवेशादिभिरखण्डस्य ब्रह्मणः सदादिभेदः । तत्राप्यानन्दात्मनाऽप्रकाशः सदाद्यात्मनैव प्रकाश इत्यादिकमनाद्यविद्याया अनादियोगं विना नोपपद्यते । सर्वथा त्वनवच्छिन्नब्रह्मण आनन्दात्मनाऽपि प्रकाशानुपपत्तिः प्रथमाऽविद्यायां प्रमाणम् ।

भ्रमोपादानत्वानुपपत्तिर्विवरणरीत्यैवाज्ञाने प्रमाणम्

एतेन—भ्रमोपादानत्वान्यथानुपपत्तिरपि प्रमाणमिति—व्याख्यातम् । भ्रमे ह्युपादानं बाधकज्ञानबाध्यमपि तद्विषय इव; अन्यथा शुक्तिज्ञानानन्तरं बाध्यस्य रजतस्यापि रजतज्ञानस्येव मन एवोपादानकारणं स्यात्, अतो बाधकज्ञानबाध्यत्वं भ्रमोपादानस्य तस्यैव स्यात्, यत् साक्षात् तत्त्वसाक्षात्कारनाश्यं स्यात् । न चान्तःकरणं साक्षात् शुक्तिज्ञानस्यैव ब्रह्मज्ञानस्य बाध्यं स्यात् । अज्ञाननाशाधीनो ह्यन्तःकरणनाशः । अत एवास्याखण्डाकारवृत्तेरज्ञाननाशानन्तरमेव मोक्षः । अतो नान्तःकरणं भ्रमोपादानम् । अन्तःकरणं हि भ्रमविनाशकवृत्तेरुपादानम्, न भ्रम-तद्विषयोपादानत्वमर्हति; व्याघातात् । तत्रोपादानोपादेययोः समसत्ताकत्वमज्ञानोपादानतायामेव भवति,

ब्रह्मोपादानत्वं तु विवर्तविधयैव। अतः शुक्तिरूप्यादौ भ्रमोपादानत्वान्यथानुपपत्त्या तूलाज्ञानकल्पनवद् व्यावहारिकभ्रमोपादानत्वान्यथानुपपत्त्या मूलाज्ञानकल्पनमिति विवरणरीत्या व्यवस्था।

वाचस्पतिमते भ्रमोपादानत्वं नाविद्यायाः, तन्मते तस्या आवरणविधया निमित्तमात्रत्वात् तथापि ब्रह्ममात्रविवर्तोपादानत्वानुपपत्तिरज्ञाने प्रमाणम्

मण्डनमते तु नाविद्योपादानम्; ब्रह्ममात्रविवर्तोपादानत्वाद् नानुपपत्तिद्वयमप्यज्ञाने। तन्मते हि ब्रह्मैवोपादानम्, तदपि विवर्तविधयैव। तत्र विवर्तोपादानत्वमज्ञानेनाऽऽवरणविधया निमित्तकारणत्वमात्रमविद्यायाः, इति तत्र भ्रमोपादानत्वानुपपत्तिर्ब्रह्मणो विवर्तमानत्वमात्रानुपपत्तिरज्ञाने प्रमाणमेव। प्रथमा त्वनुपपत्तिरुभयत्र समानैव।

अज्ञानस्य जीवाश्रयत्व-ब्रह्माश्रयत्वेश्वराश्रयत्वपक्षास्त्रयोऽपि युक्ताः; तत्राज्ञानस्य जीवाश्रयत्वेश्वराश्रयत्वपक्षयोर्नानवस्थेत्यादि, तत्र सर्वत्र जीवस्य बन्धः, सर्वज्ञत्वं चेश्वरस्यैवेति व्यवस्था

अज्ञानस्य चिन्मात्राश्रयत्व-सर्वाश्रयत्व-जीवाश्रयत्वपक्षास्त्रयोऽद्वैतसिद्धौ समर्थिताः। इदञ्च न्यायामृतानुवादमनुसृत्य यथान्यायामृतं कृत्वाचिन्तया विचारसरणिं स्वीयामनुसृत्य। वस्तुतस्तु चिन्मात्राश्रयत्वसर्वज्ञाश्रयत्वपक्षौ द्वावेवाद्वैतमते। तत्र चिन्मात्राश्रयत्वमज्ञानोपाधित्वमात्रेण, सर्वज्ञाश्रयत्ववादस्तु तस्य विशेषणत्वाभिप्रायेण। तत्र प्रथमे सर्वज्ञत्वं सर्वतादात्म्यमात्रेणाज्ञानोपहितत्वद्विषयमात्रस्य जगत्कारणत्वस्य, द्वितीये सर्वज्ञोपाधिमायापरिणामवृत्त्याश्रयत्वेन। उभयत्र—

> "जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।
> अविद्या तच्चितोर्योगः षडस्माकमनादयः॥"

इति वचनाद् अनादित्वादविद्यायोगस्य नान्योन्याश्रयः। तत्रोभयत्राविद्याया उपाधित्वेऽपि कारणावस्थोपाधेः प्रतिबिम्बपक्षपातित्वात्, तदवच्छिन्नपक्षपातित्वादेकस्यैव बन्धापत्तिः। तत्र जीवाश्रयत्वपक्षे विशिष्टस्य जीवस्यैव बन्धः, सोऽपि पूर्वपूर्वभ्रमसंस्कृतमूलाविद्यावच्छेदेन बीजाङ्कुरन्यायेनानादिना, पक्षान्तरे त्वनादिना प्रतिबिम्बभावेन।

अहमज्ञ इति प्रतीतेर्मण्डनमते, विवरणमते चोपपत्तिप्रकारः । उभयत्रापि कारकत्व-प्रकारश्च चैतन्यस्याज्ञानाश्रयत्वाद्यविरोधश्च

'तत्राहमज्ञः' इति प्रतीतिः साक्षाज्जीवस्यैवाज्ञानाश्रयत्व एव, बिम्ब-प्रतिबिम्बभावे त्वज्ञानाहङ्कारयोरेकत्र द्वयमिति रीत्योभयोरपि 'खले कपोत'न्यायेनोभयत्र तद्बन्धमोक्षव्यवस्था बुद्ध्यादि-तादात्म्य-तदभावाभ्याम्, बिम्ब-प्रतिबिम्बवृत्तिभ्यामिति विशेषः । तत्राविद्याकारणत्वं ब्रह्मा-वरणमात्रेण तद्विवर्तोपादानताप्रयोजकत्वाद् निमित्तकारणत्वमात्रं जीवाश्रयाज्ञानवादे, अन्यत्र तु परिणामित्वेनोपादानकारणत्वं चावरणेन निमित्तकारणत्वमपीत्यभिन्ननिमित्तोपादानत्वं ब्रह्मणः । विशेषस्तु ब्रह्मण उपादानत्वं विवर्तमानत्वमात्रेण, अविद्यायास्तु परिणामित्वमात्रेण । उभयत्र चिन्मात्रस्य स्वप्रकाशस्यात्मस्वभावस्य नाविद्यया विरोधः, किन्तु श्रवणादिजन्यवृत्तेरेवेति तत्र तत्र व्यक्तम् । वक्तव्यञ्चात्र सर्वं पूर्वमेवोक्तम् । न्यायामृतस्य चिन्मात्रस्याज्ञानविरोधित्वेन तदा-श्रयत्वविषयत्वायोग इति शङ्का तु नाद्वैतसिद्धान्तमूरीकृत्य ।

चिन्मात्रस्याज्ञानविषयत्वोपपादनम्, तस्यैव वा शक्तित्रयेण 'नास्ति', 'न प्रकाशते', 'नानन्दः' इति प्रकारत्रयेणावरणात्, घटादिज्ञानमात्रेणामुक्तिश्चेत्यादि

अथाज्ञानविषयत्वे शङ्कापरिहारौ । तथाहि–अज्ञानस्य विषयोऽपि चिन्मात्रमेव; तत्रैव प्रकाशप्रसक्त्याऽऽवरणफलसंभवात् । तत्रावरणकृतये त्वसत्त्वापादकत्वशक्त्या, अभानापादकत्व-शक्त्या, अनानन्दतापादकत्वशक्त्या च 'नास्ति', 'न प्रकाशते', 'नानन्दः' इत्यभिज्ञाभिलपनादिरूपो व्यापारः । सा च शक्तिः जाग्रत्स्वप्नसुषुप्त्यवस्थासु यथासंभवं वर्तते । तत्राज्ञानसम्बन्धस्तु—

"जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥"

इति वचनादनादिः । चिदिव, अविद्याप्यनादिः । स च सम्बन्धश्चिन्मात्रस्यैवाद्वितीयत्वादि-विशिष्टचैतन्यस्य । तत्र शुद्धाश्रितः स्वप्रकाशत्वेऽपि परिपूर्णानन्दादिरूपेणाप्रकाशाच्चावरणविरोधः । जीवेश्वरयोः कल्पितभेदवत्त्वेन जीवं प्रति चैतन्याप्रकाशो वस्तुतः संविन्मात्ररूपेणाभेदेऽपि न व्याह-न्यते, अनवच्छिन्नचैतन्यरूपेण सुखं न जानामीत्यनुभवाद् ज्ञानात्मनाऽज्ञानं ब्रह्मणः । घटोऽयमित्यादि-ज्ञानेन घटाद्यवच्छिन्नचैतन्याज्ञानस्यैव नाशः, तदवच्छिन्नचैतन्याज्ञानत्वस्य तदवच्छिन्नचैतन्यज्ञा-

नेनैव निवृत्त्याऽनवच्छिन्नचैतन्याज्ञानानिवृत्त्या न घटादिज्ञानमात्रेण मुक्तिः। यावन्ति अनावच्छिन्नचैतन्यविषयज्ञानानि, तावन्ति तत्र ज्ञानानि, तावन्त्यज्ञानविषयत्वानि निवर्तन्त इति वा स्वीकारान्न कोऽपि दोषः। उपहितान्याविषयकत्वे सत्युपहितविषयकत्वस्यैव ज्ञानाज्ञानयोर्विरोधित्वस्वीकाराच्च। तथा चानवच्छिन्नचैतन्यमेवाज्ञानविषयः, तत्तदवच्छिन्नचैतन्यविषयाज्ञानान्यनवच्छिन्नचैतन्यज्ञाननाश्यानि, इति घटादिज्ञानेन न मुक्तिरिति सर्वमनवद्यम्।

सिद्धयुक्तरीत्याऽज्ञानस्याश्रय-विषयविवेकसंग्रहः

अद्वैतसिद्धिकारास्तु—स्वरूपत आश्रयतो विषयतश्चाज्ञानं सुनिरूपमेव। तथाहि—चिन्मात्रमेवाज्ञानाश्रयः। अभिज्ञादिसाधारणस्य 'नास्ति न प्रकाशते' इति व्यवहाररूपस्य, 'अस्ति प्रकाशते' इति व्यवहाराभावरूपस्य वा आवरणकृतस्य तत्रैव संभवात्। आवरणं च तद्योग्यता, अज्ञानसंबन्धरूपा सुषुप्त्यादिसाधारणी आब्रह्मज्ञानमवतिष्ठते इति सुषुप्तादौ नानावरणम्, मोक्षकाले चाऽऽवरणमापद्यते। इदं चावरणानादित्वेन चित्प्रकाशान्यत्वेन च, उत्पत्तौ ज्ञप्तौ वा न सापेक्षमिति नात्माश्रयादिकम्। सदा स्वरूपतः प्रकाशमानस्यापि शुद्धचैतन्यस्य परिपूर्णाद्याकारेणाप्रकाशमानत्वात् तत्रावरणकल्पने न किमपि बाधकम्।

अज्ञाननिवर्तकानुपपत्त्यादिपरिहारप्रकारः

एतेन—अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वरूपस्य स्वप्रकाशत्वविरुद्धे योग्यत्वायोग्यत्वे कथं ब्रह्मणि संभवतः? अज्ञानादिमत्त्वेनापरोक्षव्यवहारयोग्यत्वम्, स्वरूपेण तु नेति कल्पने स्वरूपाप्रकाशत्वापत्तिरिति वचनमपि—परास्तम्; कल्पितभेदं जीवं प्रति शुद्धचैतन्यस्यानावृतत्वमेव विवक्षितमिति न स्वप्रकाशविरोधः। भेदावरणयोरुभयोरप्यनादित्वेन परस्परानन्तर्याभावान्नान्योन्याश्रयः। कल्पितभेदस्य जीवस्यापि शुद्धचैतन्यतया जीवं प्रत्यपि चिन्मात्रप्रकाशाभावस्यैवाज्ञानसाध्यतायामपि न विरोधः। अज्ञान-तमसोर्यादृशो विरोधो न तादृश एव चैतन्याज्ञानयोः; प्रकाशमाने वस्तुन्यज्ञानानुभववदालोके तमोऽनुभवाभावात्, इति स्वरूपचैतन्यस्याज्ञानाविरोधित्वे न किमपि बाधकम्। सुखादिस्फुरणं न प्रकाशत इत्यनुभवाभावेऽप्यवच्छिन्नाकारेण न प्रकाशत इत्यनुभवाच्छुद्धचैतन्यस्याज्ञानविषयत्वे न कोऽपि दोषः। 'त्वदुक्तमर्थं न जानामि' इति भासमान एवाज्ञानानुभवात्, सामान्यनिश्चयजनितविशेषसन्देहेनेव सामान्यज्ञानजनितविशेषाज्ञानेनापि विशेषविषयीकरणस्यावश्यकत्वेन भासमानेनाज्ञानमित्युक्तानुक्तप्रत्ययविरोधापत्तेः, द्वेषस्येव द्विष्टस्याप्यवच्छेदकतया इच्छाविषयत्वात्,

ईश्वरस्य भ्रान्तिज्ञत्वस्येव भ्रमविषयज्ञत्वस्यापि विद्यमानत्वाद् अस्मदादीनामपि सर्वत्वेन सर्वज्ञानस्य विद्यमानत्वाच्च द्वेषस्येष्टत्वेऽपीत्यादिदृष्टान्तोऽप्यसंप्रतिपन्नः, इत्यज्ञानज्ञानाभावे नाज्ञानज्ञानसंभवः, इति प्रकाशमान एवाज्ञानम्। प्रतियोग्यभावयोरिव ज्ञानाज्ञानयोरपि विरोधादभावस्य प्रतियोगिसत्त्वानपेक्षत्ववदज्ञानज्ञानस्यापि स्वविषयाज्ञाननिवृत्त्यनपेक्षत्वात्, नाज्ञानाविरोधिन्या अज्ञाननिवृत्तेरपि कल्पनाप्रसङ्गः। विरोधस्य समानत्वात्तद्विषयकज्ञानापेक्षापि मास्तु, इति वर्णने तु अभावस्वभावविरोधिप्रतियोगिज्ञानविषयत्वमज्ञानस्याभाववैलक्षण्यसाधकमेवोपपादितमित्यस्मिन् मत एव पर्यवसानम्। एवं च वृत्त्यवच्छेदेन चैतन्यस्याज्ञानविरोधित्वम्, न स्वरूपत इति स्वरूपचैतन्यस्याज्ञानविषयत्वे न कोऽपि दोषः।

चिदुपरागार्था वृत्तिरिति मतेऽप्यज्ञाननिवृत्तिप्रयोजकत्वेन वृत्तेरेवाऽज्ञानविरोधित्वमिति मन्तव्यम्। जानामीति व्यवहारस्यापि वृत्तिप्रतिबिम्बितं चैतन्यमेव विषय इति न कोऽपि दोषः। वृत्तेस्तु निवर्तकत्वं प्रमाणवृत्त्युपारूढप्रकाशत्वेन विवक्षितम्, न तु जातिविशेषत्वेन, प्रकाशत्वेन वा। परोक्षवृत्तेस्तु विषयपर्यन्तत्वाभावान्न विषयाश्रिताज्ञाननिवर्तकत्वम्।

एतेन—सुखादिस्फुरणमपि—व्याख्यातम्। तत्र सुखादेर्ज्ञातैकसत्त्वेनाज्ञाननिवृत्तिं विनैवाज्ञानादर्शनादिति स्फुरणमात्रस्याज्ञानविरोधित्वे प्रमाणाभावः। परिपूर्णत्वादिनाऽप्रकाशविधुरत्वाभावेऽप्यध्यासाधिष्ठानत्वादिना प्रकाशमानत्वात् स्वसत्तायामप्रकाशविधुरत्वेन स्वप्रकाशत्वसाधनमप्युपपन्नमेव। साक्षिवेद्ये सुख दुःखादौ तु नाज्ञानप्रसक्तिः। आत्मा च प्रकाशरूपो न साक्षिवेद्यः, इति स एवाज्ञानविषयः। घटादिरिव स्वतमोनिवर्तकमालोकमात्मापि स्वतमोनिवर्तकवृत्तिमपेक्षत इति न दोषः। अत एव "सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिभास्यम्" इति विवरणवचनमुपपद्यते।

अज्ञानविशेषः, शक्तिविशेषोऽवस्थाविशेषो वाऽविद्यागतो विशिष्टगोचरवृत्त्या निवर्तत एव। प्रपञ्चोपादानमूलाज्ञानं परं भेदभ्रमस्यानुभूयमानत्वेन श्रवणादिकारणविशेषजन्येनैव ज्ञानेन निवर्तते। घटोऽयमिति ज्ञानेनापि तदवच्छिन्नाज्ञातत्वप्रयोजकाज्ञानविशेष एव निवर्तते, इति न सद्यो मोक्षापत्तिः, इति वृत्तेरेवाज्ञानविरोधित्वे न किमपि बाधकम्। तदिदम्—"आश्रयत्व-विषयत्वभागिनी निर्विभागचितिरेव केवला" इति। एतेन—आत्ममात्रदेहादिभेदो ज्ञानविषय इति पक्षोऽपि—व्याख्यातः; द्वितीयाभावोपलक्षितात्मस्वरूपमेवाज्ञानविषय इत्यङ्गीकारेऽपि न दोषः; तत्पराणामपि वाक्यानामखण्डार्थत्वानुपपत्तेर्वर्णयिष्यमाणत्वादिति निरूपयिष्ये।

अथाज्ञाने निवर्तकानुपपत्तिनिवृत्त्यनुपपत्तेराशङ्का श्रीभाष्यादावुत्थापिता, न्यायामृते न पृथगालोचिता; तथाप्यज्ञानाश्रयानुपपत्तिशङ्काबीजं ज्ञानाज्ञानयोर्विरोधकथैव निवर्तकानुपपत्तावपि बीजम्, इति तत्र निर्धारितया ज्ञानाज्ञानयोरविरोधकथयैव सापि शङ्का परिहृतप्राया ग्रन्थसिद्धयुक्तरीत्या, इति न तदर्थं पृथक् प्रकरणम्। अज्ञाननिवृत्त्युपपत्तिस्त्वनादित्वेऽप्यनिर्वचनीयस्य ज्ञाननाश्यत्वस्य श्रुतिस्मृतिसिद्धत्वान्नावसरति।

अहमात्मना कर्तृत्वाध्यासादिसमर्थनोपयोगितयाऽख्यात्यादि परीक्षाऽऽवश्यकता

तदेवमध्यासो भगवत्पादैरध्यासभाष्ये जगन्मिथ्यात्व-तद्धेतु-तत्प्रत्यक्षानुमानागमाद्यविरोध-मायावादानुपबृंहणेन 'अहमिदम्', 'ममेदम्' इति नैसर्गिको लोकव्यवहारोऽध्यासकारणाभावात् 'अहं पदार्थमखण्डं मत्यैव प्रवर्तितः' इति शङ्कानिरासकसत्युक्तिजातानां संग्रहेण, अनिर्वचनीयाभावविलक्षणमावाभावविलक्षणाज्ञानोपपादनेन चोपबृंहितः। परन्तु—अहमर्थस्य चिदचिदात्मकत्वरूपत्वमध्याससिद्धान्तनिष्पन्नं समर्थयितुं धर्माध्यासात् कर्तृत्वाध्यासादिः, देहात्मैक्याध्यासश्च समर्थनीयः, तदर्थमपराणि प्रधानान्यौपसंहारिकाणि त्रीणि प्रकरणानि। तानि तु प्रकरणान्यौपसंहारिकार्थपराण्यध्यासभाष्यस्य सामान्यतोऽध्यासे निरूपितेऽप्यध्यासस्य विशिष्य मिथ्यात्वस्य ख्याति बाधानुपपत्त्या तस्यानिर्वाच्यत्वानुपपत्त्या अख्यात्यन्यथाख्यातिनिरसनेनानिर्वचनीयख्यातिसमर्थनं विना न सिद्ध्यति। अतः 'पाठक्रमादर्थक्रमो बलीयान्' इति न्यायेनाऽहमर्थानात्मताकर्तृत्वाध्यासदेहात्मैक्याध्यासज्ञानपूर्वत्वेन पूर्वोदाहृतानामनिर्वचनीयत्वख्यातिबाधानुपपत्तीनामेवार्थतः पूर्वत्वं युक्तम्, इति तानि प्रकरणानि पूर्वं प्रकल्प्य, अहमर्थानात्मत्वादिप्रकरणानामुपसंहारेणाद्वैतसिद्ध्यर्थः संकल्प्यते, येनाध्यासभाष्येणाद्वैतसिद्धेः प्रथमपरिच्छेदस्य चैकवाक्यता, अध्यासभाष्यस्यैवाद्वैतसिद्धेरात्मतत्त्वमुख्यव्याख्यातायामेव तात्पर्यं चोन्नेतुं शक्यम्।

"स्मृतिरूपः परत्र पूर्वदृष्टावभासः", "तथा च लोकेऽनुभवः" इति भाष्याभ्यामख्यात्यन्यथाख्यात्यादिनिरासेनानिर्वचनीयख्यातेरेव सिद्धान्तत्वसूचनम्, असत्ख्यातिनिरासश्च

तत्राध्यासभाष्ये—"तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति। केचित्तु यत्र यदध्यासः, तद्विवेकाग्रहनिबन्धनो भ्रम इति। अन्ये तु यत्र यदध्यासः, तस्यैव विपरीतधर्मत्वकल्पना-

माचक्षते" इत्यन्यथाख्यात्यसत्ख्यात्यनिर्वचनीयख्यातीः केवलमुपक्षिपन्ति भगवत्पादाः। परन्तु तत्रानिर्वचनीयख्यातिरेव युक्तेति न वर्णयन्ति; तथापि 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यध्यासलक्षणवाक्येन स्मृतिरूपत्वोक्त्या रजतांशे स्मरणमित्यख्यातिवादस्य, 'पूर्वदृष्टावभासः' इति पूर्वदृष्टतादात्म्यापन्नस्य पूर्वदृष्टसदृशस्य वा भानमिति वर्णनेन संसर्गमात्रावभास इत्यन्यथाख्यातिपक्षस्य च निरासं परत्र पूर्वदृष्टावभासं ज्ञानमित्यनिर्वचनीयख्यातेः समर्थनं च प्रतीयते। "तथा च लोकेऽनुभवः—शुक्तिका हि रजतवदवभासते" इति भाष्यन्तु 'लोकेऽनुभवः' इति पदाभ्यामलौकिकानुभव एव रजतस्येत्यन्यथाख्यातिवादस्य, 'अनुभव'पदेनाख्यातिवादस्य च निरसनम्, 'रजतवत्' इति वत्प्रयोगेणानिर्वचनीयख्यातेः समर्थनञ्च विशदयति। नारायण-सरस्वतीकृतौ भाष्यवार्तिके, प्रदीपे चास्मदीयेऽधिकं व्यक्तम्। तथा च अनिर्वचनीयख्यातिरेव भ्रमे युक्ता, न त्वसत्ख्यातिः, रूप्याद्यसत्त्वे प्रमाणाभावात्। 'असदेवेदं रजतमभाद्' इति सद्भिन्नत्वविषयम्। असदात्मना सत एव हि त्वयापि प्रत्यक्षमिष्यते। न च पूर्वकालीनमानविषयरजतेऽसत्त्वज्ञानमसदा-त्मना सद्विषयकम्। एतेन—विमतमसत्, सत्त्वानधिकरणत्वात्, शशशृङ्गवत्; विमता अप्रमा, असद्विषयका, सत्त्वानधिकरणविषयत्वात्, शशशृङ्गमसदिति वाक्यजन्यपरोक्षज्ञानवदित्यनु-मानद्वयमपि—परास्तम्; पूर्वयुक्त्या बाधात्, शब्दैकसमधिगम्यत्व-परोक्षत्वयोः यथाक्रममुपा-धित्वाच्च।

एतेन—असत्ख्यातिवादे बाह्यमतप्रवेशापत्तिरपि—सूचिता। न हि सदुपरागेण विशेषेण सत्ख्यात्यापत्तिः परिहर्तुं शक्यते। तार्किकाणां तु सतोरेव शुक्ति रूप्ययोस्तत्तादात्म्यस्य च भ्रमे भानाद्यासत्ख्यात्यापत्तिः। अत एव संसर्गस्य तत्र भानमिति तु युक्तम्।

अनिर्वचनीयख्यातौ नासत्ख्यातिः, न वा शुक्ति-रूप्याकारवृत्तिद्वयाङ्गीकारादख्यातिः, न वाऽऽत्मख्यातिः, नापि वाऽऽ-न्यथाख्यातिरिति व्यवस्था

भ्रमत्वं तु व्यधिकरणप्रकारकज्ञानत्वरूपं न संसर्गासत्त्वं विना नोपपद्यते। नहि भासमान-वैशिष्ट्यप्रतियोगित्वं प्रकारत्वम्, किन्तु स्वरूपसम्बन्धविशेषः, इति न तद्वैशिष्ट्यविषयकत्वायर्थ-मसत्संसर्गविषयत्वमङ्गीक्रियेत। शशशृङ्गमसदिति वाक्येन तु विकल्पमात्रमेवोत्पद्यते, न तु ज्ञानमिति नासाक्रमसत्ख्यात्यापत्तिरिति युक्तम्। तत्र प्रातिभासिकस्थलेऽधिष्ठानांशेऽन्तःकरणवृत्ति-

रयवत्वे चाविद्यावृत्तिः। एवमपि तादात्म्यस्य भानाद् नाख्यातिमतप्रवेशः। नहि वयं सर्वत्राध्यासे द्वयात्मकतां ब्रूमः, किन्तु अन्तःकरणवृत्त्यपेक्षाधिष्ठानप्रकाशः, इति। इदन्त्वाद्यधिष्ठानस्य स्वप्रकाशत्वान्नेदमिति द्वयात्मकतापत्तिः। एतेन—इदं रूप्यमित्यस्य त्रयात्मकतापत्तिः, स्वप्ने चतुरात्मकतापत्तिश्च—परास्ता, स्वप्ने इदंरूप्ययोरुभयोरप्यविद्यावच्छिन्नचैतन्याधिष्ठानकत्वेन तस्य स्वप्रकाशत्वाच्च। चाक्षुषत्वानुभवस्त्वनुभवस्य मात्रेऽप्यात्मानं पश्यामीतिवदौपचारिकः। उपचारे च निमित्तं चाक्षुषेदंवृत्त्यवच्छिन्नचैतन्यस्याविद्यापरिणामवृत्तिविषयत्वमिति मन्तव्यम्। अविद्यावृत्तिप्रतिफलिते चैतन्येऽविद्यावृत्तेः स्वत एवोपाधित्वेन नाविद्यावृत्तेरपि प्रातिभासिकत्वेऽनवस्थाप्रसङ्गः। रूप्यमिति तु न ज्ञानगताकारः, साकारवादप्रसङ्गात्। अपरोक्षत्वानुभवस्तु नातीतविषयवदुपपद्यते। दोषाणां स्वाश्रय एवातिशयजनकत्वमित्यत्र न विनिगमकं दृश्यते। स्वसम्बन्धिन्येव कार्यजनकत्वाङ्गीकारात्तु नातिप्रसङ्गावकाशः। ज्ञानैक्यानुभवस्तु विषयाभेदेनोपचारनिबन्धनः। उपचारशब्दार्थश्च विषययोरभेदाध्यासज्ञानयोरप्यभेदाध्यास इति नानुभवविरोधोऽपि। यावता च ज्ञानभेदः, तावता विषयैक्याध्यासस्य ज्ञानैक्याध्यासनिमित्तत्वमपूर्वमपि कल्प्यत एव। सामग्र्यभावात्तु विषयभेदग्रहकाले न ज्ञानभेदग्रहः, इति न तदापत्तेरवकाशः। इदंवृत्त्यवच्छेदेन रजतवृत्तिस्तु शुक्त्यवच्छिन्नचैतन्यगोचराविद्याया एव परिणामः, न तु तदवच्छिन्नचैतन्यगताविद्यापरिणामः। इदंवृत्तिर्हि आश्रयावच्छेदिकैव, न तु विषयावच्छेदिकेति न दोषः। शुक्तित्वं जानत इदंवृत्तित्वं चाजानतो रूप्यनिवृत्तावपि तदज्ञानानुवृत्तिप्रसङ्गोऽप्येतेन परास्तः; शुक्तित्वाज्ञानस्यैवोभयपरिणामित्वात्। अध्यस्तेन सहेन्द्रियासंप्रयोगात्तु बाधकाबाधितज्ञानैक्यानुभवः। सन्निकर्षस्य प्रमामात्रसामग्रीत्वाभावात् प्रत्यक्षत्वोपपत्तिरप्यविद्यावृत्त्यङ्गीकार एवोपपद्यते। अथवाऽविद्यावृत्तिर्न ज्ञानम्; ज्ञानत्वस्याज्ञाननिवर्तकमात्रवृत्तित्वात्, इति न ज्ञानैक्यानुभवविरोधः। धारावाहिकद्वितीयादिज्ञानमपि तत्तत्कालविशिष्टविषयकत्वेनानधिगतविषयमेवेति नानुपपत्तिः। परोक्षभ्रमेऽपि फलैक्योपचारेण ज्ञानैक्यानुभवोपपत्त्या फलैक्यनिबन्धनो वाऽयमैक्यानुभव इति सर्वं सुस्थम्। इति चैवमनिर्वचनीयख्यातेरेव प्रामाणिकत्वात्, तस्य मिथ्याज्ञाननिमित्तत्वात्, पूर्वपूर्वभ्रमेणोत्तरोत्तरभ्रमनिर्वाहाद् जीवाज्ञानवादस्य प्रामाणिकत्वेनाहमाद्यध्यासमर्थनेन विगलिताहङ्कारात्मन एव प्रामाणिकत्वात्, मुख्यतात्पर्यविषयत्वात् तैत्तिरीयाद्युपनिषदां तत्रैव स्वारस्यात्। अहमध्यासस्य तैत्तिरीयोपनिषदि देहात्मादौ चाकाशाद्यध्यासपूर्वकत्वावगमात्, तस्मिन्नानुपदिष्टे सन्देहात् शारीरिकमीमांसापदस्वारस्यात्, 'माया कल्पिता' इति मङ्गलश्लोके जीवात्मतरस्य परमतात्पर्यविषयत्वज्ञापनाच्चाहमर्थात्मन एव

तात्पर्ये परमादरोऽद्वैतसिद्धिकाराणाम्। न चैतावता प्रस्थानान्तरे विद्वेषः। ते हि यथासंभवं प्रस्थानान्तरमपि समर्थयन्ति। यथा सर्वज्ञज्ञानाश्रयत्ववादम्, शाब्दापरोक्षवादम्, जीवेश्वरबिम्ब-प्रतिबिम्बवादम्, अन्यान्यांश्च।

अहमर्थानात्मत्वं कर्तृत्वाऽध्यासं देहैक्याध्यासं चाध्यासभाष्यविचारावसर एव न्यरूपयम्।

अद्वैतसिद्धेः प्रथमपरिच्छेदस्याध्यासभाष्य-संकलनरूपस्य संग्रहः, अद्वैतसिद्धान्तस्य नास्तिकसिद्धान्तत्वनिरासश्च

किं बहुना? भगवत्पादसिद्धान्ता एव सर्वे प्रसक्ततदाक्षेपपरिहारमुखेनाद्वैतसिद्धेरध्यास-भाष्यमूलाः प्रथमपरिच्छेद आमूलचूडं निर्धार्यन्ते। द्वैतिनामद्वैतमतनिरसनप्रकारा लोक-विरुद्धा तथाद्वैतसिद्धान्ता उपन्यस्यन्त इति। अलौकिकेऽद्वैतवादे लौकिकव्यवहारेण किमुपकरिष्यते? शरीरात्मतावादी हि लौकिकोऽलौकिकेन आत्म-स्वर्गादिपरलोकवादिसिद्धान्तेन विरुद्धः, इति परलोकवादनिरासपरशास्त्रादिमतावलम्बिभिरप्रमाणं मन्यमानं कथमप्रमाणीक्रियते? नास्तिको नाम न स एव, यो नास्तीति पदमात्रं प्रयुङ्क्ते, किन्तु यदस्ति, तन्नास्तीति, यन्नास्ति, तदस्तीति वादैव। इति चैवमद्वैतमत आधिकारिकाणां स्थितप्रज्ञानां वा दृष्ट्या ब्रह्मैवास्ति; नान्यत्, इति यन्नास्ति जगत्, तन्नास्तीति, यदस्ति ब्रह्म, तदस्तीति वादिनश्च कथ-मद्वैतवादिनो नास्तिका नाम। ते हि भाविनीं दशामेव वर्तमानामिव दृष्ट्वा तथा वदन्ति। अन्ये तु परीक्षका भाविनीं दशां शास्त्रसिद्धां मत्वा तथा वदन्ति परलोकवादिनः, साकारब्रह्मवा-दिनश्च शास्त्रदृष्ट्यैव परलोकादिकमस्तीति मन्यन्ते, अन्यथा न तेऽपि नाम कथं नास्तिकाः। किं भ्रान्तदशायां रज्जौ सर्पोऽस्तीति मन्वाना एवास्तिकाः, न तु रज्जुतत्त्वसाक्षात्कारानन्तरं सर्पो नास्तीति वादिनः, इति न नास्तिशब्दप्रयोगमात्रेणाद्वैतवादो नास्तिक्यवाददूषणमर्हति। प्रभाकरो हि बृहत्याम्—यत्तु ब्रह्मविदां निश्चयः—यदुपलभ्यते, न तत् तथ्यमिति, यन्नोपलभ्यते, तत् तथ्यमिति, नमस्तेभ्यः, विदुषां नोत्तरं वाच्यमिति यदन्यप्य-द्वैतसिद्धान्तमेव प्रपञ्चमिथ्यात्वादि साधु मन्यते। तदेवमद्वैतसिद्धेः प्रपञ्चमिथ्यात्वनिर्णयपरः प्रथमपरिच्छेदः समालोचितः॥

अथ तृतीयं प्रवचनम्

द्वितीयपरिच्छेदार्थसंग्रहः

तदेवमध्यासभाष्यखण्डनपरोऽद्वैतसिद्धेः प्रथमः परिच्छेदः समालोचितः। तत्र द्वितीयपरिच्छेदः 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे प्रस्तुतब्रह्मस्वरूपनिरूपणपरः, तृतीयपरिच्छेदस्तत्राथशब्दसूचितसाधननिरूपणपरः, तुरीयपरिच्छेदस्तु जिज्ञासापदघटकाज्ञाननिवृत्तित्वोपलक्षितज्ञाततत्त्विशिष्टात्मस्वरूपाख्यमोक्षनिरूपणपरः। तदुक्तं वार्त्तिके—

"निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः" इति।

तत्र द्वितीयपरिच्छेदप्रतिपाद्या विषया इमे, ते यथा—

(१) अखण्डार्थत्वम्
(२) सत्याद्यवान्तरवाक्यस्याखण्डार्थतोपपत्तिः
(३) अखण्डार्थत्वोपपत्तिः
(४) निर्गुणत्वोपपत्तिः
(५) निर्गुणे सप्रमाणता
(६) निराकारत्वसाधनम्
(७) ब्रह्मणो ज्ञानत्वाद्युपपत्तिः
(८) ब्रह्मण उपादानत्वम्
(९) ब्रह्मणो विश्वकर्तृत्वम्
(१०) ब्रह्मणोऽभिन्ननिमित्तत्वम्
(११) स्वप्रकाशत्वलक्षणोपपत्तिः
(१२) स्वप्रकाशत्वोपपत्तिः
(१३) शब्दावाच्यत्वम्
(१४) सामान्यतो भेदखण्डनम्
(१५) विशेषतो भेदखण्डनम्
(१६) विशेषखण्डनम्
(१७) भेदपञ्चके प्रमाणभङ्गः
(१८) जीवब्रह्माभेदानुमानभङ्गः
(१९) जीवभेदानुमानभङ्गः
(२०) जीवभेदानुकूलतर्कभङ्गः
(२१) भेदपञ्चकानुमानभङ्गः
(२२) जीवभेदश्रुतेरनुवादकत्वम्
(२३) असत्यभेदधीश्रुतिः
(२४) शब्दान्तरादेरात्मभेदकत्वाभावः
(२५) भेदश्रुतेः षड्विधतात्पर्यलिङ्गभङ्गः
(२६) ऐक्यस्वरूपोपपत्तिः
(२७) जीवब्रह्माभेदे प्रमाणम्
(२८) ऐक्यश्रुतेरुपजीव्यविरोधाभावः
(२९) तत्त्वमसिवाक्यार्थनिरूपणम्
(३०) 'अहं ब्रह्मास्मि' इत्याद्यनेकश्रुति स्मृत्यर्थकथनम्
(३१) जीवब्रह्माभेदानुमानम्
(३२) अंशित्वेनैक्योपपत्तिः
(३३) बिम्ब-प्रतिबिम्बन्यायेनैक्यसिद्धिः
(३४) जीवाणुत्वखण्डनम्

सखण्डाखण्डस्वरूपनिष्कर्षः, तदुभयोदाहरणपरीक्षा च

अत्राद्वैतसिद्धान्ते ज्ञेयं जिज्ञास्य प्रस्तुतं ब्रह्माखण्डम्, उपाध्यध्यस्ततयाऽध्यारोपविषया, जगत्कारणतया, विवर्ताधिष्ठानतया वा ब्रह्मानाद्यविद्याकल्पितसदादिभेदवत्, आवृतानावृतभागद्वयवद्वा ब्रह्म सखण्डम्, तस्याखण्डत्वञ्च श्रवणादिप्रमाणजन्यवृत्तिप्रयुक्ताविद्यानिवृत्त्याऽऽवृतानावृतभावद्वयशून्यत्वेन। तत्र सखण्डमधिष्ठानम्, अखण्डं तु मुक्तात्मस्वरूपम्। 'इयं शुक्तिः' इत्यत्रापि शुक्तिरप्यनाद्यविद्ययाऽनावृतमखण्डम्, आवृतावस्थं तु सखण्डम्, सखण्डत्वावस्थायामेवाधिष्ठानम्, अन्यथा तु नाधिष्ठानता, न वा भ्रम इति व्यवस्था।

सर्वत्र हि सखण्डेषु केषुचन खण्डेषु भासमानेष्वभासमानखण्डान्तरमात्रे बोधितेऽखण्डार्थत्वम्, यथा 'इदं रजतम्' इत्यत्रेदमंशे ज्ञायमान एव शुक्तित्वांशमात्रस्य ज्ञाने इयं शुक्तिरिति ज्ञानमखण्डार्थम्। इयान् विशेषः—यद् दृष्टान्ते शुक्तित्वमिदंत्वमुभयमनुवर्तते, महावाक्यार्थेऽवान्तरवाक्यार्थे वाऽनाद्यविद्याप्रयुक्तसदादिभेदस्य तत्प्रयुक्तानाद्यविद्यानाशे बाधाद् ज्ञाताज्ञातविभागशून्यस्वरूपत्वात् स्वप्रकाशसंविन्मात्रस्य तस्य वस्तुगत्याऽखण्डार्थत्वम्, न तु वाक्यजन्यज्ञानमखण्डार्थम्, ब्रह्मणो वृत्तिविषयतया स्वीकारेण मण्डनप्रस्थाने ज्ञानस्याखण्डार्थत्वाभावात्। विवरणमते तु ब्रह्मणो वृत्तिविषयत्वे सत्यपि यावद्वृत्ति नाऽखण्डार्थत्वम्, तयाऽविद्याया नाशे तु मण्डनमतवदेव स्वप्रकाशमेवाखण्डम्; सदादिभेदशून्यत्वात्।

तात्पर्यविषयस्वरूपमात्रबोधकत्वं वाक्यस्य स्वतः सिद्धमिति न तद्योगायोगचर्चावसरति

तत्र वाक्यस्य निर्विकल्पकज्ञानजनकत्वयोगायोगचर्चादिकमनवसरम्; अज्ञातार्थमात्रबोधकत्वस्य प्रमाणस्वाभाव्यात्, सदंशे चिदंशे चास्वप्रकाशायोग आवरणाभावात्, आनन्दांशमात्र एव भेददशायां प्रामाण्यप्रवृत्तेः प्रमाणजन्यज्ञानेन तदा तदंशेऽप्यविद्याया निवृत्तावखण्डार्थत्वमनपोहम्।

सत्यज्ञानादिवाक्यानामपि सदादिरूपेण कारणात्मताविवक्षायां नाखण्डार्थत्वम्, किन्तु स्वरूपमात्रविवक्षायामेव, अत एव आनन्दात्मनोऽपि न निर्देशः

'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्रापि सद्रूपेण चिद्रूपेण च ज्ञानदशायां नाखण्डार्थत्वम्, किन्तु तस्य वस्तुगत्या। तदनन्यत्वाधिकरणे हि तदनन्यत्वदशामादायैवाखण्डार्थत्वमभिप्रैति।

तच्च महावाक्यार्थज्ञानदशां भाविनीमादायैव, न तु कारणावस्थायाम्। अत एव 'सत्यं ज्ञानमनन्तम्' इत्यत्रानन्दरूपत्वमपि न निर्दिश्यते। सोषुप्तावस्थापर्यन्तमेव व्यष्टिरूपेण, समष्टिरूपेण चाज्ञानोपधानात् कारणता, सखण्डार्थता वा, तुरीयावस्थायामेवाखण्डार्थता; आनन्दात्मनाऽपि ज्ञातत्वात्। अतः सत्यादिवाक्यानामखण्डार्थता बाधितैवेति प्रतिभाति, तथापि तत्राप्यखण्डार्थताव्यपदेशः 'सन् घटः' इत्यादौ विकल्पांशस्य घटादेरिव सदात्मांशस्य स्वरूपतोऽनध्यस्तत्वात्, बाधाभावाद् भेदमात्रस्य बाधादखण्डार्थत्वम्। अतोऽत्राभेदे सामानाधिकरण्यम्। तच्च वाक्यजन्यम्; औपाधिकस्याविद्याकल्पितस्वरूपभेदमात्रस्य वा बाधेनाभेदेऽखण्डार्थत्वव्यवहारः सत्यादिवाक्ये। अत एव तत्त्वमस्यादिवाक्येऽप्यभेदे सामानाधिकरण्यादखण्डार्थता।

जाग्रदाद्यवस्थायां सखण्डार्थता, तुरीयावस्थायामखण्डार्थता, यदाऽभेदे सामानाधिकरण्यम्, न बाधायाम्, "सदेवेदम्" इत्यादौ तु बाधायां तत् चतुर्विधसामानाधिकरण्यस्य सोदाहरणनिर्देशमुपपादनम्

अत एव चातुर्विध्यं सामानाधिकरण्यस्य—(१) विशेषणविशेष्यभावे, (२) बाधायाम्, (३) अध्यासे, (४) अभेदे वा सामानाधिकरण्यमिति। एवं प्रत्यक्षादिस्थले सविशेषत्वे विषयाणां विशेषणविशेष्यभावे, बाधायां वा सामानाधिकरण्यम्। शब्देन तु निर्विशेषत्वे विषयस्यात्यन्ताभेदेऽपि सामानाधिकरण्यात् सत्यादिवाक्यस्याप्यखण्डार्थत्वम्। तत्र हि पदस्मारितातिरिक्तार्थो न वाक्येन बोध्यते, अन्यत्र तु पदस्मारितातिरिक्तसंसर्गोऽभिहितान्वयवादे, अन्विताभिधानवादे वा बोध्यते। तत्र सामानाधिकरण्येनाभेदे बोध्यमानेऽपि तादात्म्यं भेदघटितमेव बोध्यते, अखण्डार्थस्थले तु न भेदघटितं सामानाधिकरण्यम्। तत्र बाधायां सामानाधिकरण्येऽप्यभेदसम्बन्धः, परन्तु भेदघटितरूपतादात्म्यरूप एव; एकस्य तत्र स्वरूपतोऽपि बाधात् तादात्म्यस्यापि बाधात्। सत्यादिवाक्ये तु भेदांशमात्रस्य बाधो न स्वरूपतोऽपि बाधस्तादात्म्यस्यापि। अयमेव न्यायः "सा वैश्वदेव्यामिक्षा" इत्यादौ।

अखण्डार्थत्वप्रकारभेदनिष्कर्षः, तत्र निर्भेदार्थत्वस्य सत्यादिवाक्ये समन्वयः

अतोऽखण्डार्थत्वम्—निर्भेदार्थविषयत्वम्, निर्विशेषार्थविषयत्वम्, पदस्मारितसंसर्गा-

प्रमापकत्वम्, प्रतिपिपादयिषितपदार्थसंसर्गाप्रमापकत्वं वा सत्यादिभेदस्यानाद्यविद्याप्रयुक्तत्वेन, सत्यादिवाक्यैरभेदे सामानाधिकरण्यबोधाविरोधेन निर्भेदार्थतत्त्वस्य बोधादत्यन्ताभेदस्य सर्वाविद्याया निवृत्तौ मानेनाखण्डार्थत्वाद् निर्भेदं भूतलमित्यादिवाक्यानामपि नाऽखण्डार्थतापातः। 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यत्रापि प्रकृष्टप्रकाशश्चन्द्र इत्यभेदे सामानाधिकरण्याद् नाव्याप्तिः।

निर्विशेषार्थत्वसमन्वयः, बाधायां सामानाधिकरण्यस्याभेदे सामानाधिकरण्याद् विशेषश्च

एतेन—निर्विशेषार्थत्वमखण्डार्थत्वमपि—व्याख्यातम्; अविद्याप्रयुक्तभेदाविषयकत्वस्यैव तेनापि विवक्षणात्। विशेषो ह्यत्र भेद एव, योऽभेदे सामानाधिकरण्येन बाध्यते। बाधायां सामानाधिकरण्यस्थलेऽपि भेदस्य बाधो भाव्येव, अभेदे सामानाधिकरण्यस्थले तु भेदबाधो वर्तमान इति विशेषः।

प्रातिपदिकार्थमात्रपर्यवसाय्यनेकापर्यायशब्दत्वस्य समन्वयः, पदान्तरावैयर्थ्यम्, पर्यायता वा पदानामित्यादि

एतेन—प्रातिपदिकार्थमात्रपर्यवसाय्यनेकापर्यायशब्दत्वमखण्डत्वमपि—व्याख्यातम्। अत्र पर्यवसायिपदेन वाच्यविधया प्रातिपदिकार्थमात्रपरत्वं व्युदस्यते, न मुख्याभेदेन सामानाधिकरण्यसिद्धं प्रातिपदिकार्थमात्रपरत्वम्, येन पदान्तरवैयर्थ्यम्, तदप्रयोगो वा स्यात्। अभेदे सामानाधिकरण्येन भेदमात्रस्य कल्पितस्य निरासेन पदान्तरसार्थक्यमव्याहतम्। प्रवृत्तिनिमित्तभेदात् स्वरूपैक्ये नापर्यायत्वस्य क्षतिः। अतो न पदान्तरवैयर्थ्यम्। अत एव तत्र सर्वत्र वाक्यत्वं वाक्यार्थबोधकत्वप्रयुक्तम्; अन्यथा हि पदमात्रस्याबोधकत्वाद् बोधकत्वमपि न स्यात्। 'शीतोष्णस्पर्शवन्तौ पयःपावकौ' इत्यादौ विशेषणविशेष्यभावे वा सामानाधिकरण्यं न प्रातिपदिकार्थमात्रपर्यवसायित्वेन। इतरेतरद्वन्द्वस्थले प्रत्येकमेकैकवाक्यार्थमात्रपर्यवसायित्वात्, सम्भूयार्थपरत्वाभावात्, वेदान्तवाक्यानामद्वैते ब्रह्मणि प्रपञ्चमिथ्यात्वपरत्वेऽखण्डार्थत्वस्य बाधायां सामानाधिकरण्येनाबाधात्, अभावपारमार्थिकत्वपक्षे ब्रह्मस्वरूपमात्रपरत्वेनाखण्डार्थत्वाविघाताच्च न कोऽपि दोषः।

सर्वेषां ज्ञानानां प्रकारांशे भ्रमत्वात् 'विशेष्यांशे' एव प्रामाण्यात् सर्वत्र तत्राखण्डार्थत्व'समन्वयः'

एकविशेष्यमात्रपरत्वमप्यधिष्ठानांशमात्रप्रामाण्यरूपं सर्वेषां ज्ञानानां विकल्पांशेऽप्रामाण्यस्यैव ब्रह्मसिद्धि-तत्त्वशुद्ध्यादौ व्यवस्थापनात् सन्मात्रप्रामाण्यवादस्य निर्दुष्टत्वस्य शतभूषण्यादौ

पदानां परस्परविभिन्नार्थबोधकानामनन्याकाङ्क्षाणामव्यतिरिक्तैकरस-प्रातिपदिकार्थरूपाखण्डार्थत्वसमन्वयः

विशिष्य ब्रह्मसिद्धावपि साधनाच्च न विरुद्धम् ।

अतः पञ्चपादिकाद्युक्तरीत्या पदानां परस्परभिन्नार्थानामनन्याकाङ्क्षाणामव्यतिरिक्तैकरस-प्रातिपदिकार्थमात्रान्वयः, संसर्गागोचरार्थबोधकानेकपर्यायशब्दत्वं वाऽखण्डार्थमित्यपि व्याख्यातम् । तत्र संसर्गागोचरत्वमित्यत्र संसर्गपदेन पदस्मारितातिरिक्तसंसर्गो विवक्ष्यते, तेनाभासयोः प्राप्तिः संयोग इत्यादौ नाव्याप्तिः; तस्य पदस्मारितत्वात्, सत्यादिवाक्येषु तदभावाच्च । 'द्विषदन्नं न भोक्तव्यम्' इत्यत्रापि लक्षणया शत्रुगृहाभोक्तव्यत्वपरतया पदस्मारितसंसर्गपरत्वमेवेति न तत्रातिव्याप्तिः ।

प्रतिपिपादयिषिताभेदातिरिक्तसंसर्गाप्रमापकत्वस्य सत्यादिवाक्ये समन्वयः

अनेन प्रतिपिपादयिषिताभेदातिरिक्तपदार्थसंसर्गाप्रमापकत्वमखण्डार्थत्वमपि व्याख्यातम् । चन्द्रब्रह्मादिशब्दानां स्वरूपतो ज्ञातत्वेऽपि 'प्रकृष्टः प्रकाशश्चन्द्रः', 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिवाक्येषु तेषां प्रकृष्टप्रकाश-सत्यज्ञानादिभेदाभावबोधस्यैव प्रतिपिपादयिषितत्वान्न पदार्थसंसर्गोऽभेदातिरिक्तः प्रतिपिपादयिषितः, अभेदस्तु न प्रतियोग्यनुयोगिभेदसापेक्षः संसर्ग इत्यतोऽपि न कोऽपि दोषः । अतो नाखण्डार्थत्वलक्षणासंभवः, इति सत्यादिवाक्यानामभेदे सामानाधिकरण्यपराणामखण्डार्थत्वोपपत्तिः; पदस्मारितातिरिक्तभेदघटितसंसर्गपरत्वाभावात्, पूर्वोक्तरीत्या पदान्तरसार्थक्यस्यापि सम्भवाच्च ।

सत्यादिवाक्यानामखण्डार्थत्वेऽनुमानम्, सत्यादिवाक्यार्थे नित्यपरोक्षे श्रौतेऽपि नानुमानापेक्षाविरोधः

सत्यादिवाक्याखण्डार्थत्वमनुमानेनापि सिद्ध्यति । यद्यपि श्रुतिसिद्धस्यार्थस्यानुमानेन साधनं नापेक्ष्यते; अन्यथा स्वर्गादिसाधनत्वस्याप्यनुमेयत्वापत्तेः, प्रत्यक्षेणानु-

मित्या चाऽसिद्धस्य वेदैकगम्यत्वस्य धर्मे स्वीकारात्, तथापि न नित्यमपरोक्षेऽनुमित्यनपेक्षाया-मपि प्रत्यक्षयोग्येऽनुमानमप्यनवसरम्, ब्रह्मस्वरूपं तु स्वतः प्रत्यक्षं स्वप्रकाशश्च विषय इति युक्तम्, सदादिवाक्यानामपि सत्यादिभेदमिथ्यात्वबोधन एव तात्पर्येण तस्य च तेन परोक्षस्य साधनाद् नानुमानानपेक्षा। सत्यादिवाक्यस्य सदादिभेदविरोधाच्च नाभेदज्ञानमपरोक्षम्; अन्यथा तत्त्व-मस्यादिमहावाक्यवैयर्थ्यापातात्। सत्यादिवाक्येन सदादिभेदः परं बाध्यते, तत्त्वमस्यादिवाक्ये तत्त्वाद्युपाधिप्रयुक्तजीवेशभेदप्रयोजकाविद्यानिवृत्त्या स्वत एव संविन्मात्रमपरोक्षमिति खलु सिद्धान्तः।

इन्द्रियसंनिकर्षे शाब्दादप्यपरोक्ष-ज्ञाननिर्वाहात् शाब्दापरोक्षवादसमर्थनम् सत्यादिवाक्यानामखण्डार्थत्वं न मुख्यम्, अतो न तद्वाक्यमात्रेण सार्थक्यम्,

तत्र वाक्यजन्यज्ञानस्यापि घटेन्द्रियसंनिकर्षदशायां शुक्तीन्द्रियसंनिकर्षदशायामिव शब्देनाप्यपरोक्षज्ञानं दृष्टचरम्। अतः शब्देनाप्यज्ञातांशमात्रबोधकेन निर्विकल्पकं ज्ञानं बहुशो दृश्यते। निर्विकल्पकत्वं च ज्ञानस्यारोपितविकल्पांशनिवर्तकाज्ञाननिवृत्त्या। अत एव मण्डनः सर्वस्य ज्ञानस्य प्रकारांशेऽप्रामाण्यं स्वीकरोति, अज्ञातांशबोधकत्वेन खलु प्रामाण्यं प्रमाणानाम्, न तु तत् ज्ञानस्य सविशेषकत्वप्रयुक्तम्। नहि ज्ञानसामान्यं सविशेषविषयमिति नियमः। तत्र विषयस्य सविशेषत्वं न तन्त्रम्। सत्यादिवाक्यस्थले तु सच्चिदानन्दरूपं निर्विशेषमेव विषयः, सत्स्वरूपमात्रस्य सदादिरूपत्वात्।

तत्र 'ब्रह्मविदाप्नोति परम्' इति वाक्येऽखण्डाकारसाक्षात्कार एव परप्राप्तेरुपायत्वे-नाम्नायते, आनन्दस्यापि स्वरूपमात्रत्वात्। तथा चितोऽपि। अत एव चितो नानुभाव्यत्वम्; अन्यथा घटादिवज्जडत्वमितीष्टसिद्ध्यादौ व्यक्तम्।

तत्र सर्वत्र प्रतीतिप्यात्मस्वरूपमात्रमधिष्ठानतया स्वयं प्रकाशते, सदंशस्याधिष्ठानतयाऽ-बाध्यस्वरूपत्वात् सद्रूपस्य, तत्र सत्यादिवाक्ये आनन्दस्वरूपत्वं न प्रतीयत इति न मिथ्यात्व-निर्णयः, यतस्तत्र सच्चिदंशयोरैवाभेदो बोध्यते, तेन च सदादिभेदमात्रमिथ्यात्वमवगम्यते, यतो वस्तुपरिच्छेदराहित्यमप्यर्थविरुद्धम्। सच्चिदात्मनैव ब्रह्मणोऽधिष्ठानत्वादधिष्ठानव्यतिरेकेण सर्वसाभावाच्च तदनन्यत्वप्रयोजकमेवानन्तत्वमत्र विवक्ष्यते। आनन्दात्मना तु ज्ञानं 'आनन्दो

ब्रह्मेति व्यजानात्' इति वाक्यमात्रावसेयम्। अतः सत्यादिवाक्यस्यांशविशेष एवाभेदज्ञानम्, इति तस्याखण्डार्थत्वं न मुख्यम्, किन्त्वंशविशेषेण भेदप्रतीतिनिवारणेनैवाखण्डार्थत्वम्।

सत्यादिवाक्यम्, अखण्डार्थम्, तन्मात्र प्रश्नोत्तरत्वाद् इत्यतो प्रश्नोत्तरत्वहेतुसमन्वयः प्रकरणार्थोपपादनपूर्वकम्

अत एव—'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति कारणत्वेन सच्चिदात्मन एव प्रस्तावः; यतस्तत्र सच्चिदात्मनोर्वस्तुतो न भेदः। तत एवाधिष्ठानतादशायां सदंशस्यापि प्रकाशमानत्वं चिदात्मन इव, इति न तस्यापीन्द्रियसंन्निकर्षप्रयुक्तवृत्तिविषयत्वेनाधिष्ठानत्वम्। इदमेवाभिप्रेत्य—"नहि पुरोऽवस्थिते विषये एव विषयान्तरमध्यसितव्यमिति नियमः" इति भाष्यम्। "ब्रह्मविदाप्नोति परम्" इति प्रस्तुतब्रह्मस्वरूपं न सत्यादिवाक्यमात्रेण बोध्यते, किन्तु तन्मुखेन प्रस्तुत्य, "ब्रह्म पुच्छं प्रतिष्ठा" इति वाक्येन पुच्छब्रह्मोपसंहृत्य, तदेव "सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता" त्युपसंह्रियते, इति सत्यादिवाक्यस्याखण्डार्थत्वं दृष्टान्तविधयैव विवक्ष्यते, न मुख्यतया प्रतिपाद्यतया; सर्वात्मनाऽखण्डार्थत्वस्य तत्राभावात्। एवं च "ब्रह्मविदाप्नोति" इति प्रस्तुतं ब्रह्म किमिति प्रश्नोत्तरत्वस्य सच्चिदात्मनोरेकत्वेनाधिष्ठानतया प्रस्तावमभिप्रेत्य द्वारविधया प्रश्नोत्तरत्वमेवेति सत्यादिवाक्यमखण्डार्थम्, तन्मात्रप्रश्नोत्तरत्वादित्यत्र प्रश्नोत्तरत्वपदार्थः।

तत्त्वमस्यादिवाक्याखण्डार्थत्वानुमानस्यापि समन्वयः, साध्यहेत्वोः

तत्त्वमस्यादिवाक्याखण्डार्थत्वं त्वानन्दात्मनापि ब्रह्मस्वरूपसाक्षात्कारेण सर्वोपाध्युपादानाविद्यानिवृत्त्या जीवत्वेश्वरत्वप्रयोजकोपाधिनिवृत्तौ तत्प्रयुक्तौपाधिकभेदस्यापि निवृत्त्या मुख्यमेव। अभेदप्रतीत्या भेदनिरासस्तु कार्य-कारणभावेऽपि भवति, तथापि तत्र कार्यात्मनाऽत्यन्तभेदस्य निवृत्तावपि तादात्म्यप्रतीतिनिर्वाहकतया भेदोऽप्यविरुद्धो भासते; भेदगर्भाभेदरूपत्वात् तादात्म्यस्य। स चाभेदोऽधिष्ठानतादशायामेव। अत एव 'सन् घटः' इत्यादिस्थलेऽपि नाखण्डार्थत्वम्, कार्यकारणभावस्य तदानीं विवक्षणात्। तत्त्वमसिवाक्यजन्यसाक्षात्कारदशायां तु सर्वोपाधिप्रयोजकाविद्यायाः, तत्प्रयुक्तानां च विनाशात् न कार्यकारणभावः, इति सामानाधिकरण्यस्यात्रात्यन्ताभेदविषयत्वम्। इदमेवाभिप्रेत्य तत्त्वमस्यादिवाक्यानामखण्डार्थत्वानुमानम्—तत्त्वमस्यादिवाक्यम्,

अखण्डार्थनिष्ठम्, अकार्य-कारणद्रव्यमात्रनिष्ठत्वे सति समानाधिकरणत्वात्। अयं तु हेतुर्न सत्यादिवाक्यस्यापि साधारणः, सत्यज्ञानयोरकार्यकारणभावाभावात् सामानाधिकरण्याच्च। एवञ्च तन्मात्रप्रश्नोत्तरत्वमुभयत्र हेतुः। सामानाधिकरण्यं च्चत्राभेदमात्रप्रतीतिमादाय, न भेदघटिततादात्म्यमादाय। अतो न संसर्गागोचरत्वमसिद्धम्।

सत्यादिवाक्यस्य मिलितलक्षण एव तात्पर्यम्, न प्रत्येकलक्षणत्वे

सत्यज्ञानादिपदानां न प्रत्येकं लक्षणत्वम्, परैः सत्यत्वस्यासत्वे, क्षणिकज्ञाने ज्ञानत्वस्य च शून्यवादिभिः स्वीकारात्, किन्तु मिलितमेव लक्षणम्।

स्वरूपस्यासंकीर्णरूपेण स्वरूपलक्ष्यत्वाविरोधः

तत्र स्वरूपस्यापि भेदावस्थायामविद्याप्रयुक्तायां लक्षणत्वम्, इतरव्यावृत्तावस्थायां तु लक्ष्यत्वम्, इति न लक्ष्यलक्षणभावविरोधः। संशयादिनिवर्तकस्वरूपज्ञाने स्वरूपस्यापि विषयत्वं त्वविरुद्धम्।

निर्विशेषज्ञानस्यैवाज्ञाननिवृत्त्या मोक्षहेतुत्वं तत्त्वमस्यादिस्थले

मोक्षहेतुर्हि ज्ञानं न सप्रकारकम्, किन्त्वज्ञानसमानविषयकमिति निष्प्रकारकज्ञानेनाप्यज्ञाननिवृत्त्या मोक्षोपपत्तिः। उपहितान्याविषयकत्वे सत्युपहितविषयकस्यैव, ज्ञानस्याज्ञानसमानविषयत्वेनाज्ञानतत्प्रयुक्तसंशयादिनिवर्तकत्वात्, अभिहितान्वयवादे, अन्विताभिधानवादे वा तात्पर्यविषयासंकीर्णस्वरूपमात्रबोधकत्वेनैवानुभावकत्वाद् वाक्यस्य संसर्गविषयकत्वानियमात्। अयमेव न्यायस्तत्त्वमसिवाक्यार्थेऽपि। दृष्टान्तस्त्वत्र 'सोऽयं देवदत्तः' इति वाक्यम्। न चात्र साध्यवैकल्यम्। नहि तत्र तद्देश-तत्कालविशिष्टाभेदबोधकत्वम्; विशिष्टयोरभेदायोगात्। अत एव नात्र तद्देश-कालवैशिष्ट्यबोधकत्वम्, न वा तत्र विशेषणयोरैक्यबोधकत्वम्; बाधात्, किन्तु तत्तद्विशेषणाविवक्षया विशेष्यैक्यमात्रपरत्वम्। तदुक्तम्—

"अविरुद्धविशेषणद्वयप्रभवत्वेऽपि विशिष्टयोर्द्वयोः।
घटते न यदैकता तदा नतरां तत्र विपरीतरूपयोः॥" इति।

तत्त्वमस्यादिवाक्यानामैक्यबोधकत्वं लक्षणया, तत्राभेदो न प्रकारः, किन्तु संसर्गः

तत्रैक्यबोधनं तु लक्षणया। तत्र लक्ष्यस्वरूपैक्येऽपि प्रवृत्तिनिमित्तभेदान्नापर्यायिता। तत्राभेदो न प्रकारः, किन्तु संसर्गः। पदार्थबोधसाम्येऽपि वाक्यार्थस्याभिज्ञाद्वय इव प्रथमं विशिष्टार्थोपस्थापनात्, अभिज्ञाद्वयप्रत्यभिज्ञयोरिव सप्रकारकत्व-निष्प्रकारकत्वाभ्यां विशेषात्।

तथापि चिन्मात्रस्य नित्यसिद्धत्वेऽपि सार्वज्ञ्याद्युपलक्षितस्वरूपज्ञानस्याज्ञाननिवर्तकस्य-साध्यत्वाच्च महावाक्यवेद्यत्वम्, सोऽयमित्यादौ तत्तादेरिव सार्वज्ञ्यादेरुपलक्षणत्वेन न सप्रकारक-ज्ञानत्वं महावाक्यजन्यज्ञानस्य। तेन च फलवैलक्षण्यम्, अस्याज्ञाननिवर्तकत्वात्। अत्रोभयत्र दृष्टान्त-दार्ष्टान्तिकयोरभेदो नैक्यम्, किन्तु भेदविरह एव—उपाधिनाशप्रयुक्तौपाधिकभेदविरह एव। तदुक्तं वार्तिके—

> "उपाधिभेदभिन्नार्थो येनैकः प्रतिपाद्यते।
> तदपि स्यादखण्डार्थं महत्त्वं कुम्भखं यथा॥"

इति। तत्सिद्धम्—

> "मानं वेदान्तवाक्यानि निर्गुणाखण्डबोधनात्।
> निर्गुणत्वं च तस्योक्तं श्रुत्या युक्तिसहायया॥"

इति।

ब्रह्मनिराकारत्वे विष्णुपुराणवचनानि

अत एव तस्मिन्निराकारताऽपि। अत एव विष्णुपुराणे—परापरमूर्तभेदेन, परापरा-मूर्तभेदेन च चतुर्धा ब्रह्म प्रस्तुत्य, परामूर्तम्—

> "प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्।
> वचसामात्मसंवेद्यं तद् ज्ञानं ब्रह्मशब्दितम्॥"

इत्युपसंहृतम्। अस्य मुक्तात्मपरत्वेन केषाञ्चन विवरणमप्यद्वैतमतसम्मतमेव; तस्यैवानुपहितात्मतत्त्वरूपत्वात्। अत एवाद्वैतसिद्धावपि—

> "मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः
> सत्य-ज्ञान-सुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।

मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥"

इत्यत्र विष्णुपदेन व्यापकजीवस्वरूपमिति व्याख्यातम्। अत एवाहमर्थस्वरूपनिष्कर्षः प्रथमपरिच्छेदे द्वितीयपरिच्छेदान्ते च जीवाणुत्वनिरास उपपद्यते। कठवल्ल्यपि मुक्तात्मस्वरूपमेवाशरीरम् "अस्तीत्येवोपलब्धव्यः" इति निर्धारयति।

ब्रह्माभिन्ननिमित्तोपादानं निर्विशेषञ्च उपादानत्वं च विवर्तमानतया

इदं च ब्रह्म निर्विशेषं निमित्तम् उपादानं च। तच्च केवलविवर्तोपादानम्, न परिणाम्युपादानम्। अत्रानुमानप्रयोगौ—महाभूतानि सद्वस्तुप्रकृतिकानि, सत्स्वभावानुरक्तत्वे सति विविधविकारत्वात्; मृदनुस्यूतवस्तुवत्; जगद्, अभिन्ननिमित्तोपादानकम्, प्रेक्षापूर्वकं जनितत्वात्; सुख-दुःखवदिति। तथाहि—

ब्रह्माविद्योभयोपादानताविवेकः

ब्रह्म निर्विशेषं निमित्तमुपादानं च।

"अस्य द्वैते-न्द्रजालस्य यदुपादानकारणम्।
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥"

इति वचनानुसारेण विवर्तकारणाज्ञातविषयत्वरूपविवर्ताधिष्ठानत्वेनोपादानत्वोपपत्तेः। आत्मनि कार्यजनिहेतुत्वमुभयविधोपादानसाधारणलक्षणमपि न दुष्टम्। एवं चाज्ञानं परिणामरीत्या, ब्रह्म विवर्तमानतया जगत्कारणम्। परिणामित्वं च परिणाम्युपादानसमसत्ताकत्वम्, न सत्यरूपान्तरापत्तिरूपम्, इति न जगत्सत्यतामापादयति। घटकुण्डलादेः परिणाम्यपेक्षादर्शनेन तद्वदेवाकाशादावपि तस्यापेक्षायां नाविद्याकल्पनानुपपत्तिः, येन ब्रह्मण एव कल्पितविकारेण परिणामित्वमपि कल्प्येत। तद्विषयकाज्ञानपरिणामित्वव्यतिरेकेण नहि विकारेऽतात्त्विकत्वं निर्वक्तुमलम्, इति नाविद्योपादानत्वमन्तरा प्रपञ्चविकारित्वोपपत्तिः। उपादानत्वस्वरूपविकल्प तद्रूपणादिकं सर्वमप्यनुकोपालम्भनमेव। एवं भ्रमाधिष्ठानत्वेनापि ब्रह्मोपादानत्वम्। नहि शुक्तिः, अतीतादिकं वाधिष्ठानम्, किन्तु तदवच्छिन्नचैतन्यमेवेति नातीतेऽतिव्याप्तिः,

शुक्तौ वाऽव्याप्तिः । एवं नैकमेव चैतन्यमविशेषितत्वेनोपादानम्, अविद्यापरिणामेच्छाकृत्याद्याश्रयत्वेन कर्तृ च, इति सिद्धमिदं निर्विशेषं ब्रह्म निमित्तमुपादानं चेति । कुलालकार्यघटादीनामपि कल्पितत्वाद् कुम्भादीनामपि सकर्तृत्वाच्च न कोऽपि दोषः ।

कर्तृत्वनिष्कर्षः, येन ब्रह्मणो निमित्तत्वम्

एवं च कर्तृत्वं सोपादानगोचरप्रयत्नादिमत्त्वं मायाविवद् व्यामोहकत्वं चेति सूचितम् । व्यामुग्धजीवदृष्ट्यैवेऽपि भ्रान्तज्ञत्वमेव स्यात्, न तु भ्रान्तत्वम् । मायाव्यपि करवाणीति संकल्पपूर्वकं करोत्येव, इति व्याकरवाणीति नानुपपन्ना । मायावित्वेऽपि स्वदृश्यमानमायिकविश्वाकारमायावृत्त्यात्मपरिणामधारतया सार्वज्ञ्यभावात् शास्त्रयोनित्वाधिकरणभाष्यमपि न विरुद्धम् ।

ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणानि

तत्र च (१) "यतो वा इमानि भूतानि जायन्ते", (२) "सच्च त्यच्चाभवत्", (३) "सोऽकामयत बहु स्यां प्रजायेय", (४) "तदैक्षत बहु स्याम्", (५) "असद्वा इदमग्र आसीत् ततो वै सदजायत" इति श्रुतयः, (६) "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इति प्रतिज्ञादृष्टान्तलिङ्गम्, (७) "भूतयोनिमिति योनिशब्दः", (८) "सर्वं खल्विति सामानाधिकरण्यम्", (९) "प्रकृत्यधिकरणम्", (१०) "महाभूतानि, ब्रह्मप्रकृतिकानि" इत्यनुमानं च प्रमाणानि ।

"यतो वा" इत्यादिश्रुतीनामभिन्ननिमित्तोपादानत्वपरतानिरूपणम्

तथाहि—'यतो वा' इति श्रुतौ हि लयाधारत्वादिलिङ्गेन प्रकृतिपरत्वमेव पञ्चम्या अङ्गीकरणीयम् । न ह्यन्यथा वाक्यशेष उपपद्यते । 'सच्च त्यच्चाभवदिति' सामानाधिकरण्यमपि ब्रह्मोपादानत्व एवोपपद्यते । सदादिभाव एवात्र जगत्सृष्टिः, न तु सृष्ट्यनन्तरकालिकप्रवेशोत्तरकालिकसत्त्वादिगुणाभिव्यक्तिः सच्च त्यच्चेति वाक्ये बोध्यते; 'तदनुप्रविश्य' इत्यस्य 'मुखं व्यादाय स्वपिति' इतिवदुपपत्तेः; 'इदं सर्वमसृजत' इति तु निमित्तत्वमात्रभ्रान्तिव्युदासार्थमिति न तेन पौनरुक्त्यम् । 'स्याम्' इत्यनेन सुखी स्यामितिवद् भाविसत्त्वोक्त्या नियामकरूपाणामीश्वराभिन्नानां पूर्वमेव सिद्धया तत्र संकल्पासंभवेन च गुरुः स्यामितिवदनुपपत्त्या कार्यभावापत्तेरेव विवक्षणीयतया 'बहु स्याम्' इति श्रुतिरपि व्याख्याता । 'तत्तेज ऐक्षत' इत्यत्र तेज आद्यवच्छिन्नचैतन्यस्य विवक्षणेऽप्यवच्छेदकतेज आदिसर्गे बाधकाभावेन "तदैक्षत बहु स्याम्" इति श्रुतिरपीदानीमनुकूला । एतेन—"तदात्मानं स्वयमकुरुत" इति श्रुतिरपि—व्याख्याता; आकाशाद्यात्मना तस्यापि कारणत्वोपपत्तेः । ऊर्णनाभौ बहिष्ठस्य तन्तोरन्तः प्रवेशमात्रमेव, न तु लयः, इति तिरोभावमात्र एव 'यथोर्णनाभिः सृजते' इति

दृष्टान्तः, इति न निमित्ते कुत्रापि लय इति लयाधारत्वलिङ्गमप्युपादानत्वं गोचरयति। अन्यत्र मुख्यसंभवाद् गौणोऽपि योनिशब्दोऽत्र बाधकाभावाद् मुख्योपादानार्थबोधक एवेति योनिशब्दोऽपि विवृतो मन्तव्यः। नहि सर्वगतत्वमात्रेण सर्वत्वम्; आकाशस्यापि सर्वत्वप्रसङ्गात्, इति 'सर्वं खलु' इति सामानाधिकरण्यमप्यस्माकमेवानुकूलम्। यथा च प्रकृत्यधिकरणमस्माकमेवानुकूलम्, तथा कल्पतरुपरिमलाद्युपबृंहितब्रह्मसूत्रभाष्यभूमिकायां विस्तृतम्।

एतेन—अनुमानद्वयमपि—व्याख्यातम्। यथा विवर्तमतेऽप्युपादानत्वोपपत्तिः, तथा पूर्वमेव निरूपितम्। नहि प्रधान तदिति नार्थान्तरमपि। हेतुश्चात्र तदनुरक्तत्वविशिष्टतद्विकारत्वमेव, इति न गोत्वानुरक्तखण्डे व्यभिचारः। ब्रह्म न द्रव्योपादानमिति सत्प्रतिपक्षानुमानं तु श्रुतिबाधितं श्रुत्यनुगृहीतास्मदनुमानबाधने न समर्थमिति प्रथमानुमानं निर्दुष्टमेव। द्वितीयानुमाने तु हेतुद्वयतात्पर्यान्न व्यर्थविशेषणत्वम्; अन्तःकरणस्यैव परिणाम्युपादानत्वेऽपि तद्रूपेण परिणताविद्याधारतया विवर्तोपादानत्वमपि विद्यत एवेति न साध्यवैकल्यम्, नापि श्रुतिविरोधेन हीनबलत्वेन सोपाधिकत्वेन च सत्प्रतिपक्षोऽपीति सर्वमनवद्यम्।

ब्रह्मस्वप्रकाशत्वनिष्कर्षप्रकाराः

एतेन—स्वप्रकाशत्वमपि—व्याख्यातम्। तथाहि—परिणममानाविद्याधिष्ठानत्वमपि ब्रह्मणः स्वप्रकाशत्वादुपपद्यते। ब्रह्मणः स्वप्रकाशत्वात्तु तज्ज्ञानार्थं प्रमाणान्तरानपेक्षा। स्वप्रकाशत्वं चावेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वात्यन्ताभावानधिकरणत्वम्। अनधिकरणत्वस्य स्वरूपत्वाद् मोक्षेऽपि सत्त्वेन नाव्याप्तिः। स्वरूपस्यापि लक्षणत्वं त्वन्मते ब्रह्माभिन्नानन्दादौ गुणत्वव्यवहारवदुपपद्यते। अभावश्चात्र योग्यत्वविरोधी व्यावहारिको वा विवक्षित इति न ब्रह्मण्यसंभवः। अवेद्यत्वं चात्र फलाव्याप्यत्वरूपमेव विवक्षितम्। घटादीनामपि फलव्याप्यत्वस्य पूर्वमेवोपपादनाद् अपरोक्षव्यवहारपदेन प्रमाणजन्यापरोक्षवृत्तिविषयत्वस्यैव विवक्षणाच्च न घटशुक्तिरूप्यादावतिव्याप्तिः। ब्रह्मणस्तु न फलव्याप्यत्वम्; स्वस्य स्वासंबन्धादिति नासंभवोऽपि। अपरोक्षव्यवहारश्चापरोक्ष इति शब्दप्रयोग एव विवक्षितः, इति न तद् दुर्वचम्। तच्च योग्यत्वं प्रमातारं कञ्चन प्रतीति न दोषः। स्वविषयमपि स्फुरणं स्वभावभेदात् स्वव्यवहारजनकमिति न व्याहत्याद्यवकाशः।

एतेन चिदविषयस्वरूपत्वमपि स्वप्रकाशत्वं निर्दुष्टमिति सूचितम्। नहि स्वमेव स्वस्य विषयः। चिदन्यस्य सर्वस्य चिद्विषयत्वात्तुच्छस्य च निःस्वरूपत्वान्नातिव्याप्तिः। मिथ्यात्वानुमितिस्तु स्वपरविषयतानियामकेनैकेन रूपेण स्वविषयापीति युक्तम्, नैवमत्र। स्ववेद्यत्वस्य बाधितत्वेन

तदाश्रयार्थान्तरप्रसङ्गेन स्वव्यवहारे स्वातिरिक्तसंविदन्तरेऽसत्त्वमपि तत् संभवति। स्वप्रकाशत्वं चेद् ब्रह्मस्वरूपमेवेति न तत्राप्तिरत्त्वेऽद्वैतहान्यापत्तिरिति सर्वमनवद्यम्।

अनुभूतिस्वप्रकाशत्वानुमित्यादिव्यवस्था

एतेन—अनुभूतिः स्वप्रकाशा, अनुभूतित्वादिति व्यतिरेक्यनुमानमपि तत्र प्रमाणमिति सूचितम्। न च साध्याप्रसिद्धिः; वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगीत्यनुमानेन साध्यप्रसिद्धिसंभवात्। अत्र च चिदविषयत्वरूपस्वप्रकाशत्वस्य साधने वेद्यत्वं चिदविषयत्वरूपमेव चिदन्यमात्रवृत्तिपक्षः। अवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वरूपत्वे फलव्याप्यत्वरूपं तत्। साध्ये तु पूर्वमत्यन्ताभावप्रतियोगित्वमुत्तरत्रापरोक्षव्यवहारयोग्यं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वमित्याद्यद्वैतसिद्धौ विस्तरः। श्रुतिविरोधात्तु नात्र सत्प्रतिपक्षादिकम्। कल्पितव्यक्तिभेदमादायानुभूतित्वजातेः शुद्धेऽपि संभवान्नासिद्धिः। आत्यन्तिकसत्ता व्यक्तिभेदसापेक्षैवेति नातिप्रसङ्गः। अनुभाव्याभावेऽप्यनुभूतित्वम्, अनात्मन्यनुभूतिशब्दप्रयोगश्च पूर्वमेव निरस्तमिति न दोषः।

स्वप्रकाशत्वेऽनुमानान्तरपरीक्षा

एतेनानुमानान्तराण्यपि व्याख्यातानि। नहि स्वस्यैव स्ववेद्यत्वम्; विषयविषयिभावस्य भेदव्याप्तत्वात्। स्वेनैव स्वव्यवहारोपपत्तौ न स्वविषयत्वोपपादकं किञ्चिदस्ति। वेदान्तप्रामाण्यादिकं वृत्तिविषयत्वमात्रेणोपक्षीणमिति न विरोधः। एतेनात्मस्वप्रकाशत्वमपि व्याख्यातम्। यथा चात्मनो न ज्ञानाश्रयत्वम्, किन्तु ज्ञानरूपत्वमेव, तथान्यत्र विस्तृतम्। एवं च निर्धर्मकत्वादवेद्यतया च ब्रह्मानन्दादिपदलक्ष्यं न वाच्यम्; प्रवृत्तिनिमित्ताभावादिति मन्तव्यम्। अवान्तरवाक्यस्य तु वाच्यत्वात्यन्वावबोधनद्वारा लक्षणया स्वरूप एव पर्यवसानः। वस्तुतस्तु ब्रह्म न लक्ष्यमपि; वाच्यत्वाभावनिबन्धनत्वात्तद्व्यवहारस्य। लक्ष्यत्वाभावेन वाच्यत्वव्यवहारोऽपि गौण इष्ट एव। यथा चान्विताभिधानेऽपि स्वरूपलक्षणाऽविरोधस्तथा पूर्वमेव निरूपितम्। एवं च ब्रह्मणि न शब्दस्याभिधया प्रवृत्तिः। एतदभिप्रायैव "यतो वाचो निवर्तन्ते" इति श्रुतिरिति मन्यामहे। निर्धर्मकतया बाधात्। सधर्मकत्वेन सोपाधिकत्वाच्च तात्पर्यविषयो ब्रह्म वाच्यमित्यनुमानमपि पराहतमिति सर्वमनवद्यम्।

इति द्वितीयपरिच्छेदार्थसंग्रहः।

तदेवं प्रथमपरिच्छेदस्थादृश्यमिथ्यात्वनिरूपणाद् द्वितीयपरिच्छेदस्थापि जीवात्माणुत्व-निरासेनोपसंहाराद् अनुपहितात्मत्वपरमात्मतायामेवाद्वैतसिद्धेः परमादरः सूच्यत इति 'अथातो ब्रह्म जिज्ञासा' इति प्रस्तुत ब्रह्मपदार्थनिष्कर्षः।

अथ तृतीयपरिच्छेदार्थसंग्रहः

अत्र—"अथातो ब्रह्म जिज्ञासा" इति सूत्रेऽनन्तरप्रस्तुतसाधननिरूपणार्थस्तृतीयः परिच्छेदः।

अत्र प्रतिपादिता विषयाः—

(१) मनन निदिध्यासनयोः श्रवणाङ्गत्वम्

(२) विवरणोक्तनियमोपपत्तिः

(३) श्रवणादेर्विधेयत्वोपपत्तिः

(४) विचारस्य श्रवणविधिमूलत्वोपपत्तिः

(५) वाचस्पत्युक्तस्वाध्यायविधिविचाराक्षेपकत्वविचारः

(६) ज्ञानस्य पुरुषतन्त्रताभङ्गः

(७) ज्ञानविधिभङ्गः

(८) शाब्दापरोक्षत्वमिति

अत्राद्वैतसिद्धिर्विवरणप्रस्थानमेव श्रवणोपयोगविषये समाद्रियते। अतस्तन्मतेन श्रवणनियमविधितात्पर्यावधारणस्यैव श्रवणत्वम्, अस्य विधेयत्वम्, विचारस्य श्रवण-विधिमूलत्वम्, जिज्ञासासूत्रस्य श्रवणविधिमूलकत्वम्, विचारस्य श्रवणविधिमूलकत्वोपपत्तिरिति पञ्चप्रकरणानि। विधित्वनिषेधस्तु दर्शनमात्रे, विवरणदृष्ट्या भामतीमतेन श्रवणा-देरपि क्रियात्वमिति।

अत्र च श्रवणविधिपक्षस्य पूर्वं पश्चादुपसंहारे तद्विधिपक्षस्य चोपक्षेपाद् मङ्गलश्लोके विद्वन्द्वेशोक्तरीत्या भामतीमत एव परमादर इत्यवगम्यते।

शाब्दापरोक्षवादे, तत्परोक्षवादे च श्रोतव्यवाक्ययोजना

तत्र ज्ञानस्य पुरुषातन्त्रत्वपक्षः, मोक्षजनकस्य ज्ञानस्यापरोक्षत्वं चोभयसम्मतम्। तत्र प्रथममते साक्षाच्छाब्दत्वमपरोक्षस्य, द्वितीये श्रवण मनन-निदिध्यासनपरिपाकसहकृतमनोजन्यत्व-मपरोक्षज्ञानस्य, उभयत्र श्रवण मनन-निदिध्यासनानां सर्वेषां साक्षात्कारे जनयितव्येऽस्त्युपयोगः।

विशेषस्तु श्रवणमेकत्राङ्गि, अपरत्र निदिध्यासनमङ्गि, इतरे त्वङ्गे, तत्र पूर्वाङ्गत्वमेव श्रवण-मननयोः, श्रवणाङ्गित्वपक्षे तूत्तराङ्गे निदिध्यासनमनने इति न फलभेदः।

शाब्दापरोक्ष-तत्परोक्षवादयोः फलाभेदादिव्यवस्था

तत्र निदिध्यासनाङ्गित्वपक्षे साक्षात्कारे श्रवणस्य, श्रुतस्य शब्दस्य वा प्रयोजकतया शाब्दत्वम् श्रवणाङ्गित्वपक्षे साक्षाच्छब्दजन्यत्वेन। यथाऽन्विताभिधानवादेऽन्वयानुभवस्य शाब्दत्वं साक्षात्, अभिहितान्वयवादे तु शाब्दत्वं शब्दप्रयुक्तत्वेन। उभयत्र तत्त्वसाक्षात्कार एवाज्ञाननिवर्तनक्षम इत्यविशेषः।

कर्मणां ज्ञानयोग उपकारकत्वे मण्डन-विवरणाचार्यमतयोर्निष्कर्षः

विशेषस्तु—शाब्दापरोक्षवादे संन्यस्तस्य श्रवणाधिकारः, शाब्दपरोक्षवादे तु यावन्निदिध्यासनपरिपाकाभ्यासेन साक्षात्कारोदयः, तावत्पर्यन्तं निष्कामकर्मणां संयोगपृथक्त्वनयेन। तत्र प्रथमे श्रवणानन्तरमेव स्थितप्रज्ञः सिद्धः, तथापि तस्य षष्ठसप्तमभूमिकाभेदेन तदतिशयवत्त्वा, द्वितीयपक्षे तु यावन्निदिध्यासनाधीनसाक्षात्कारं साधकावस्थास्थितप्रज्ञस्य, तदनन्तरमेव निरतिशयः सिद्धः स्थितप्रज्ञः। तत्राद्ये संन्यस्तानां चिरेणैव मोक्षः, द्वितीये तु निरतिशयानां स्थितप्रज्ञानामचिरेण मोक्षः। इदमेवाभिप्रेत्य—"सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इत्यत्राश्वदृष्टान्तः। यथाश्वेन ग्रामं गच्छन्नचिरेण गच्छति, वृषभेण तु चिरेण, तथाऽत्रापि कर्मसाहित्ये निदिध्यासनपर्यन्तमचिरेण साक्षात्कार इति मन्तव्यम्।

भास्करीयज्ञान-कर्मसमुच्चयवादाद् मण्डनाभिमततत्समुच्चयवादविशेषादिः

अत्र ज्ञान-कर्मसमुच्चयवादो भामत्यभिमतः, मण्डनादिमतो वा। सोऽपि न भास्करमत इव समसमुच्चयेन, किन्तु पापक्षयार्थत्वेनैव, आनिदिध्यासनम्, आत्मसाक्षात्कारानन्तरं तु नोभयत्र कर्माधिकारस्तत्र। श्रवणाङ्गित्व तदङ्गत्वपक्षयोः कर्मण उपयोगे सत्यपि विशेषे, प्रागात्मसाक्षात्काराणां कर्मसंन्यासे न विरोधः। इदमेवाभिप्रेत्य तत्त्वप्रदीपिकादिष्वद्वैतसिद्धौ च ज्ञान-कर्मसमुच्चयवादनिरासः।

तृतीयपरिच्छेदस्य, किं बहुना ? परिच्छेदत्रयस्यापि मण्डनसिद्धान्त एव समादर इति विस्तरेणोपपादनम्

इदमत्रावधेयम्—यत्तृतीयपरिच्छेदोऽपि मण्डनसिद्धान्तेनैव वाचस्पतिमतेनोपसंह्रियते। तत्र जिज्ञासासूत्रस्य श्रवणविधिमूलकत्वं न भामतीप्रस्थाने भवितुमर्हति; तस्याविधित्वात्, ब्रह्मजिज्ञासाया ऐच्छिकत्वमापद्यते, इति तत्र प्रवर्तनार्थं भामत्या स्वाध्यायविधिमूलकत्वं स्वीक्रियते। न चैतावतापि पूर्वोत्तरमीमांसयोरैक्यम्; धर्मजिज्ञासासूत्रे धर्मपदस्य प्रभाकरदृष्ट्या वेदार्थपरत्वं हि वेदार्थविषयत्वोपाधिकं तदिष्टमेव तदैक्यम्। यदि तदैक्यं मीमांसकदृष्ट्या, जैमिनिदृष्ट्या वा, "शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः" इति सूत्रितदिशा तूपनिषदामर्थवादत्वेन, तर्हि तासां पृथक् न प्रामाण्यं स्यात्, पृथक् ब्रह्मजिज्ञासासूत्रणं चानुपपन्नं स्यात्। इदमेवाभिप्रेत्य भगवत्पादानां "स्वाध्यायानन्तर्यं तु समानम्" इति वाक्यम्, भामती चात्र सम्यग् व्याचष्टे धर्मपदेन वेदार्थो विवक्ष्यत इति। यतः "चोदनालक्षणोऽर्थो धर्मः" इति धर्मपदार्थनिष्कर्षः, ब्रह्म तु 'जन्माद्यस्य यतः' इति निष्कृष्यते। ब्रह्मपदार्थो यदि जीवः, तर्हि अर्थवादता वेदान्तानामिति भामत्यादिपूर्वपक्षः, अनुपहितचैतन्यपरत्वे तु सिद्धान्त इति व्यवस्था। अनेन ज्ञाप्यते—न जीवात्मतत्त्वातिरिक्तं ब्रह्मतत्त्वं नाम; अन्यथा जीवपरत्वेन पूर्वपक्षः; अर्थान्तरपरत्वेन सिद्धान्त इति पूर्वोत्तरपक्षयोर्वैयधिकरण्यं स्यात्। "शेषत्वात् पुरुषार्थवादः" इति सूत्रोपक्षिप्तसिद्धपूर्वपक्षनिरासपरे "अधिकोपदेशात्तु" इति सूत्रेऽधिकपदमसंसारिस्वरूपपरतया विवृण्वद् भाष्यमप्यमुमेवार्थं द्रढयतीत्यलमतिविस्तरेण। अत्राद्वैतसिद्धौ—प्रथमपरिच्छेदस्याहमर्थानात्मत्वसमर्थनपरतयोपसंहारः, द्वितीयपरिच्छेदस्य जीवाणुत्वनिरसनपरतयोपसंहारवत् तृतीयपरिच्छेदस्याप्यसंसार्यात्मस्वरूप एव वेदान्तानां तात्पर्येणैवोपसंहारश्च तस्याः परमादरो मण्डनसिद्धान्ते, भामतीसिद्धान्त एव वेति विशदमवगम्यते।

तुरीयपरिच्छेदार्थसंग्रहः

अथ तुरीयः परिच्छेदः "अथातो ब्रह्मजिज्ञासा" इति सूत्रे जिज्ञासाघटकज्ञानपदसूचितं मोक्षस्वरूपमद्वैतसिद्धान्तसिद्धमुपपादयितुमारभते। तत्र षट् प्रकरणानि। तानि यथा—

(१) अविद्यानिवृत्तिनिरूपणम्

(२) अविद्यानिवर्तकनिरूपणम्

(३) मुक्तेरानन्दरूपत्वेन पुरुषार्थत्वनिरूपणम्

(४) चिन्मात्रस्य मोक्षत्वोपपत्तिः

(५) जीवन्मुक्त्युपपत्तिः

(६) मुक्तौ तारतम्यभङ्गश्च

अविद्यानिवृत्ति-तन्निवर्तकप्रकरणयो-
मुक्तिप्रकरणे सङ्गतिनिरूपणम्

अत्रानिर्वचनीयाविद्याप्रकरणे तन्निवर्तक-तन्निवृत्तिप्रकरणे यद्यपि प्रसङ्गात् सङ्गते, तथैव श्रीभाष्यादिषु ते अपि विचारिते; तथापि तयोर्मुख्या सङ्गतिर्मुक्तिप्रकरण एव, यतः सैव मुक्तिः, अतोऽत्र तन्निवृत्तिप्रकरणम्। अविद्यानिवर्तकप्रकरणं तु मुक्तिसाधनत्वात् साधनाध्यायार्थसंकलनपरे तृतीये परिच्छेद एव साक्षात् सङ्गतम्; तथाप्यविद्यानिवर्तकस्यैवाविद्यानिवृत्तिरूपत्वस्याद्वैतमते स्वीकारादुभयस्य फलाध्याये सङ्गतिः। मुक्तिर्हि—

"निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः।"

इति ज्ञातत्वोपलक्षितनिवृत्तिस्वरूप आत्मैवेत्यद्वैतसिद्धान्तः।

अविद्यानिवृत्तेर्मुक्तिस्वरूपत्वसमर्थनम्

अविद्यानिवृत्तिश्चेयं ज्ञातत्वोपलक्षितात्मरूपत्वात् तत्रोपलक्षणज्ञानाजन्यत्वेन तद्रूपायास्तस्या अपि जन्यत्वासंभवान्न न संभवति वस्तु, तथापि ततोऽविद्यानिवृत्तिस्तद्विरोधिनी वृत्तिरेव, इति न तस्याः साध्यत्वविरोधः; यावत्कार्योत्पत्तिविरोधिकार्यमेव ध्वंस इत्यङ्गीकारात्। तत्र च जीवन्मुक्तावपि यद्यपि वृत्त्युपलक्षित आत्माऽस्ति। तथापि चरमवृत्त्युपलक्षितात्मन एव मुक्तित्वान्न तदापि मुक्तव्यवहारापत्तिः। जीवन्मुक्ति-प्रयोजकवृत्तेः परमुक्तिप्रयोजकवृत्तौ विशेषस्तु प्रारब्धविक्षेपाविक्षेपाभ्याम्। अतो न जीवन्मुक्ति परमुक्त्योरविशेषापत्तिः। तत्र मुक्तेर्वृत्तिसाध्यत्वं तद्विरोध्यावरणनिवृत्तिमात्रेण। अतोऽज्ञाननिरासात्मरूपैव मुक्तिः।

तत्त्वज्ञानस्याविद्याप्रयुक्तस्यापि समान-
विषयकस्यापि निवर्तकत्वेनाविद्या-
निवर्तकत्वोपपादनम्

अविद्यानिवर्तकञ्च ज्ञानं न चिन्मात्रम्; तस्य तदविरोधित्वात्, किन्तु श्रवणादिसाध्यब्रह्मज्ञानम्। तस्याप्यज्ञानप्रयुक्तत्वेन निवर्त्यत्वेन स्वरूपतो मिथ्यात्वेऽपि विषयतोऽमिथ्यात्वम्।

अज्ञाननिवृत्तेरपि मिथ्यात्वपक्षे तेन तदुपपत्तेरविरोधात्, सत्यत्वपक्षेऽप्यसत्त्वात् सत्योत्पत्तेः साधनात् न जानामीत्यनुभवेऽपि भावरूपसाक्षिभास्याज्ञानस्यैवानुभवेन तस्य साक्षिणा तद्भासकेनाविरोधात्, वृत्त्युपारूढाया वृत्तेरेवाज्ञानविरोधित्वात् चरमवृत्तेरखण्डाकाराया उपाधित्वमात्रेणोपहिताग्या-विषयकत्वे सत्युपहितविषयत्वेनाज्ञानसमानविषयत्वेऽपि 'सन् घटः' इत्यादिज्ञानस्य तद्विपरीतस्य तनो विशेषेण घटज्ञानादपि मुक्त्यनापत्तेः, मायोपादानकत्वेऽप्यात्मसाक्षात्कारस्य "तरति शोकमात्म-वित्" इति प्रमाणवशात् साक्षात्कारदशायामज्ञाननिवर्तकत्वाविरोधात्, तत्रात्माज्ञानस्योपाध्य-विषयकत्वेऽप्युपहितविषयकत्वेन शुद्धब्रह्मविषयाज्ञाननिवर्तकत्वाविरोधात्, उपादाननाशस्योपादेय-नाशप्रयोजकत्वेन तज्ज्ञानस्यापि ततो नाशेन तेनाद्वैताविरोधाच्च न कोऽपि दोषः।

आनन्दरूपतया साक्षात्क्रियमाण आत्मा पुरुषार्थः, तस्य संसारिणो विशेषश्च

स चात्मानन्दरूपः साक्षात्क्रियमाणत्वेन पुरुषार्थः, साक्षिणस्तु तयाऽऽत्मा भासते; तया साध्यत्वादानन्दात्मतयाऽऽत्मनः; इति संसारिणो विशेषो मुक्तात्मनः।

चिन्मात्रत्वेऽपि मुक्तात्मनः 'अहं मुक्तः स्याम्' इतीच्छोपपत्तिर्मुक्तिसमयेऽहङ्कारविच्छेदमात्रेण

तत्र यद्यपि 'अहं सुखी स्याम्' इतिवत् 'अहं मुक्तः स्याम्' इतीच्छानुपपत्तिः; संसारिणः कायिकसुखानुभवकाल इवाहमर्थस्याद्वैतमतेऽननुवृत्तेः, चिन्मात्रं हि तदाऽऽत्मा प्रकाशते नाहमिति, तथापि मुक्तताया बन्धविच्छेदरूपत्वेन शृङ्खलादिबद्धस्य शृङ्खलादिविच्छेदमात्रेणैवाहमर्थस्याह-ङ्काराख्यबन्धबद्धस्याहङ्कारविच्छेदमात्रेण चिन्मात्रानुवृत्तेर्मुक्ताविरोधात्, स्वप्रकाशचिदात्मन्या-नन्दरूपताया एव मुक्तात्मरूपत्वाच्च न चिन्मात्रमुक्तात्मताविरोधः।

जीवन्मुक्तस्वरूपनिष्कर्षः, द्वैतमिथ्यात्वनिश्चयेऽपि भरतादिवद् द्वैतेन तस्य व्यवहारादि च

इदञ्च मुक्तात्मरूपत्वमसंप्रज्ञातसमाध्यवस्थायां स्थितप्रज्ञस्य गुणातीतस्य निरतिशयस्वे-त्यनुभवसिद्धम्, तत उत्थितावस्थाया साधकावस्थायां वा नानुभवसिद्धम्। जीवन्मुक्तश्च तत्त्वज्ञानेन निवृत्ताविद्योऽनुवृत्तदेहादिप्रतिभासः, निवृत्तसर्पभ्रमस्य संस्कारवशाद् भयकम्पाद्यनुवृत्तिवद् दण्ड-संयोगनाशेऽपि च भ्रमणानुवृत्तिवदविद्यासंस्कारानुवृत्त्या मिथ्यात्वनिश्चये भरतादिवत् सुखि-

यत्, दुःखिवच्च जीवद् व्यवहरन् आप्रारब्धभोगसमाप्ति विनैव यत्नं श्वासनिश्वासादिवद्-व्यवसमानतत्त्वज्ञानाद् भोगसंभोगसमाप्तौ विदेहकैवल्याख्यां परममुक्तिं प्राप्नोति। 'भोगेन त्वितरे क्षपयित्वा ततः सम्पद्यते" इति सूत्रं तु प्रारब्धकर्मणां विदेहमुक्तिप्रतिबन्धकत्वमात्रं सूचयति, तेन च प्रतिबन्धकाभावविधया भोगाभावः परममुक्तौ कारणमित्यवगम्यते। अत एव बिन्दुटीकायां ब्रह्मानन्दः—"अप्रामाण्यज्ञानानास्कन्दित-पटुतमसंस्कारसहित-भुज्यमानादृष्टाभाव-सहितमेव तत्त्वज्ञानं सर्वात्मनाऽज्ञाननिवर्तकम्" इति वदति। तथा चाविद्यालेशानुवृत्त्याऽऽदेहाद्यनुवृत्ति शरीरेऽवस्थितमप्यशरीरमेवाऽऽत्मानं जीवन्मुक्तो मन्यते,—"कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः" इति न्यायेन, इति सत्यऽपि बन्धाभासे बद्ध इवामुक्तवत् पश्यन्निव शृण्वन्निव जिघ्रन्निव क्वचिदपि सुख-दुःखादिविषयासंसक्तो नित्यसंतुष्टो न शरीरादिदुःखेन दुःख्यति, न तत्सुखेन वा सुख्यतीति प्रमाणतोऽवगम्यते।

आप्रारब्धसमाप्तिशक्तिविशेषमात्रानुवृत्त्या जीवन्मुक्तिः

तस्याविद्यायां निवृत्तायामपि तस्याः शक्तिविशेषमात्रम्, विक्षेपशक्तिमात्रं वाऽनुवर्तते, प्रारब्धकर्मवशादिति तु तत्त्वम्, इति आप्रारब्धभोगमनुवर्तमानेन तत्त्वज्ञानेन पूर्वजातीयेन तस्याः सर्वशक्तिनाशात् जीवन्मुक्तिः। तथा च—"तस्याभिध्यानात्...भूयश्चान्ते विश्व-मायानिवृत्तिः", "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पद्यते" इत्यादिश्रुति-स्मृत्यादयस्तत्र प्रमाणम्। इति जीवन्मुक्तिव्यवस्था।

मुक्तौ न सुखतारतम्यम्

तत्र जीवन्मुक्तेषु—

"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥"

इत्यादिलक्षणयुक्तेष्वपि यदि सुखे न तारतम्यव्यवस्था, तदा परममुक्तेषु कैव कथा तत्तारतम्यस्य!

मुक्तेर्न भक्तिसाध्यत्वम्, किन्तु ज्ञानसाध्यत्वमेव, इति भोगक्षयमात्रेण परममुक्तिः

तत्रापरोक्षज्ञानिनोऽपि जीवन्मुक्तस्य परमानन्दहेतुभक्त्यभावे तत्साध्यस्य मोक्षकारण-स्येश्वरप्रसादस्याभावेन प्रारब्धकर्मणा संसारानुवृत्तिर्निर्द्वन्द्वस्यैव व्युत्थितस्य, समाध्यवस्थायां तु तस्यापि

माण्डव्यादीनामिव । तत्र व्युत्थितानां परदृष्ट्या तदनुवृत्तावपि तत्र मिथ्यात्वनिश्चयेन तत्साकल्यकत्वात् "तस्य तावदेव चिरम्" इति तस्य प्रारब्धकर्मक्षयापेक्षायामपीश्वरप्रसादस्य परममुक्तावनपेक्षणम्। "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेरपि भक्तेः साक्षात्कारोपयोग एव स्वारस्यावगमेनापरोक्षज्ञानिनो मुक्त्यर्थं प्रारब्धक्षयार्थं वा भक्तेरनपेक्षणाद् भोगक्षयमात्रेण परममुक्त्युपपत्तेः ।

मुक्तौ जीवब्रह्मादिभेदेषु मुक्तानां परस्परमीश्वरेण च तारतम्यनिरासस्तत्प्रमाणपरीक्षणपूर्वकम्

यदा तु जीवन्मुक्तावपि मुक्तौ न तारतम्यम्, तदा कैव कथा निरतिशयानन्दस्वरूपब्रह्मभावे तत्तारतम्यस्य ? तदा हि मुक्तस्य न ब्रह्मणा भेदः; उभयोरपि विभुत्वेनैक्यात्, "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्" इत्यादावपि तस्य भेदनिषेधात् तत्प्रयुक्ततारतम्यस्याप्यभावात्, परममुक्तौ न जीवानाम्, न वा जीवेश्वरयोर्भेदः। तत्र तया परिच्छिन्नोपाध्योस्तत्त्वज्ञानेन तन्नाशाद् घटाकाशानामिव, घटाकाशमहाकाशयोश्चैवोपाधिनाशेन भेदाभावात्, परममुक्तौ तु जीवेश्वरयोस्तयोरपि प्रतिबिम्बपक्षे ईश्वरस्येश्वरत्वमपि नास्ति, किन्तूभयोरपि प्रतिबिम्बत्वमिति नानेकेश्वरभावापत्तिः। तयोर्बिम्बप्रतिबिम्बभावे तु जीवोपाधिमात्रनाशेन मुक्तस्यैवेश्वरभावेन जीवत्वापनयेन च नानेकेश्वरभावापत्तिः। "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च" इत्यधिकरणं तूपासकानां सविशेषब्रह्मभावमेव सूत्रयति, न तु तत्त्वज्ञानिनाम्। न च स ईश्वरोऽपि; जगत्कारणत्वस्येश्वरधर्मत्वेनोपाधिधर्मत्वाभावात्; अन्यथा तत्क्रतुन्यायेन तस्याप्युपासकेन प्राप्त्या जगद्व्यापारवर्जमिति निर्देशानुपपत्तेः।

"मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥"

इत्यादिवचनानामाधिकारिकजीवपरत्वेन मुक्तपरत्वाभावेन मुक्ततारतम्ये तेषामप्रमाणत्वात्। "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" इति सूत्रं तु जीवानामौपाधिकभेदेन भेदमात्रपरत्वेन मुक्तौ विशेषाप्रतिपादनपरं न मुक्ततारतम्ये प्रमाणम्। "भोगमात्रसाम्यलिङ्गाच्च" इति सूत्रं तु गौणमुक्तानामेव भोगतारतम्यं बोधयति, न परमुक्तानन्दतारतम्ये प्रमाणम्। अत एव "ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्" इति सूत्रेण मुक्तौ तारतम्यनिषेध उपपाद्यते ।

चरमवृत्त्युपलक्षितात्मनो मुक्तित्वम्

तदयं निष्कर्षः—चरमवृत्त्युपलक्षितात्मैवाज्ञाननिवृत्तिः। उपलक्षणसाध्यतयैव मुक्तेरपि साध्यता। पाके निवृत्तेऽपि पाचकानिवृत्तिवद् मुक्तेरपि न निवृत्तिः। एतदभिप्रायमेव "निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः" इति वचनम्। एतेन—अविद्याविरोधिवृत्तिरविद्यानिवृत्तिरिति मतमपि—व्याख्यातम्। वृत्तिध्वंसोत्पत्तिपर्यन्तं तद्रूपत्वम्, चरमवृत्तिध्वंसस्तु अधिकरणस्वरूपमेवेति नानुपपत्तिः। सोपाधिकभ्रमे उपाधिविरहकालीनस्यैव ज्ञानाधिष्ठानस्याज्ञाननिवृत्तिरूपत्वान्नेयं प्रक्रियाऽन्यत्र युक्ता। 'नेति नेति' वीप्सास्वारस्येनात्मातिरिक्तसर्वमिथ्यात्वावगमात्, निवृत्तेरपि निवृत्त्यनुपपत्तिरेव तस्याधिष्ठानानतिरेके प्रमाणम्। वृत्त्युपलक्षितस्यात्मनो जीवन्मुक्तावपि सत्त्वेऽपि मुक्तिमात्रापादनमिष्टमेव।

नित्यप्राप्तात्मरूपत्वेऽपि मुक्तेस्तत्प्रतिबन्धकनिवृत्तिसाध्यत्वमात्रेण साध्यत्वोपचारः, अविद्यानिवृत्तिश्च वृत्त्युपारूढचैतन्यात्माऽऽत्मसाक्षात्कारेणाधिष्ठानसाक्षात्कारेणेत्यादिनिरूपणम्

चरमसाक्षात्कारोपलक्षितस्वरूपपरममुक्त्यापादनं नावसरमाप्नोति। प्राप्तप्राप्तिरूपतया फलस्यानन्दप्रकाशस्य स्वरूपतोऽसाध्यत्वेऽपि तत्तिरोधायकाज्ञाननिवृत्तेः साध्यत्वमात्रेण कण्ठगतचामीकरादाविव साध्यत्वोपपत्त्या वेदान्तश्रवणसाध्यत्व-पुमर्थत्वयोरपि नानुपपत्तिः। अविद्यानिवर्तकं च न स्वप्रकाशब्रह्मचैतन्यमात्रम्; तस्य तत्साधकत्वात्, किन्तु वृत्त्युपारूढं चैतन्यम्। चैतन्यप्रतिफलनधारिणी वृत्तिरेव तन्निवर्तिका। अभावस्य भावजनकत्ववत् प्रातिभासिकस्य व्यावहारिकसुखजनकत्ववच्चासत्याया अपि वृत्तेः सत्योत्पादकत्वे न विरुद्धम्।

एतेन—इच्छानिवर्त्यद्वेषवद् ज्ञानसत्यतापादनमपि—निरस्तम्; अधिष्ठानतत्त्वसाक्षात्कारणत्वस्यात्राङ्गीकारेण रूप्यवत्सत्यत्वानापत्तेः। अन्यत्रादृष्टमपि स्वस्यैव स्वनिवर्तकत्वं प्रमाणबलादङ्गीक्रियते। नहि केवलं वृत्तिः, केवलं वा चैतन्यं निवर्तकम्, इति वृत्तिफलितचैतन्यस्यैव निवर्तत्वनिबन्धनस्यैव निवर्तकत्वे न कापि शङ्का। उपहितविषयमपि निवर्तकज्ञानमुपाध्यविषयत्वान्न भ्रमरूपमिति तन्तुनाशस्य पटनाशप्रयोजकत्वदर्शनेन स्वोपादानाविद्यानाशस्यैव वृत्तिनाशप्रयोजकत्वेन न तथा सद्वितीयत्वापत्तिः। तत्र च सुखात्मतैव पुरुषार्थः। तत्र पुमर्थता न

परकीयत्वप्रयुक्ता, स्वकीयत्वप्रयुक्ता वा, किन्तु साक्षात्क्रियमाणताप्रयुक्ता। तत्र च द्वेष्यतयाऽज्ञातत्वं विशेषणं दीयते, इति नास्मदादिसुखमीश्वरस्यापि पुमर्थो भवति। मुक्तसुखसाक्षात्कारो न संसारिण इति न संसारिणोऽपि मुक्तसुखपुमर्थताप्रसङ्गः। एतेन—"प्रत्यक्षप्रकाशत्वेन सुखं पुमर्थः" इति वचनमपि व्याख्यातम्।

जीवन्मुक्तावविद्यासंस्कारानुवृत्तौ न दोषः

तच्च सुखमहमर्थगतमुक्तिकालान्वयिचिदंशस्यैव। तच्च दुःखाभावातिरेक्यप्यात्मानतिरेकीति नानुपपत्तिः। सुख-प्रकाशयोस्तत्त्वतोऽभेदेऽपि काल्पनिकभेदसत्त्वान्न सुखप्रकाश इति व्यपदेशानुपपत्तिः। तच्च सुखं जीवन्मुक्तस्यानुभवसिद्धम्। जीवन्मुक्तो नाम निवृत्ताविद्योऽप्यनुवृत्ताविद्यासंस्काराधीनदेहादिप्रतिभासो निःसारितपुष्पायां संपुटिकायां पुष्पवासनावदविद्याया अपि वासनासंस्कारापरपर्यायः। संभवत्येव विमतो नाशः संस्कारव्याप्तः, संस्कारनाशान्यत्वे सति नाशत्वादित्यनुमानमप्यत्र प्रमाणम्। विनश्यद्वस्थस्य समवायिकारणं विनापि स्थितिदर्शनादुपपादकसत्त्वे बहुक्षणसंबन्धकल्पनाया अप्युपपत्तेर्न संस्कारादिस्थित्यनुपपत्त्याऽज्ञानानुवृत्त्यापातः संभवति। पूर्वज्ञानं प्रतिबन्धकाभावासहकृतं न संस्कारादिनिवर्तकम्, उत्तरं तु तत्सहकृतं तन्निवर्तकमिति न विरोधः।

अविद्यालेशानुवृत्त्या देहाद्यनुवृत्तिर्जीवन्मुक्तौ

एतेन—अविद्यालेशानुवृत्त्या देहाद्यनुवृत्तिपक्षोऽपि—व्याख्यातः। तत्र च लेशो नाम आकारः। आकारश्च अपरोक्षप्रतिभासयोग्यार्थाभासजनकाऽऽविद्यकशक्तिविशेषः। तदनुवृत्त्या च तद्वदविद्याप्यनुवर्तत एव। शक्तिनाशमात्रात्तु मुक्त इति व्यवहारोऽविद्यादशायामप्युपपद्यत एव। विलीना हि पूर्वतनेन ज्ञानेनार्थक्रियासमर्थत्वसंपादिका शक्तिरिति सर्वमनवद्यम्। लेशस्थितौ कर्मानुवृत्तिः, कर्मानुवृत्तौ च लेशस्थितिरित्यन्योन्याश्रयस्तु ज्ञप्तौ स्थितौ वा न विरोधी। एवं च यागे नष्टेऽपि तत्सूक्ष्मावस्थारूपमपूर्वं यथाऽङ्गीक्रियते, एवमज्ञाने गतेऽपि तल्लेशो देहादिप्रतिभासहेतुरङ्गीक्रियत इति जीवन्मुक्तिरुपपन्नैव।

कैवल्यसम्पत्त्यर्थं भोगक्षयमात्रं कारणम्, नेश्वरप्रसादोऽपि

तस्य च जीवन्मुक्तस्य कैवल्यसंपत्त्यर्थं प्रारब्धकर्मक्षयमात्रमपेक्षितम्; "तस्य तावदेव चिरम्" इति श्रुतेः, न तु ईश्वरप्रसादोऽपेक्ष्यते; स्मृति-पुराणादीनां स्तुतिपरत्वात्। भोगादेव प्रारब्धकर्मक्षयोपपत्त्या नेश्वरप्रसादस्य तत्रापेक्षा।

मुक्तावुच्च-नीचभावः, तत्र भेदाभावात्

एतेन—मुक्तावुचनीचभावोऽपि—परास्तः; मुक्तौ भेदाभावेन तारतम्यासिद्धेः। यथा च भेदे न प्रमाणम्, तथा पूर्वमेव निरूपितम्। किञ्च तारतम्याभिधानम् "ऐहिकमप्रस्तुतप्रतिबन्धे" इति सूत्रेण परमुक्तौ तारतम्यशङ्कया तत्समाधानान्न परममुक्तौ घटते। अपरमुक्तौ तु इष्टमेव।

मुक्तजीवानां भोगतारतम्येऽनुमानप्रमाणनिरासः, तत्र तत्र तारतम्यश्रावणं त्वपरमुक्तिविषयम्, कर्मादिसाध्यसुखपरं वा

एतेन—मुक्तजीवभोगः, ईश्वरभोगान्निकृष्टः, इत्याद्यनुमानमपि—पराहतम्; आद्ये मुक्तस्य ब्रह्मरूपतया जीवत्वाभावेनाश्रयासिद्धेः, ईश्वरत्वाभावेन साध्याप्रसिद्धेः, स्वरूपसिद्धेश्च। द्वितीये जीवेश्वरविभागकाले चेत्, सिद्धसाधनम्। कालान्तरे चेत्, पूर्वदोषानतिवृत्तिः। 'सैषानन्दस्य' इति ब्रह्मानन्दपर्यन्तमेव तारतम्यमभिदधाति। अनन्तरं तु "यतो वाचो निवर्तन्ते" इत्यवाङ्मनसगोचरत्वं निरतिशयत्वं च श्रावयति। 'निवर्तन्ते' इति मुक्तौ आनन्दापरिच्छेदमात्रं बोधयति इत्युक्तश्रुतिविरोधादनुमानत्रयमपि बाधितमेव। साधनतारतम्यप्रयुक्तं हि तारतम्यं वैषयिके सुख एव संभवति, न स्वरूपानन्दे। सालोक्य-सायुज्ययोस्तु परापरमुक्तिरूपत्वाद् पकर्षो विद्यत एव। सायुज्यं चैक्यमेव, न संश्लेषमात्रम्; व्यापकेनेश्वरेण संश्लेषस्य नित्यसिद्धत्वात्। यथा ब्रह्मलोकान्तानामसिरुत्क्रमणगमनादिसाध्या, नैवं मुक्तिः; "अत्र ब्रह्म समश्नुते" इति तस्य अपारलौकिकत्वावगमात्, येन पारलौकिकसंश्लेषः सायुज्यं स्यात्। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतिसिद्धसर्वानन्दस्य स्वरूपानन्देऽन्तर्भाव एव "श्रोत्रियस्य चाकामहतस्य" इत्यसकृत्प्रयोगतात्पर्यविषयः, इति न तदनुपपत्तिरपि मुक्तौ सुखतारतम्ये प्रमाणम्। केवलकर्मसाध्यत्वे, कर्मसमुच्चितज्ञानसाध्यत्वपक्षे च मोक्षानित्यत्वापत्त्या ज्ञानसाध्यत्वपक्षस्यैव युक्तत्वात्तस्यैकरूपत्वेन साधनतारतम्यनिबन्धनतारतम्यस्यापि नावकाशः। "एतेन साधनस्योत्तमत्वेन साध्यमुत्तममाप्नुयुः" इति वचनमपि व्याख्यातम्; तस्यापरमुक्तिविषयत्वात्।

तस्मात् स्वरूपानन्दस्य स्वप्रकाशात्मरूपिणः।
प्राप्तिर्मुक्तिर्न तत्रास्ति तारतम्यं कथञ्चन ॥

इति सिद्धमिति।

उपसंहारः

तदेवं मुक्तस्वरूपमप्यद्वैतसिद्धावभिधेयप्रधानायाम्, अभिधानप्रधानायां वाऽनुपहितासंसार्यात्मतत्त्वस्वरूपमेव विवक्ष्यते। अत एव ब्रह्ममीमांसायां तुरीयपरिच्छेदे 'आत्मा प्रकरणात्' इति मुक्तात्मस्वरूपपरिच्छेदे आत्मपदमेव प्रयुज्यते, तत्र प्रमाणं च "स्वयं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते", "स एवोत्तमः पुरुषः" इति समाद्रियते। तथा च गीता—

"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥"

इति शम्।